

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

#5924

Comment # 28/20, 60/53, 61/54, 55/...

56/63, 57/64, 80/73, 74/...

79/82, 76/83

Do ... # 28

Total No. F = 137
+1
138

Complete





कौ ॐतत्सत् विघ्नहर्त्रेनमः ॐश्रीगुरवेनमः अथकौलावलीतन्त्रम् १
व॰ ॐनत्वाश्रीगुरुपादपद्मयुगलं सिद्धैःसदासेवितं शास्त्राणांपरिभाव
मोत्तजनकंकौलावलीनिर्णयं वक्ष्येकुलवर्द्धनंसुकृतिभिःसेव्यंस
दाकौलिकैःभावैरेवमनोहरैश्चचरणाब्जैकप्रसादालयं वांछाक
ल्पतरुंतनोतिशिवयोर्वाक्यानुसारार्थतोज्ञानानन्दगिरिर्महेश
चरणाब्जैकप्रसादालयः यस्याःप्रसादतोलेभेशास्त्रार्थतत्त्वनि
र्णयं तांनमामिमहादेवींवाणींवाग्भवप्रदां संवीत्स्ययामलं
रुद्रब्रह्मविष्णुकसंज्ञकं यामलंशक्तिसंज्ञंचभावचूडामणिंत
था तंत्रचूडामणिंचैवकुलचूडामणिंतथा कुलसारंकुलोड्डीशं
कुलामृतकुलार्णवं कालिकाकुलामृतकुलार्णवं कालिका
कुलसर्वस्वंकुलसंभावमेवच कालीतंत्रंकुलानंदंकुलचक्रंतथै
वच कालीकल्पंमहाकौलंकुमारीतंत्रमेवच समयाख्यंकाली
तंत्रंफेत्कारीभैरवीतथा श्रीक्रमंयोगिनीतंत्रंश्रीहंसपरमेश्वरं
स्वतंत्रंतंत्रराजंचज्ञानमालांततःपरं वायवीहंसतंत्रंचताराक
ल्पंचमालिनी मंत्रनिर्णयतंत्रंचयोगिनीहृदयंतथा कुलार्ण
वंचगान्धर्वंउड्डीयानंचतोडलं शिवशासनतंत्रंचमन्दरंशावरी
तथा वीरावलिंचवाराहींवीरतंत्रंचकुब्जिकां नीलतंत्रंमत्स्यसूक्तं
ललितातंत्रमेवच शंभुनिर्णयतंत्रंचवामकेश्वरतंत्रकम् वटुक
संहिताचैवतारार्णवंततःपरं गुप्तार्णवंचंडरोषंमायांनील
मणिंतथा समयाख्यंतंत्रसारंततोमंत्रविमर्षिणीं ज्ञानसारं

योगवत्नांभैरवीतंत्रमेवच भैरवाख्यंमहातंत्रंसिद्धिसारस्वतंततः
त्रिपुरार्णवतंत्रंचउत्तरंतंत्रमेवच छिन्नातंत्रंवातुलंचदक्षिणामू
र्तिसंहिता नयोत्तरेह्येकवीरांदृष्ट्वाविविधसंग्रहान् गुरूणांच
मतंज्ञात्वासारात्सारतरंमहत् हेतत्ज्ञानविहीनानांमनोभीष्ट
प्रदायकं प्रतियत्नेनगोप्तव्यंमातृमैथुनवत्सदा यस्मैक
स्मैनदातव्यंनद्रष्टंचकथंचन नदद्यात्परशिष्यायधूर्त्ताकाय
तथैवच सर्वथागोपयेदेनंयदीच्छेच्छुभमात्मनः प्रह्वताचा
रयुक्तायगुरुसेवापरायच कुलीनायमहोत्सायदेवीभक्तप
रायच शिष्यायभक्तियुक्तायसाधकायप्रदापयेत् विनापरी
क्षयोदद्यायस्मैकस्मैकदाचन सभक्ष्योयोगिनीवृन्दैरंतेचनर
केव्रजेत् तस्मात्साधकश्रेष्ठोगोपयेत्सर्वथापुनः पुस्तकं
वीक्ष्ययोमूढोनलब्धोगुरुवक्त्रतः कुर्यात्क्षोभवशेनैवसोपिनः
श्यतिनिश्चितं तस्यकर्माणिसर्वाणिनरकायभवंतिहि यो
गिनीनांभवेद्भक्ष्योनारकीब्रह्मघातकः तस्माज्ज्ञात्वागुरुर्व
क्त्रात्साधनेयत्नमाचरेत् सुकृतैर्मानवोभूत्वाज्ञानीचेन्मोक्ष
माप्नुयात् चतुरशीतिलक्षेषुशरीरेषुशरीरिणां नमानु
ष्यंविनान्यत्रतत्त्वज्ञानंतुलभ्यते तत्रजन्मसहस्रेषुजन्मैकम
पिभागतः कदाचिल्लभ्यतेजंतुर्मानुष्यंपुण्यसंचयात् सोपा
नभूतंमोक्षस्यमानुष्यंप्राप्यदुर्लभं यस्तारयतिनात्मानंतस्मा
त्पापतरोत्रकः ततश्चाप्युत्तमंजन्मलब्ध्वाचेन्द्रियसौष्ठवं

कौ नवेद्यात्महितं यस्तु स भवेदात्मघातकः विना देहेन कस्यापि पुरुषा-
व र्थो न विद्यते तस्माद्देहधनं रत्नं पुण्यकर्माणि साधयेत् तावत्कर्माणि
१ कुर्वीत यावज्ज्ञानं न जायते ज्ञानिनो ज्ञानिनो वापि यावद्देहस्य धारणं
तावद्वर्णसमाचारः मुक्तये ज्ञानेन समतां
व्रजेत् कुर्यादनित्यकर्माणि नित्यकर्माणि वाचरेत् सर्वकर्माणि
संत्यक्तुं न शक्यं देहधारिणा अहंभावमपास्यैवं यः कुर्यात्स न लि-
प्यते त्यजेत्कर्मफलं यो वा स त्यागीत्यभिधीयते क्रियमाणानि क-
र्माणि ज्ञानप्राप्तेरनन्तरं न च स्पृशन्ति तत्त्वज्ञं जलं पद्मदलं यथा
तत्त्वनिष्ठस्य कर्माणि पुण्यकर्माणि संक्षयं प्रयान्ति नैव लिप्यन्ते
क्रियामाभाति वायुना उत्पन्नसहज्ञानस्तत्त्वज्ञानरतः सदा स-
र्वसंकल्पसंत्यक्तः स विद्वान्कर्म संत्यजेत् दृष्ट्वैव यैः परित्यक्तं
कर्मकाण्डमपण्डितैः पाषण्डाः पण्डितम्मन्यास्ते यान्ति नरकं किल
फलं प्राप्य यथाहतः पुष्पं त्यजति निस्पृहः तत्त्वं प्राप्य तथा योगी
त्यजेत्कर्मपरिग्रहं द्वे पदे बन्धमोक्षाय निर्ममेति ममेति च ममे-
ति बध्यते जन्तुर्विमुक्तिर्निर्ममेति च विद्याविद्याद्वयोर्योगात्पद-
द्वयमुदीरितम् तत्कर्म यन्न बन्धाय सा विद्या परिकीर्तिता यन्न
बन्धाय तत्कर्म सा विद्या परिकीर्तिता यावत्संकल्पकर्मास्ति ताव-
द्देवादिकल्पनं यावन्न देवनैवास्ति तावद्देवाहिमोक्षणं जपहोमा-
र्चनं तीर्थं वेदशास्त्रागमादिकं तावदेव हि सर्वं च यावत्तत्त्वं न विन्द-
ति अतः प्रयत्नतो धीरः सर्वावस्थासु सर्वदा तत्त्वनिष्ठो भवेत्सैव

यदीच्छेमोक्षमात्मनः तद्धारणमहं वक्ष्येतिप्रयेनप्रज्ञायते
यथाविधिगुरोर्वक्त्राद्विद्यासंगृह्यसाधनं नित्यं नैमित्तिकं काम्यं
मोक्षदं सर्वं सर्वतः अन्यथानभजेदित्यं करोत्पापात्परस्परम्
इतिज्ञात्वामहाप्राज्ञः क्रमेणसमुपाचरेत् प्रातरुत्थायशी
रसिसहस्रदलपंकजे तरुणादित्यकिंजल्कविथोमंडल
संयुते ध्यायेन्निजगुरुंधीरो रजताचलसन्निभं पद्मासीनं
स्मितमुखंशुक्लाभरणभूषितं शुक्लमाल्याम्बरधरंवरदा
भयपाणिकं वामोरुशक्तिसहितंकारुण्येनावलोकितं
प्रियायाः सव्यहस्तेनधृतचारुकलेवरं वामेनोत्पलधारि
णयारक्तभार्याविभूषणं ज्ञानानन्दसमायुक्तः स्मरेत्तन्नामपू
र्वकं मानसैरुपचारैस्तुसंपूज्यकल्पयेत्सुधीः गन्धंभूम्यात्म
कंदद्यात्पुष्पंततःपरं धूपंवाय्वात्मकंदेयंतेजसादीपमे
वच नैवेद्यममृतंदद्यात्ताम्बूलंगुरुदत्तंतथा चामरंपादुकेछत्रं
तथालंकारभूषणं दर्शयित्वायोनिमुद्रांगुरुमंत्रंजपेत्ततः
ह्लैः पद्मंसमालिख्यसहस्रमलवर्णनिलान् वह्नियुक्तांवि
धालिख्यप्रायदीर्घत्रयान्वितान् बिन्दुनादकलायुक्तान्श्री
परांतेचपावकं अवाराध्यपद्मंचैवसर्वमूर्द्धपद्मंततः नाथस
र्वेगुरुप्रांतेगुरुःस्वयंततोगुरुः श्रीगुरुनाथपादुकांतेसहस्रम
लवर्णनिलान् वह्निदीर्घप्रतियुतान्नादबिन्दुकलान्वितान्
पिंडीकृतंलिखेदाद्यंचतुर्थंचततोलिखेत् तृतीयंपूर्ववत्ह्रैः

कौ रयंद्वितीयंचतथैवच ततःश्रीशंभुगुर्वैते पुनरार्घंसमालिखे
व तं त् आद्यहृदंचतुर्थंचपुनरार्घंतृतीयकं चत्वारिंशन्मार्गव
रैर्मंडितोयंगुरोर्मनुः यथाशक्तिजपंकुर्यादथवाग्भवंजपे
३ त् दत्तकर्णपुतोगौरोवक्रिरुद्रेणभूषितः वर्णद्वयात्म
3 कोमंत्रश्चतुर्वर्गफलप्रदः गकारःसिद्धिदःप्रोक्तोरेफःपाप
स्यहारकः उकारोविष्णुरव्यक्तस्त्रितयात्मागुरुःपरः गुरो
र्वामकेतन्न्यसमर्प्याथस्तुतिंपठेत् अज्ञानतिमिरान्धस्य
ज्ञानांजनशलाकया चक्षुरुन्मीलितंयेनतस्मैश्रीगुरवेनमः
अखंडमंडलाकारंव्याप्तंयेनचराचरं तत्पदंदर्शितंयेनतस्मैश्री
गुरवेनमः विश्वात्मकःपरःशंभुर्विश्वोत्तीर्णोस्यहृत्पदम्
इतियस्याज्ञयातस्मात्तस्यश्रीपादुकास्तुतिः सहस्रारपद्मे
विगतशशाठशांतरगतंसदा देवैर्वंद्यंभवभयविनाशैकक
रणं वराभीपाणिभ्यांप्रकटितसमन्दस्मितमुखंनमामीह
गद्रूपंपरमगुरुरूपंसकरुणं शांतंशुक्लकलेवरंत्रिनयनं
कांतंरत्नभूषाशिवं वांछाभीतिकरंप्रचंडतिमिराज्ञानप्रणा
शंरविं नित्यंनौमिरविंभवाब्धितरणोतंकरणाधारंगुरुं यस्य
श्रीपदपंकजोद्भवसुधासिद्धैःसदापीयते सदाविधोर्मंडल
मध्यसंस्थंनमामिनित्यंगुरुपादपद्मं प्रसादतोयस्यमयाप्र
लब्धं सवासनाज्ञानविनाशबीजं पद्मोद्भवेसमकलापत
योपिनित्यंयस्यांघ्रिपद्ममनसंपरिभावयंति कारुण्यवारि

धिरशेषगुणैकराशिः सोयंगुरुः शिरसिमुद्रसरोजमध्ये
प्रबंधानां पाशैः सकलगुणमायामयशतैर्निमग्नानांनित्यं
भवजलनिधेरंतरगतः कृपालेशोवन्यंपरिहरतियस्तांत्रि
तरगः प्रवन्देसानन्दंतमगुरुरूपंसकरुणं कवित्वंपांडि
त्यंत्रिभुवनपतित्वंनहिकदा नवास्वर्गेसिद्धिनसुरवरसाम्यंच
नियतं नवांछामोमोतंपुरहरपदंनैवशिवतां यदिस्यांमे
चेतोनिरवधिगुरोः पादकमले स्तवेनानेनसंस्तुत्यगुरोरा
ज्ञांलभेत्ततः ध्यायेत्कुंडलिनीशक्तिंमूलाधारनिवासिनीं
निजेष्टदेवतारूपांविषतंतुतनीयसीं सुप्ताहिसदृशाकारां
सार्द्धत्रिवलयान्वितां कोटिसौदामिनीभासांस्वयंभूलिंगवे
ष्टिनीं समुत्थाप्यमहादेवींप्राणमंत्रेणसाधकः भेदयि
त्वाचषट्चक्रंसहस्रारेस्थितेस्वरे स्थापयित्वाचतस्याहंध्याये
त्कुलगुरूनक्रमात् प्रह्लादानन्दनाथंचसनकानन्दनाथकं
कुमारानन्दनाथंचवशिष्ठानन्दनाथकं क्रोधानन्दसुखा
नन्दौज्ञानानन्दस्ततःपरं बोधानन्दमथाभ्यर्च्यक्रमेणाने
नसाधकः परामृतरसोल्लासहृदयाघूर्णलोचनाः पराल्लि
गनसंभिन्नघूर्णिताशेषतामसाः कुलशिष्यैःपरिवृताः पू
र्णानकरणोद्यताः वराभयकराशेषकुलतत्त्वार्थवेदिनः
सशक्तिसकलंचैवकथितंचमयावरं एवंकुलगुरूंनत्वाम
नसापिविधायच तर्पयित्वाचतांदेवींपुनर्मूलेसमानयेत्

कौ
४
5

तस्याः प्रभासमूहैश्च व्याप्तं देहं विभावयेत् अहं देवी न चान्योऽ
स्मि ब्रह्मैवाहं न शोकभाक् सच्चिदानन्दरूपोऽहमित्यात्मानं
विभावयेत् बहिर्गत्वा यदा पश्येत्कुलवृक्षं तु साधकः नम
स्कुर्यात्प्रयत्नेन कुलं कुलपतिस्तथा अशोकः केशरः कर्णि
कारश्चूतस्तिलस्तथा नमेरुश्च पियालश्च सिन्धुवारकदम्ब
कौ मरुवकश्चम्पकशाखी कुलवृक्षाश्च द्वादश अथवा कुल
वृक्षांश्च कथयामि स्वसिद्धये श्लेष्मातककरंजाति निम्बाश्वत्थ
कदम्बकाः विल्वो वटोदुम्बरश्च चिंचेति दशमाः स्मृताः तिष्ठं
ति कुलयोगिन्यः कुलवृक्षेषु सर्वदा न स्वपेत्कुलवृक्षाधो न चो
पद्रवमाचरेत् दृष्ट्वा भक्त्या नमस्कुर्याच्छेदयेन्न कदाचन काम
वीजं कामदेवं सर्वांते जनमालिखेत् प्रियायाहृदयांतोयं
मन्त्रं दंतविशुद्धये दंतादिकं विशोध्याथ स्वकल्पोक्तं समा
चरेत् प्रातःकृत्यं च कथितं साधकानां विशुद्धये प्रातःकृ
त्यमकृत्वा तु यो देवीं भक्तितोऽर्चयेत् तस्य पूजा तु विफला
शौचहीना यथा क्रिया इति ज्ञानानन्दपरमहंसविरचिते
कौलावलीनिर्णये १ उल्लासः ॥
अथ स्नानं प्रवक्ष्यामि शाक्तानां सिद्धिहेतवे यथाविधि ज
ले प्राप्य आत्मानं देवतालयं विचिंत्य प्रणमेद्धीरो वरुणं
वारिदैवतं उन्मज्य ततस्त्वाय कुंभं विधारयेत् अप्सु न्यो च
कैः कुर्यात्सुवर्णरजतैः कुंभैः तत्र शक्तैः स्वयं प्राप्तं न चैव

न्याःकुशाःकुशाः अनामयोभवेत् स्वर्णंस्तर्जन्योरजतंतथा पव
एवभवेद्दर्भोनदर्भवनसंभवः अथवानैवदूर्वायादेव्याःपूजाकदा
चन तस्माद्दूर्वागृहीतव्यासर्वपुष्पमयीयतः हस्तेदूर्वांकुरेकृत्वा
सर्वकर्मसमाचरेत् आचामेदात्मतत्वाद्यैः प्रणवाद्यैःस्वधांतिकैः
मंत्रैस्त्रिधातथावक्त्रंनासातिश्रोत्रनाभिहृत् मस्तकानिस्पृशेन्मं
त्रीजयीक्रोद्याभिवम्भनं भूत्वापूर्वमुखोमंत्रीउत्तराभिमुखोपि
वा मूलांतेचात्मतत्वायविद्यातत्वायतत्परं शिवतत्वायचश्री
क्रमेणवह्निवल्लभा स्वाहांतमद्भिराचामेत्तद्वीनरपुंगवः
सुधीः जलपात्रंसदूर्वंचसतिलंसजलंततः एभिःसंकल्पवीरे
न्द्रःसमंत्रंवारिणिन्यसेत् सूर्यस्यमंडलात्तीर्थमावाह्यांकुश
मुद्रया संकल्पदशधामूलेनतोयंमूर्ध्निसंक्षिपेत् ॐभारव्यमु
द्रयांचैवस्मरन्साधकपुंगवः अंगुलीभिर्मुखंश्रोत्रंनासांनेत्रंच
रोधयन् मूलंस्मरन्त्रियोमज्यगात्राणिपरिमार्जयेत् तिल
कंमूलमंत्रेणशिखांचपरिकल्पयेत् त्रिराचम्यततोमंत्रीषडं
गानिन्यसेत्ततः गृहीत्वावामहस्तेतुजलंदक्षिणपाणिना
समाच्छाद्यततोव्योमवायुवह्निस्ततःपरं तोयणीवरुणबीजं
च त्रिवारमभिमंत्रयेत् मूलेनसप्तवारंतुमुद्रयातत्वसंज्ञया
स्वमूर्ध्निचक्षिपेत्तोयंशेषंदक्षेनिधायच ध्यात्वातेजोमयंतोयं
सव्यनासापुटेनच ततउत्तोल्यदेहस्थंपापंप्रक्षाल्यवामया
प्रोत्सार्यकल्पितेवज्रशिलायांसंक्षिपेत्सुधीः प्रक्षाल्यहस्तौ

कौ
व
५
8

गलमाचामेत्तदनंतरं मायाप्रारणात्मकंमंत्रंमार्तंडभैरवायच प्र
काशशक्तियुक्तायअर्घ्यंस्वाहाततःपरं सूर्यायार्घ्यंविधायाथ
शक्तिसन्ध्याप्रकीर्तिता विभाव्यपुरतोमंत्रंतत्रदेवींगणान्वि
तां गृहीत्वागंधतोयंचजलपात्रंततःपरं तर्पयेद्देवतावक्त्रे
विधिवत्साधकोत्तमः मूलमंत्रंसमुच्चार्यतदन्तेदेवताभिधां
द्वितीयांतामहंपश्चात्तर्पयामिनमःपदं अथवा मूलांतेत
र्पयामीतिस्वाहांतंतर्पणंभवेत् गुरुंसपरिवारंचआयुधंवा
हनंतथा शक्तिंतस्तर्पयित्वाचगायत्रींशक्तितोजपेत् ध्या
त्वासावरणांदेवींसूर्यमंडलवासिनीं मूलांतेऽयदादित्य
वर्तिन्येतदनंतरं शिवचैतन्यतस्यांतेमध्येस्वाहेतिसंस्मरन्
अर्घ्यंदत्वाततस्तस्यैनामानीयांजलेनच गृह्यहृदिसंस्था
प्यजलादुत्थायसाधकः मूलेनजलवस्त्रेहेपरिधायजलेन
च मोक्षार्थीरक्तवस्त्रेणभोगार्थीश्वेतवाससा मारणेकृष्ण
वासस्तुवश्येरक्तंसदाग्रही उच्चाटनेव्याघ्रचर्मेहृत्तवल्कलंभ
कर्माणि परिधायततोमौनीहृदिमंत्रंपरामृषन्
प्रक्षाल्यहस्तपादौचपूजास्थानंसमाविशेत् इतिस्नानंस
मुद्दिष्टंअधिकारप्रदायकं स्नानतर्पणशून्यस्यनाधिकारस्य
पूजने विविधैरुपचारैश्चभक्तिभावसमन्वितः विनास्नाने
नयापूजाविफलासिद्धिहानिदा तस्मात्स्नानादिकंकृत्वार
क्तवस्त्रंततःपरं एकलिंगेश्मशानेचशून्यागारेचतुष्पथे ।

विल्वमूले प्रांतरे वा नदीपर्वतमस्तके उज्जदेनिर्जने वापि भूगृ
हे देवतालये अश्वत्थसन्निधा वापि वटमूले त्रिमूलके हट्टा
गारे निजागारे पशुदृष्टिविवर्जिते नृपालमरट्ये वापि गव्हरे
वापि यंत्रिते निश्छिद्रमंडपे वापि कर्तव्यं पूजनं सदा पूजास्था
नं महादेव्याः कथितं पीठमुत्तमं पंचत्रोशांतरे यत्र नलिंगांत
रमीक्षते तदेकलिंगमित्याहुस्तत्र सिद्धिरनुत्तमा चतुष्पथं
वीजानीयात्तत्रास्ते चंडिकाशिला तत्र यत्नेन गंतव्यं जपमस्य सि
द्धिकांक्षिभिः द्वारदेशे ततो गत्वा पूजयेद्वारदेवताः कारयेत्तत्त्वा
द्यादित्यगीतं तथैव च सिद्धार्थं तत्र दूर्वाभिस्तिलमिश्रैः सुसा
धकः अपसर्पंतु ते भूता ये भूता भुवि संस्थिताः ये भूता विघ्नक
र्तारस्ते नश्यंतु शिवाज्ञया वाग्भवाद्यं समुच्चार्य नाराचमुद्रया
सुधीः ज्वलद्भूतं समुत्सार्य यागभूमिं ततो विशेत् कूर्मचक्रं प्रक
वीत यथा तंत्रविधानतः रेखा चतुष्टयं कार्यं इन्द्रवारुणयोग
गतः उत्तराद्याम्यपर्यंतं नवकोष्टं यथा भवेत् इन्द्राग्नियाम्य
नैर्ऋत्य प्रतीच्यां पंचवर्गकं वायुकुबेरशंभोश्च यादिवर्णांश्च त
श्चतः लंदोक्षमात्समालिख्य साधकः सिद्धिहेतवे मध्ये कोष्टे
ततः कुर्यात्सर्वत्र नवकोष्टकं पूर्वादीशानपर्यंतं षोडशास्वरमा
लिखेत् अकारादिक्रमेणैव युग्मयुग्मप्रभेदतः तेजोद्यर्णास्त
यत्रास्ते शीर्षं तस्य विनिश्चितं दीपस्थानं तदेवस्यात्तत्र सिद्धिर
नुत्तमा निर्धनो जायते पत्स्य पार्श्वयोर्व्याधिरेव च पुच्छे हानिः

कौ सदाज्ञेयादीपस्थानेसदाश्रयेत् कर्मचक्रं विनायो हि जपहोमं स
माचरेत् तत्सर्वं निष्फलं विद्यादभिचाराय कल्पते पंचशुद्धिवि
व· हीनेन यत्कृतं तेन च तत्कृतं यावन्न कुरुते तेन तावद्देवार्चनं कृतः
६ पंचशुद्धिं विना पूजा अभिचाराय कल्पते भूमिशुद्धिरात्मशुद्धिः
6 द्रव्याणां शोधनं तथा मंत्रशुद्धिर्देवशुद्धिः पंचशुद्धिरितीरिता
पंचशुद्धिं प्रवक्ष्यामि यथाक्रमविधानतः सामान्यार्घ्यं ततः कुर्या
त्स्वोत्तरां तत्र साधकः चतुरस्रं ततो वृत्तं त्रिकोणं वामतो लिखेत्
आधारं स्थापयेत्तत्र संपूज्य वह्निमंडलं अस्त्रेण पोतितं पात्रं स्था
पयित्वा च पूजयेत् सूर्यमंडलमुच्चार्य हृन्मंत्रेण प्रपूजयेत्
विलिख्य मंडलं तोयैः पूर्ववत्पूजयेत्ततः इन्दुमंडलमभ्यर्च्य प्रति
पेद्गन्धपुष्पके पूर्ववत्तीर्थमावाह्य षडंगानि यजेत्ततः अथो
प्रागवायव्यमध्ये दिक्षु गपूजनं मूलमंत्रं जपेदष्टौ तज्जले
न प्रसेचयेत् प्रशांतमुच्चार्य आत्मानं यागभूमिं च पृथिव्य
र्घ्यं ततो दत्त्वा नैर्ऋत्यां साधको नमः प्रणवं भगवत्यै वधरणी
डे·पुत्रीं वदेत् धरणीं वेदयेत् स्वाहान्तेनार्घ्यं विधाय च अ
स्त्राणं पूजयित्वा च पुरुषं वास्तुसंज्ञकं सम्मार्जनानुले
पाद्यैः दर्पणोदरवत्प्रभं वितानं धूपदीपाद्यैः पुष्पमालाभि
शोभितं पंचवर्णरजश्चित्रं भूमेः शुद्धिरितीरिता विलिख्य
मंडलं भूमौ पूर्ववत्साधकाग्रणीः आसनं स्थापयेत्तत्र यथा
तंत्रानुसारतः तथासनं प्रवक्ष्यामि शाक्तानां स्थितिकाम्यया

मृदुचूडकमासीनश्चान्येषु कोमलेषु वा विष्टरे वा समासीनः
साधयेत्सिद्धिमुत्तमां अवीवक्ष्यमाणस्ततो गर्भच्युतमाङ्गमृदुं तु या
चूडोपनयनैर्हीनं मृदुमचूडकं विदुः निवृत्तचूडको बालो ही
नोपनयनः पुमान् योऽसतः पंचमे वर्षे तमेव कोमलं विदुः
मृद्वासनं विना यो हि पूजयेच्चारिकां शिवां तावत्कालेनारकी
स्याद्यावदाहूतसंप्लवं पंचाशाद्भिः कुशैः ब्रह्मतद्दैनत्वविष्ट
रः कौशेयं भोगदं रक्तकम्बलं सिद्धिदं स्मृतं वस्त्रं रोगहरं श्वे
यं मोक्षश्रीः व्याघ्रचर्मणि कृष्णाङ्गः स्वहरी प्रोक्ता ज्ञानसिद्धि
र्मृगाजिने संन्यासी ब्रह्मचारी तु विशेषतः कृष्णाचर्मणि का
ष्ठासने न कुर्वीत यत्र दौर्भाग्यवान्भवेत् अत्युच्चे नातिनीचे च
भग्ने च परिवर्जयेत् मनोहरं मृदुश्रुतामासने परिकीर्तिते
यथामन्त्रमंशाप्य प्रोतयेत्तदनंतरं सामान्यार्घ्यस्य तोयेन
पुष्पांजलिविधानतः मेरुपृष्ठऋषिः प्रोक्तः सुतलं छन्द
इतितं कूर्मोधिदेवता चात्र आसनस्थापनाय च विनियो
गः परितेयो प्यभिलाप्य पठेत्ततः पृथ्वि त्वया धृता लोका
देवि पदं ततो वदेत् त्वं विष्णुना धृता त्वं च धारय मां ततः प
रं नित्यं पवित्रं कुरु च आसनं च समुच्चरेत् अनेन प्रणवा
घेन तत्र कूर्मं त्रयं क्षिपेत् आधारशक्तिं संप्रोच्य उं पुतं कम
लासनं हृदंतं मन्त्रमुच्चार्य मायाद्येन प्रपूजयेत् आसनेसे
विशेषस्यात् वीरासनेन साधकः पदगुल्फं हि वामोरौ

कौ तदयोवामगुल्फकं कुर्याद्दृजुवपुर्ग्रीवः शरीरंचर्जुवद्धयेत् स
व. मग्रीवं विधायाय प्रोक्तं वीरासनं परं कामाख्यादिमुखः सुस्थः
प्रांमुखोवाप्रपूजयेत् सामान्यार्घ्यस्पृतोयेन प्रोक्षयेद्यागभूमि
षु स्नातो निश्छिद्रगेहेकुलविमलजलैरर्घ्यपात्रं विधाय भक्ति
श्रद्धान्वितात्मा निजकुलकमलो यंत्रराजं विलिख्य सिन्दूरैर्व्या
पिताभिः सुकुलयुवतिभिः पूजयित्वाजपेद्यस्तस्य श्रीर्नै
वपद्मे विलसति सततं वक्त्रचन्द्रे च वाणी दीप्तिताभिः कुली
नाभिर्युवतीभिः सुशोभने देवतागुरुभक्ताभिः संचितेयाग
भूमिषु नानाविधानि पुष्पाणि गंधानि विविधानि च कर्पू
रजातिधूपादिवासितं पटवासितं ताम्बूलं देवद्रव्यं च धूपदी
पादिकं च यत् सर्वालंकारभूषाभिर्भूषितः साधकोत्तमः मू
लविद्याजपतोयैः प्रतास्पृश्यापयेत्ततः सर्वं स्वदक्षिणस्या
पं वामे कुंभं निवेशयेत् पश्चिमे देवतायाश्च कुलद्रव्याणि
धारयेत् अथवा नैवेद्यं दक्षिणे वामे पुरतो वा न पृष्ठतः अ
थवा वामतो दद्यान्न तु पृष्ठे कदाचन दीपं दक्षिणतो दद्यात्पु
रतो वा न वामतः वामहस्ततले पुष्पमन्नं वा न तु दक्षिणे निवे
दयेत् पुरोभागे गन्धपुष्पादिभूषणं मलिनं भूमिसंस्पृष्टं
कृमिकेशादिदूषितं अंगसंस्पृष्टमाघ्रातं त्यजेत्पुष्पं सदा बुधः
नैव पुष्पं द्विधाकुर्यान्न दद्यात्कलिकामपि रक्तमाद्यं सितंहृंवी
नीलकंठं कुरुंटकं न दद्याच्च महादेव्यै यदीच्छेच्छुभमात्मनः

सुगंधिभिस्तैलैर्लोहित्यकुसुमैरर्चयेत्कुशैः विल्वैर्मरुवकाद्यैश्च
तुलसीवर्जितैः शुभैः पत्रैर्नैवार्चयेद्देवीं विल्वपत्रविवर्जितैः
निर्गंधैर्नार्चयेत्पुष्पैः सुगंधैः सर्ववस्तुभिः जवावंधूकमन्दारैः
सिंदूरैश्च महोत्पलैः संपूजयेच्च निर्गंधैस्तथा च रक्तचन्दनैः
अथवा नन्द्यावर्ततिलापत्रं तथा केशरपत्रकं मदनं मरुवकं
चैव दाडिमं कन्दपुष्पकं नानोपहारबलिभिर्नानापुष्पैः मनो
हरैः अपामार्गदलैर्भृंगैस्तुलसीवर्जितैः शुभैः कुलपुष्पेण धू
पेन कुलदीपेन तां सुधीः चंडिकां पूजयेद्धीमान् तथा सिद्धि
रोधकृत् न दद्यान्मालतीपुष्पं तारा कालीप्रपूजकः उन्मत्ते
चैव दातव्यं साधकेन महात्मना न पर्युषितदोषोस्ति जल
जोत्पलचम्पके अगस्त्यवकुले चैव विल्वे गंगाजले तथा नि
जदेवस्य पुष्पाणि पृथक्पात्रे निधापयेत् एकीभावेन कर्तव्यं
यदीच्छेच्छुभमात्मनः नैवेद्यादीनि सर्वाणि तथा जानीहि शै
स्थित पूजाकाले तु संप्राप्ते वासुदेवं स्मरेत्तु यः पूजाफलं न वा
प्नोति नरकं प्रतिपद्यते वैष्णवं कुसुमं स्पृष्ट्वा पूजाकाले च स
र्वदा हस्तप्रक्षालनाच्छौचमाचांतस्ततश्चरेत् शुचिः सा
वहितो भूत्वा भक्तिश्रद्धासमन्वितः संस्थाप्य वामभागे तु श
क्तिं स्वामिपरायणां रक्तवस्त्रपरीधानां दीप्तितां चारुहासि
नी विना शक्त्या तया पूजा विफला नात्र संशयः न[illegible]
क्तिपुत्रो वीरो भवेद्यत्नपूर्वकं या शक्तिः सा महादेवी हरत्

कौ पस्तु साधकः अन्योन्यचिन्तनाद्देवि देवत्वमुपजायते प्राणांवि
नायथा देवि स्पन्दितुं नैव शक्यते शक्तिं विना पि पूजायां नाधि
व. कारी भवेत्तदा विनाशात्पात्रया पूजा विफला नात्र संशयः
८ तस्माच्छक्तियुतो वीरो भवेद्यत्नपूर्वकं विद्याधिवासेन
8 तं जपेत्तं स्मरेत्तदा विनाहेतुकमास्वाद्यतो भयुक्तो भवेन्नरः
न पूजां न जपं कुर्यान्न ध्यानं न च चिंतनं तस्माद्भुक्त्वा च पीत्वा च
पूजयेत्परमेश्वरीं न क्रमच्युतिदोषोस्ति नाचारदोषदूषणं
न भुक्त्वा च न पीत्वा च न स्मरेन्न जपेत्तदा ये स्मरंति नरा मूढा
स्तेषां दुःखं पदे पदे आनन्देन विना यस्तु चंडिकां परिपूजयेत
रोगी दुःखी भवेत्सोपि मृते च नरकं व्रजेत् तस्माद्दादौ प्रकर्त
व्यं सम्विदासवयोजनं सम्विदासवयोर्मध्ये सम्विदेव गरीय
सी विजयाग्रहणं कृत्वा ध्यानं यः कुरुते नरः तदा ध्यानमयी
मूर्तिः प्रत्यक्षा तस्य जायते सम्वित्प्रयोगस्तेनेह पूजादौ सा
धकोत्तमैः कर्तव्या च महापूजा करुणामयनन्दितैः तस्याभे
दं प्रवक्ष्यामि याथार्थ्यं तत्त्ववर्त्मना श्वेतपुष्पा च ब्रह्माणी रक्ताद
तत्रिस्मृता वैष्णवी पीतप्रसूना च शूद्रा कृष्णाप्रसूनिका आ
सां शोधनमंत्रं च कथयामि पृथक्पृथक् सम्विदे ब्रह्मसंभूते ब्र
ह्मपुत्रि सदानघे भैरवाणां च तृप्त्यर्थं प्रसन्ना भव सर्वदा ॐ ब्रह्मा
ण्यै नमः स्वाहा ब्रह्माणीं शोधयेदत्र। सिद्धिमूलक्रिये देवि
हीनबोधप्रबोधिनि राजप्रजावशंकरि शत्रुकंठत्रिशूलिनी

ॐ ऐं तत्त्वक्रियायै नमः स्वाहा तत्क्रियायाः स्मृतो मन्त्रः अज्ञानेन्धन
दीप्ताग्ने ज्ञानाग्ने ज्ञानरूपिणि आनन्दस्याहुतिं सम्यग् ज्ञानं
प्रयच्छ मे ह्रूं विद्यायै नमः स्वाहा मूलमन्त्रं शोधयेदथ ॐ न
मस्यामि नमस्यामि योगमार्गप्रदर्शिनि त्रैलोक्यविजये मातः
समाधिफलदा भव क्लीं शुद्धायै नमः स्वाहा कथितं मन्त्रमुत्तमं
ॐ अमृते अमृतोद्भवे अमृतवर्षिणि पदं ततः अमृतमाकर्ष
य हंहं सिंहिं देहि ततः परं अमुकमेततो ब्रूयाद्दशमानय ततः
परं ह्रिं ठं तोयं मन्त्रः प्रोक्तश्चतुष्कोणं च शोधने अथवा ह
स क्ष म ल व र यूं ह स रौं च ततः परं आनन्दभैरवायेति वषड्
नापरो मन्त्रः अनयोरेकतरेणैव विशोध्य विजयी ततः स
प्तधा मूलमन्त्रं च तां सामुपरि संजपेत् आवाहन्यादि मुद्रां
च धेनुयोनिं च दर्शयेत् त्रितालच्छोटिकाभिश्च दिग्बन्ध
नं समाचरेत् दिव्यदृष्ट्यापदाघातैर्विघ्नांश्च विनिवारयेत्
सम्यक् तर्पयेन् मूर्ध्नि गुरुवर्गं तु साधकः तत्त्वमुद्राविधानेन ह
दि देवीं गणान्वितां तर्पयित्वा महादेवीं शक्तिभ्योऽपि दद्यात्त
तः गृहीत्वा वामहस्तेन पठेदत्र मन्त्रं ततः ऐं वद वद पदं श्री
क्रावाद्यादिनि ततः परं मम जिह्वाग्रे स्थिरीभव सर्वपदं
लिखेत् सत्त्ववशंकरि स्वाहा मन्त्रेणानेन तं स्वीकुर्यात्सा
धकश्रेष्ठो मुक्तपथशिलया (पदमिच्छया)
मार्गशीर्षादिभिर्मासैः क्रमात्संसेव्यतां त्रिभिः तुरयप्ततम

कौ० धुस्तूरावर्णानामनुपानकं पककालेहिकालस्वाग्निकालं पंच
व० कालकं क्रमात्संसेवनीयाच सिद्धिदा सिद्धिमूलिका तथा तथा
६ प्रकर्तव्यं संविदासवभोजनं यथायथा नहि भवेत्पाकसंपश्च
९ मेलके निर्जने चैव कर्तव्यं सदैव गुरुसन्निधौ न पितुः सन्निधा
नेवानमातुः सन्निधौ तथा किंवा पतितपतंगादिदर्शने नैव का
रयेत् कुलपुष्पं कुलद्रव्यं कुलपूजां कुलं जपं गुरुं कुलपत्नीं वै
वकुलमालां कुलाकुलं कुलचक्रं कुलध्यानं सर्वथा न प्रका
शयेत् प्रकाशात्सिद्धिहानिः स्यात्प्रकाशाद्धननाशनं प्रका
शान्मंत्रनाशः स्यात्प्रकाशाद्देवहिंसनं प्रकाशान्नस्तुलाभः
स्यान्नप्रकाश्यं कदाचन पूजाकाले तु कर्तव्यं (संग्रामे)
यदि कोप्यत्र गच्छति दर्शयेद्वैष्णवीं मुद्रां विष्णुन्यासं तथा
स्तवं प्रकाशाच्च दिशभिः स्यान्नप्रकाशं न दूषणं गोपनाय
दिव्यक्तिः स्यान्नगुप्तिः सा विधीयते कदाचिद्देवहानिः स्यान्न
चव्यक्तिः कदाचन वरं पूजा न कर्तव्या न च व्यक्तिः कदाचन
रक्तमाल्याम्बरधरो भूषितो युक्तो महाशयः ताम्बूलपूरितमु
खो धूपामोदसुगंधितः देवो भूत्वा यजेद्देवं नादेवो देवमर्चयेत्
प्रस्तरणं गंधपुष्पाभ्यां सुरभीकृतहस्तकः मर्दयेत्साधकश्रे
ष्ठो मूलमंत्रं परस्परं निर्मञ्छनं त्रिधा कृत्वा प्रस्तरणं वामपाणि
ना क्षिपेन्न दूरतः पुष्पं मंत्री नाराचमुद्रया अंगुष्ठाग्रेण तर्ज
न्यासंयोज्योर्ध्वेरेखया अन्यांगुलीस्तथोर्ध्वेच नाराचः स्या

स्मरार्यते ध्यात्वा गुरुं न्यसेद्वामे दक्षिणे गणपतिं तथा निज
देवीं ततः पश्चान्मध्यदेशे च साधकः पार्ष्णिघातकरास्फोट
समुदंचितवक्त्रकैः तत्र तालत्रयं दद्यात्सशब्दं संप्रदायतः प्रा
णायामैर्विना यस्तु जपहोमार्चनादिकाः न भवंत्येव सफला
यत्नेनापि कृताः क्रियाः जपस्य पूर्वतः कार्यं प्राणायामं समा
हितः अन्यथा निष्फलाः सर्वा जपहोमार्चनादिकाः अतश्च
द्वैर्वेदरसैर्नेत्रैर्वामे यथाक्रमं मात्राभिः प्रणवं जप्त्वा पूरककुंभ
करेचकैः वामां च मध्यमां चैव तथा दक्षिणनाडिभिः कनि
ष्ठानामिकांगुष्ठैः यन्नासापुटधारणं प्राणायामः स विज्ञेय
स्तर्जनीमध्यमे विना अथवा प्राणायामं ततः कुर्यान्मूलेन
प्रणवेन वा उच्चारयंस्तु प्रणवं वामेनैकेन मंत्रवित् उदरं
पूरयित्वा तु वायुना यावदात्मस्थितिः प्राणायामो भवत्येवं पूर
को देहपूरकः पिधाय सर्वगात्राणि निश्वासोच्छ्वासवर्जितः
संपूर्णकुंभवत्तिष्ठेत् प्राणायामः स कुंभकः मुंचेद्वायुं ततश्चै
केन श्वासेनैकेन मंत्रवित् निश्वासयोगयुक्तस्तु वायुं वाह्ये
न रेचयेत् रेचकस्त्वेवं संप्रोक्तः प्राणायामो न संशयः जानुप्र
दक्षिणीकृत्य न द्रुतं न विलंबितं क्रियते चांगुलिस्फोटं सा मात्रा
परिकीर्तिता ततो द्वादशमात्राभिः पूरकः क्रियते बुधैः तस्मा
द्विगुणमात्राभिः क्रियते रेचकः शुचिः तस्माद्विगुणमात्रा
भिः कुंभकः क्रियते तथा प्राणायामत्रयेणैवमेकैकं त्रित

कौ यात्मकं लिंगकार्यंहृदिस्थन्तुचैतन्यंसमाहितं प्रणवेनविनिः
व सार्यब्रह्मरन्ध्राद्बहिर्बुधः तेनैवसंपुटीकृत्यमस्तकोपरिवि
१० न्यसेत् चैतन्यरहितंदेहंबाह्यंचाभ्यंतरंतथा नाभिमंडलम
ध्यस्थंवायुमंडलमध्यगं यंबीजंधूम्रवर्णंतंध्यात्वातेनविशो
षयेत् अग्निमंडलसंस्थेनरंबीजेनाग्निरूपिणी निर्दहेदथ
तद्भस्मराशिदेहाकृतिर्भवेत् भ्रूमध्यस्थंहृदिस्थंवाध्यायेद्व
रुणमंडलं अर्द्धचन्द्राकृतिंश्वेतंपद्मद्वयसमन्वितं तत्रस्थे
नवकारेणाप्लावयेत्सुधारूपिणी जीवंतपार्थिवंतस्य चिंत
येद्धेममंडलं प्रणवेनाद्विधाकृत्यतत्रचैतन्यरूपिणी मस्त
कोपरिविन्यस्यचैतन्येननियोजयेत् अमृतप्लावितःपिंडः
समस्तोजातकल्मषः आत्मानंचिंतयेत्पश्चाद्देवतारूपिणं
ततःप्राणायामंचकथितंभूतशुद्धितथापरं अथवान्यप्र
कारेणभूतशुद्धिश्चकथ्यते प्राणायामत्रयंकृत्वाभूतशुद्धिं
ततश्चरेत् भूतशुद्धिंविनाकर्मजपहोमार्चनादिकं तावन्नहि
फलंसर्वप्रकारेणसानिश्चितं भूतशुद्धिंविनायस्तुन्याससं
ज्ञांकरोतिहि न्यासजालंवृथातस्यपूजासापिविफलाभवेत्
तस्मात्साधकश्रेष्ठोभूतशुद्धिंसमाचरेत् मूलाधारात्ततःप्रा
णंब्रह्ममार्गेणतांत्रिकः हंसेनपुष्करस्थानेपरमात्मनियोजये
त् संहारक्रमयोगेनपंचतत्त्वंसमुद्धरेत् शोषदाहप्लवान्कृ
त्वा वाय्वग्निसलिलात्मकैः अनेनविधिनामंत्रीभूतशुद्धिंसमा

चरेत् आत्मानं देवतारूपं विभाव्य साधकोत्तमः स्वदेहे देवता
जीवं विन्यसेत्तदनंतरं मुखवृत्तं समुच्चार्य हंसस्तु विपरीततः
क्रमात्प्राणाइह प्राणास्तथा जीव इह स्थितः अमुष्याः सर्वेंद्रि
याणि भूयोमुष्य पदं ततः वाङ्मनो नयन श्रोत्र घ्राण प्राण पदान्य
थ पश्चादिहागत्य सुखं चिरं तिष्ठंतु वह्निद्वयं अथवा पाशबीजं च
लज्जां चांकुशमेव च प्राणमंत्रं ततः पश्चाच्छेषं पूर्ववदाचरेत्
जीवन्यासमनुः प्रोक्तः जीवन्यासे प्रयोजयेत् ततः कुर्यात्स्वक
ल्पोक्तं न्यासादिकं तु साधकः षडंगानां च मुद्रां च स्थानं च मंत्र
मुच्यते विद्येकदशाराविह्निसंख्यांगुलिगतक्रमात् हृदि मस्त
शिखायां च कवचे लोचनास्त्रके नमः स्वाहा वषट् हुं वौषट् फ
ड्योजयेत्क्रमात् ऋषिश्छन्दश्च संयुक्तं देवता बीज शक्तिकम्
कीलितं ङे-युतं सर्वं विन्यसेद्देहे साधकः शिरो वदन हृत्गुह्य पा
द सर्वांगकेन्यसेत् अंगषट्कं ततः कुर्यात्स्वोक्तेनैव वर्त्मना यं
वा प्रादस्तन्यासे यद्विशेषस्तदुच्यते ललाटे नामिका मध्ये वि
न्यसेन्मुखवर्त्मके तर्जनीमध्यमानामा वृद्धानामा च नेत्रयोः
अंगुष्ठं कर्णयोर्न्यस्य कनिष्ठांगुष्ठकौ नसोः मध्यास्तिस्रो ग
ण्ड्योश्च मध्यमा ओष्ठयोर्न्यसेत् अनामां दंतयोर्न्यस्य मध्यमां मू
त्तमांगके मुखे नामां मध्यमां च हस्ते पादे च पार्श्वयोः कनिष्ठा
नामिका मध्यास्तास्तु पृष्ठे च विन्यसेत् ताः सांगुष्ठा नाभिदे
शे सर्वाः कुक्षौ च विन्यसेत् हृदये च तलं पूर्वं अंसयोश्च ककु

कौ न्यसेत् हृत्सर्वेहस्तपल्कसिमुखेषु तलमेव च पताकास्तमातृ:
व. कामुद्राःक्रमेणापरिकीर्तिताः अज्ञात्वा विन्यसेद्यस्तु न्यासः
११ स्यात्तस्य निष्फलः पंचाशदक्षरन्यासः क्रमेणैव प्रकाशितः
ॐ माद्यंतेनमोवाम विन्दुः विन्दुवर्जितः मायालक्ष्मीवीजपू
र्वीन्यसध्याऽच्यते बुधैः अथवा केवलं सर्गविन्दुयुक्तां कलाश्रि
तां नातीयरुद्रशक्त्यंतां स्वरादिकेशरान्वितां शक्तिपूर्वांश्रि
यायुक्तांस्तथासंवर्तनीन्यसेत् शक्तिश्रीकामवीजांतां
वेदादिशक्तिमातृकां अजपापरमात्माचहंसप्रपंचयाग
कः रविसंख्यात्मिकांप्रोक्तांमातृकांतत्त्वरूपिणीं यस्यपत्र
रुचिर्गच्छेत्तत्तद्रूपात्मनोचितां विन्यसेत्तन्मयोमंत्रीयाति
वागीश्वरीमयं पुष्टावानामयावापिमनसावान्यसेद्बुधः अ
घ्यादिव्यापकांतंचस्वकल्पोक्तंसमापयेत् प्राणायामादिभि
न्यासैरात्मशुद्धिःप्रजायते इति श्री ज्ञानानन्दपरमहंसवि
रचितेकौलावलीनिर्णये द्वितीय उल्लासः ॥
आत्मशुद्धिःसमाख्याताअंतर्यागश्चकथ्यते अंतर्यागविधिं
कृत्वावहिर्यागंसमाचरेत् वहिर्यागेनाधिकारीअंतर्यागवि
वर्जितः वहिर्यागफलंनास्तिविनांतर्यजनंकदा तस्मात्प्रय
त्नतोवीरश्चांतर्यागंसदाऽऽचरेत् शिवशक्तिसमायोगात्तुयाह
ष्टिंविधायच तर्पयित्वामहादेवींपद्मेपद्मेस्वसाधकः
मूलाधारेसमानीयसोहंसंचिन्तयेत्ततः इत्यंतर्यजनंप्रोक्तं

सर्वसिद्धिप्रदायकं यद्यांतर्यजनं वक्ष्ये साधकस्य सुसिद्धये
स्वकीयहृदये ध्यायेत्सुधासागरमुत्तमं रत्नद्वीपं तु तन्मध्ये सु
वर्णवालुकामयं परितो भावयेन्मंत्री पारिजातं मनोहरं तत्र
कल्पद्रुमं ध्यायेत्सेवाशादत्तात्मकं तन्मूले भावयेन्मंत्री ना
नारत्नोपशोभितं उद्यदादित्यसंकाशं व्याप्तब्रह्मांडमंडलं
शतयोजनविस्तीर्णं ज्योतिर्मंदिरमुत्तमं चतुर्द्वारसमायुक्तं
हेमप्राकारशोभितं बहुचामरघंटादिविनैरुपशोभितं
मन्दवायुसमाक्रांतं गंधधूपैरलंकृतं तन्मध्ये वेदिकां ध्याये
न्नानारत्नोपशोभितं सुवर्णसूत्ररचितं चिन्तयेच्छत्रमुत्तमं
विभावयेन्महायंत्रं पीयूषपूरपूरितं पाद्यपात्रं यजेद्यादर्घ्य
पात्रं यजेत्तथा षडासनपात्राणि मधुपर्कं च यजेत्ततः पं
चभोगपात्रं तु साधकः षोडशे दले सहस्रारसुतैर्नैव पात्रा
णि पूरयेत्तथा पीठपूजां ततः कुर्यात्कल्पोक्तविधानतः
सर्वोपरि ततो ध्यायेत्पश्चिमाननपंकजं सर्वंतमस्तंनिम
दिव्यांगकमलांतरे शिवशक्तिसमायोगादस्तानन्दनंदि
नी स्वस्वरूपां समावाह्य परिवारगणैः सह मानसैरुपचा
रैश्च दीयते इत्युत्तमं आसनं स्वागतं दद्यात्कुशलं तदनंतरं
पाद्यं चरणयोर्दद्यान्मौलौ वार्घ्यं निवेदयेत् सहस्रदललभ्यंगा
गंगांविकानालविकानालिविप्लुतं पराम्रतं च पानीयं भाव
गुण्यैः समन्वितं स्वर्णपात्रे जलं कृत्वा दद्यादाचमनं शुभे ।

कौ मधुपर्कं सुखेदद्यात्पुनराचमनीयकं चतुर्विंशतितत्त्वेन गंधं
व ते दद्याद्धि चतुर्गणः स्वयंभूकुसुमं दद्यात्कुंकुमं रक्तचन्दनं समा
१२ हृभावपुष्पैश्च संधूपदीपकं मनःकल्पितनैवेद्यं दद्या
12 द्देव्यै मनोरमं तर्पयेच्च तिथादेवीं यथोक्तवारिणा ततः षडं
गेषु रूपं क्लिंच पूजयेदंगदेवताः पूजयित्वा प्रयत्नेन स्नानीयं
दापयेद्यथा स्ववामे मंडले कृत्वा रत्नसिंहासनान्वितं तत्र
देवीं समानीय नानागं समन्वितं उद्वर्तनादिकं कृत्वा तैले
नाभ्यंजनादिकं दत्वा देव्यै प्रयत्नेन स्नानीयं दापयेत्ततः
सुवर्णकोटिकुंभेषु गंधतोयसमन्वितैः नानातीर्थजलैर्वै
स्नापयेत्परदेवतां नयनेतेन समस्तं प्रोंछयेत्तेन चैतन्तु श्रा
काशतत्वं प्रोच्चेचैतेन वस्त्रे प्रकल्पयेत् विधिवद्दन्तं कृत्वा
केशसंस्कारमाचरेत् नानारत्नसमायुक्तं कंकत्यासायको
तमः पट्टगुच्छं केशपाशे नानारत्नसमाकुलं ललाटेति
लकं दद्यात्सिन्दूरं केशमध्यके नागेन्द्रदंतरचितं शंखं द
द्यान्मनोहरं हस्ते केयूरकं चैव कंकनं कटकं तथा पादांगु
लीयकं दद्यान्नानारत्नोपशोभितं पादयोर्नूपुरं दद्यात्क
ट्यां च क्षुद्रघंटिकां शिरोरत्नं प्रदद्याच्च मुकुटं रत्ननिर्मितं
ताडंक कुंडलं कर्णभूषणं सुपरिष्कृतं नयने कज्जलं दद्या
न्नानाश्रेणजमौक्तिकं ग्रीवापद्मकं कंठभूषां मुक्तामणिविरा
जितं आनन्दहाररचितं च अंगुलीयकरत्नकं सर्वांगलेप

नैकार्ये गंधचन्दनसिक्तकैः कांचनाचितकं तूलीमलकं रदनच्छ
दे सुवर्णपादुकां दत्वा प्रवालदंतचिह्नितां मंडपेषु समानीय
रत्ननिर्मितदोलया पुनः पाद्यादिकं दत्वा पूजयेत्तां सनातनीं
गंधादिकं ततो दत्वा भावपुष्पैः प्रपूजयेत् अमायमनहंकार
मरागममदं तथा अमोहकमदंतं च अद्वेषाक्षोभकौ तथा
अमात्सर्यमलोभं च दश पुष्पं विदुर्बुधाः अहिंसा परमं पुष्पं
पुष्पमिन्द्रियविग्रहं दयापुष्पं क्षमापुष्पं ज्ञानपुष्पं च पंचमं
इति पंचदशैर्भावपुष्पैः संपूजयेच्छिवां करवीरं जवाद्रोणं च
म्पकं नागकेशरं अपरं च कदम्बं च पारिजातादिकं तथा द
द्याद्देव्यै प्रयत्नेन माल्यं गंधसमान्वितं सुमेखलापद्ममाला पु
ष्पं नानाविधं तथा सप्तद्वीपसमुद्भूतं दद्याद्देव्यै स साधकः
ॐ ड गोलोड्वं चैव धूपं दद्यात्समीरणे सहस्रकर्णिकापात्रे
तैलं स्यात्स्वपरामृतं मूलाधारे वर्तिरूपं चिदग्निः स्यात्प्रदीपकः
आमूलाद्ब्रह्मरन्ध्रांतं सुषुम्नास्तत वायुना अनाहतध्वनिमयी
घंटामेतां निवेदयेत् नैवेद्यं षड्रसोपेतं पवनं चामरं तथा
सूर्यं च दर्पणं चन्द्रमंडलं छत्रमुत्तमं सुरांभोधिं मांसशैलं
मत्स्यराशिं फलानि च सुपक्वं चरुकं चैव बहूताक्रं परमात्मकं
भक्ष्यभोज्यं तथा चोष्यं लेह्यं पेयं च चर्वणं दद्याच्छेषामृतोयेन
पुनराचमनीयकं वासचक्रं ततो दद्यान्मूलाधारे — वायुना
रजःसत्वगुणाढ्यं च कर्पूरचूर्णमिश्रितं रत्नपात्रे परिस्थाप्य

कौ
व
१२
13

ताम्बूलंचनिवेदयेत् तर्पयित्वाथुनः देवीं पूजयित्वांगदेवताः
विधायतर्पणंतेषांदेवीं संपूजयेत्पुनः विधिवत्पूजनंकृत्वातर्पयेत्तदनंतरं अंतर्मातृकयाजप्त्वासमर्पचस्तुतिं पठेत् पुष्पशय्यांचसंस्कुर्यात्तत्रदेवींसुरेश्वरीं मनोनर्तकतालैश्च शृंगारादिरसोद्भवैः गीतैर्नानाविधैर्देवींतोषयेत्साधकोत्तमः तस्मात्कामेश्वरीदेविपिताकामेश्वरस्त्वसः मनश्चैवंविभाव्यसाधकःसिद्धिमान्भवेत् इत्येतत्यजनंप्रोक्तंभुक्तिमुक्तिप्रदायकं रक्तपद्मसहस्राणिमनसायःप्रयच्छति कल्पकोटिसहस्राणिकल्पकोटिशतानिच स्थित्वादेवीपुरेश्रीमान्ततोराजाधितोभवेत् मनसापिमहादेव्यैनैवेद्यंदातुमिच्छति योनरोभक्तिसंयुक्तःसदीर्घायुःसुखीभवेत् मनसापिचयोभक्त्यादेव्यैकुर्यात्प्रदक्षिणं देवीगृहेवसेत्सोपि नरकाणिनपश्यति नमनंमनसादेव्यैयोभक्त्याकुरुतेनरः सोपिलोकान्विजित्वाशुशिवलोकेमहीयते अथान्तर्यजनंवक्ष्येदृष्टादृष्टफलप्रदं गुरुध्यानंप्रकुर्वीतयथापूर्वंविशालधीः स्नायात्सुविमलेतीर्थेपुष्करेहृदयाश्रितेविन्दुतीर्थेयथास्नायात्पुनर्जन्मनविद्यते ईडासुषुम्नेशिवतीर्थकोस्मिन्नानाम्बुपूर्णेवहतःशरीरे ब्रह्माम्बुभिःस्नातितयोःसदायःकिंतस्यगांगैरपिपुष्करैर्वा इतिस्नानंसमुद्दिष्टमथसंध्यांसमाचरेत् शिवशक्त्याःसमायोगाद्यस्मि

कालेप्रवर्तिते सासंध्याकुलनिष्ठानांसमधिस्थैः प्रणीयते च
न्द्रार्कानलसंघट्टाकृतितंयत्परामृतं तेनामृतेनदिव्येनत
र्पयेत्परदेवतां तर्पणंकथितंदिव्यमर्घ्यसाधनमुच्यते ब्रह्म
रन्ध्रादधोभागेयत्साद्रेपात्रमुत्तमं कलासारेणसंपूर्यतर्प
येत्तेनखेचरी आधारेलिंगनाभौहृदयसरसिजे तालुमू
लेललाटेद्वे पत्रेषोडशारेद्विदशादशदलेद्वादशार्द्धेचतु
ष्के वासांते कालमध्येडफकठसहिते कंठदेशेस्वरांश्च
हंतो कोदंडमध्येन्यसतुविमलधीर्न्याससम्पत्तिसिद्धौ ।
इत्यन्तर्मातृकावर्णान्न्यासेत्कंठच्छदक्रमात् षडंगमथ
कुर्यात्तयेनदेवीमयोभवेत् हन्यमानहृदयाद्यैर्हृदयंस
च्चिदात्मकं क्रियतेततपरत्वेन हन्मंत्रेणततः परं सर्वा
गादिगुणोत्तंगसच्चिद्रूपेपरमात्मनि क्रियतेविषयाहार
शिरोमंत्रेणदेशिकैः हृच्छिवोद्रूपविद्याममताभावना
हृष्टा क्रियतेनिजदेहस्यशिखामंत्रेणदेशिकः मंत्रात्म
कस्यदेहस्यमंत्रवाच्येनतेजसा सर्वतोमंत्रवर्णेनक्रियतेत
स्यसंहृतिः यद्दशातिपरत्वानेसंविद्रूपेपरात्मनि हृदयादि
मयंतेजः स्यादेतन्नेत्रसंज्ञितं अध्यात्मिकादिरूपंमत्साधक
स्यविनाशयेत् अविद्याजातमंत्रंतत्परं धामसमीरितम्
इतिन्यासंविधायाथ ततोध्यायेच्चिदात्मकं शक्तिद्वयपुटां
तस्थद्वलतत्रयसंस्थितं ज्योतिस्तत्वमयं ध्यायेत्कुलाकुल

कौ नियोजनात् अथशृंगाटमध्यस्थशक्तिहृदयपुटीकृतांसदा स
व. मरसंध्येयंध्यानंतत्कुलयोगिनां अथवा किरणस्थंतदग्रस्थं
१४ चन्द्रभास्करमध्यगं महाशून्येनयंकृत्वापूर्णस्तिष्ठतियोगिरा
ट् निरालम्बपदे शून्येयत्तेजउपजायते तद्गर्भमध्यसन्निभं
ध्यानमेतद्धियोगिनां अथपूजांप्रवक्ष्यामियथातंत्रानुसार
तः अर्चयन्विषयैः पुष्पैस्तल्लक्षणात्तन्मयोभवेत् न्यासस्त
न्मयतावुद्धिः सोहंभावेनपूजयेत् पूर्वोक्तभावपुष्पाणिद
द्यात्देव्यैस्वसाधकः अथवक्ष्येजपंतत्रपरमस्यवर्णमालया
मालापंचाशिकाप्रोक्ताहुत्रंशक्तिशिवात्मकं ग्रथिताकुंड
लाशक्तिः कलांतेमेरुसंस्थितिः सविन्दुवर्णमुच्चार्यमूलमं
त्रमेरेत्ततः अनुलोमविलोमाभ्यां यथाशक्तिजपंचरेत्
जप्त्वासमर्पयेत्पश्चात्स्वकल्पोक्तविधानतः स्तुतिसकलेत
त्रसमर्पणंपुनःपुनः अथहोमविधिंवक्ष्येयेनाचिन्मयतां
लभेत् आत्मानमपरिच्छिन्नंज्ञातव्यंसाधकोत्तमैः आत्मा
नरात्मापरमज्ञानात्मानःप्रकीर्तिताः एतद्रूपंतद्वितत्कुं
डंचतुरस्रंविभावयेत् आनन्दमेखलारम्यंविन्दुत्रिवल
यान्वितं अर्द्धमात्रायोनिरूपंब्रह्मानन्दमयंभवेत् परदेव
मयेसर्वज्ञानदीपविजृंभिते सम्विदग्नौहुनेद्द्रव्यंसाधकः
स्थिरमानसः स्वाहाख्यंमातृकारूपमन्त्रवर्णविराजितं
घृतवारिणिहुतात्मवह्निः शाहूंब्रह्मजायतेकृत्वाहुत्यपाय

पुण्येसंकल्पाश्चविकल्पकान् धर्माधर्मौसाधकेन्द्रो हविस्तेन प्र
कल्पयेत् चिदग्नौजुहुयान्मंत्रीस्रुचास्तेनयथाक्रमात् होममंत्रस्तु ।
नाभिमंडलचैतन्यरूपाग्नौमनसास्रुचा ज्ञानप्रदीपितेनित्यमक्ष
वृत्तीर्जुहोम्यहं वह्निजायांतमंत्रेणादद्याच्चप्रथमाहुतिं धर्माध
र्मेहविर्दीप्तआत्माग्नौमनसास्रुचा सुषुम्नावर्त्मनानित्यमक्षवृ
त्तीर्जुहोम्यहं वह्निजायांतमंत्रेणद्वितीयाहुतिमाचरेत् प्रकाशा
काशहस्ताभ्यामवलम्ब्योन्मनीस्रुचा धर्माधर्मकलास्नेहपूर्ण
मग्नौजुहोम्यहं वह्निजायांतमंत्रेणतृतीयामाहुतिंचरेत् अं
तर्निरंतरनिबंधनमेधमानेमायांधकारपरिपंथिनिसंविद
ग्नौ कस्मिंश्चिदद्भुतमरीचिविकासिभूमौ विश्वंजुहोमि वसु
धादिशिवावसानं इदंतुपात्रंभरितंमहेशोनापपरामृते पूर्णा
हुतिमयेवह्नौ पूर्णाहोमंजुहोम्यहं इत्यंतर्यजनंकृत्वासाक्षाद्ब्र
ह्ममयोभवेत् महान्तर्यजनंवक्ष्येब्रह्मयज्ञस्वरूपकं ब्रह्मयज्ञं
महायज्ञंब्रह्मज्ञानीयजेत्सदा मनसाचमनोठ्युयथामि
मुगतानदी तथासर्वशरीराणिमहाब्रह्मणियोजयेत्
यज्ञकर्तामहायोगीसर्वमंत्रंजपेत्ततः आत्मस्थःसर्वयज्ञस्तु
बहिर्यज्ञविवर्जितः कर्मयज्ञोमनोयज्ञःप्राणयज्ञोहुताशनः
मंत्रयज्ञःसुषुप्तांतः सर्वयज्ञफलंलभेत् ब्रह्मार्पणंब्रह्मह
विर्ब्रह्माग्नौब्रह्मणाहुतं ब्रह्मैवतेनगंतव्यंब्रह्मकर्मसमाधि
ना ब्रह्मवत्सर्वमार्गेषुसर्वकर्मसमभ्यसेत् अथवक्ष्येबहिर्या

कौ गविधानंतंत्रवर्त्मना एषामन्यतमेहत्वामेवराजंसमालिखेत्
व. स्वर्णेवाराजतेताम्रे पाषाणेवाप्यथात्वत्र अथवा गंडकीनी
१५ रपाषाणेतथैवस्त्रविपीठके श्रीखंडसंभवेपीठेरक्तचन्दनसंभ
15 वे यद्वा सुवर्णरूप्यादौताम्रेवादर्पणेतथा काश्मीरप्रभवेभू
मौयंत्रंकुर्याद्यथाविधि गोमयेनचसंलिप्तेशुभ्रदेशेमनोरमे
सिन्दूररजसावापिरक्ताभिःकुंकुमस्यवा अथवा शुद्धेसमेभू
र्जपत्रे ... शुक्लेसमेभूगृहेवास्फाटिके
स्वर्णपट्टके रत्नेवाकुलशंकौवायंत्रंकुर्यात्तुसाधकः यद्वा
लकं विलिप्यते वस्त्रमार्गेकवस्तुना स्वयंभूकुसुमंकुंडगोलो
द्भवं रोचनागुरुं काश्मीरंमृगनाभिंचमलयोद्भवं यक्षक
र्दमः समाख्यातः सर्वदाचंडिकाप्रियः एतेनगंधयोगेनचक्रंरा
जंसमालिखेत् अथवा स्वयंभूकुसुमेनैवकुंडगोलेनवापुनः
तदातस्यसर्वसिद्धिर्जायतेनात्रसंशयः यद्वा चन्दनागुरुचंद्रे
ण सिन्दूररजसापिवाकस्तूरीमृगरोद्भव्यैरोचनालाक्षयात
था यद्वा कुंडगोलोद्भवैर्द्रव्यैःस्वयंभूकुसुमेनच रोचनाला
क्षयायुक्तैःकुंकुमागुरुचन्दनैः सुवर्णरत्नलेखन्यासर्वकार्यार्थ
सिद्धये यद्वा पुष्पेणविलिखेद्वापियंत्रराजंतुसाधकः
चन्द्रसूर्यातपन्यावा अथवा बिल्वकंटकैः चन्द्रसूर्यातपद्वे
मोद्भवयाबिल्वकंटकैः एषामेकतमंलब्ध्वालिखेद्यंत्रंसमुद्भवे
त् सार्द्धत्रिकोटितीर्थेषुस्नानायत्फलमाप्नुयात् ।

तत्फलंलभतेभक्त्याकृतेष्टचक्रदर्शनं नालोच्यजंवर्त्मनज्ञात्वा
सूत्रधारणं नज्ञात्वासुषमांरेखामालिख्यसुषमंमुखं तस्य
सर्वेंद्रेदेवीयोसिन्यंत्रेप्रपूजकः अथवक्ष्येचशाक्तानांसा
मान्यंयंत्रमुत्तमं यत्रापराजितापुष्पेणवापुष्पंचविद्यते
करवीरेरक्तशुक्लेद्रोणेवायंत्रराजके तत्रदेवीवसेन्नित्यंत
यंत्रेचंडिकार्चनं पद्मोरालोकनेनस्यात्तथाऊर्याम्यत्नतः
यदिदेवासम्मुखेरेखालिखनंविद्यतेक्वचित् देव्यंगतिनिरेखा
नक्रियतेपापबुद्धिना उत्तराशामुखोभूत्वायदाचक्रंसमुद्धरेत्
उत्तराशातदासापिपूर्वाशैवनसंशयः ईशकोणात्तदेवस्या
दाग्नेयंचनसंशयः पश्चिमाशामुखोमंत्रीयथाचक्रंसमुद्धरे
त् पश्चिमाशातदाज्ञेयापूर्वाशैवनसंशयः वायुकोणात्
दाग्नेयंईशानंरात्संभवेत् दक्षिणाभिमुखोमंत्रीयदाच
क्रंसमुद्धरेत् पूर्वाशैवतदासादिक्कतःकोणात्तुवह्निकं पूर्वा
शाभिमुखोभूत्वायदाचक्रंसमुद्धरेत् पूर्वाशापितदाज्ञेया
पूर्वाशैवनसंशयः आग्नेयंचतथाग्नेयंईशकोणंचईशकं
यदाशाभिमुखोमंत्रीपूजयेच्चंडिकांशुभां पूर्वाशैवचवि
ज्ञेयासाधकेनमहात्मना देवीपश्चात्प्रतीचीस्यात्प्राचीतुचंडि
काग्रः अन्येषांचैवदेवानांविधिश्चात्रप्रकथ्यते पूज्यपूजक
रेतः पूर्वाशैवनिगद्यते लिखित्वाभुवतोयंत्रंस्थापयेद्दास
नोपरि सीसकेकांस्यपात्रेवारंगेवासाधकोत्तमः फलका

कौ यंपटे भिन्नो स्थापयेन्न कदाचन स्थापितं यदि लोभेन मोहेना
ज्ञानतोपिवा कुलं विनश्यत्यं च निर्मूलं याति सर्वथा पुष्पं तत्र
व. विनिक्षिप्य गंधचन्दनसंयुतं अशून्यं स्थापयेच्चक्रं शून्ये विघ्नस
१९ मो भवेत् स्वकल्पोक्तविधानेन देवीं ध्यात्वा तु साधकः आत्मा
16 भेदेन संभाव्य पुष्पं दद्यात्तु सुधीरिति इति श्रीज्ञानानन्दपरमहंस
विरचिते कौलावलीनिर्णये तृतीयोल्लासः ३ ॥
अथ वक्ष्ये च मंत्राणां विधानं यत्र यद्भवेत् बालां त्रिपुरां दे
वीं श्यामां वाप्यथ भैरवीं कामेश्वरीं च कामाख्यां पूजयेद्वय
थेच्छया दक्षिणाद्वा मभावाद्वा सर्वथा सिद्धिमाप्नुयात्
महामायां शारदां च शैलपुत्रीं तथाम्बिकां यथा तथा प्रका
रेण वा मदक्षिणतो यजेत् श्मशानभैरवीं कालीं उग्रतारां
च पंचमीं उच्छिष्टभैरवीं चैव तारां त्रिपुरसुन्दरीं उन्मुखीं चै
व दुर्गां च मर्दिनीं स्वप्नबोधिनीं एतास्तु वामभावेन पूजयेद्द
क्षिणां तां विना सिद्धिर्न जायते ददात्तत्जपयज्ञे यदि वामा
र्चने सर्वसमृद्धिः स्याद्देव्याः प्रियतरो भवेत् दक्षिणेन तु भेदा
पं स्मृते नरकमाप्नुयात् ब्रह्मापि च भवेद्वामो विष्णुश्चैव सदा
शिवः विघ्नेशश्च वामिका मूर्तिर्नारसिंहस्तथा यो भवेत् सत्व
र्त्रियां परमात्मनः मत्स्यमांसासवाभोगी लोलुपः स्त्रीषु
सर्वदा गणेशोपि च वेतालः कथितो वामनायकः ।

भैरवोपि भवेद्दामस्तथान्ये देवतादयः एतास्तु भावेन पूज
नीया विशेषतः अन्याश्च चंडिकादेव्या वालिकामूर्तयः स्मृ
ताः लक्ष्म्याद्या वामिकामूर्तीरक्ता च दशभैरवी वाग्भवे च स
रस्वत्या वालिकामूर्तिरीरिता वामभावेन सिद्धिः स्याद्दाति
रेपेन विना कदा पूजकोपि भवेद्दामस्तथैव सततं गुरुः
पत्तेषु मांसमीनेन मैथुनाद्यैर्विशेषतः महाभैरवरूपेणात
था च रतिसंगमे नान्यथा जायते सिद्धिर्मंत्राणां च सुनिश्चितं
अथातः संप्रवक्ष्यामि पंचतत्त्वविनिर्णयं अथ वक्ष्ये च पंचा
नां शोधनं तेन च वर्त्मना पंचमात्परं नास्ति शाक्तानां सुखमो
क्षयोः केवलैः पंचमैरेव सिद्धो भवति साधकः केवलेनाद्य
योगेन साधको भैरवो भवेत् द्वितीयेन च तत्त्वेन पूजको ब्रह्म
रूपभाक् केवलेन तृतीयेन महाभैरवतां व्रजेत् चतुर्थे
न तु तत्त्वेन भुवि पूजकनायकः परेण परतां याति शिवतु
ल्यः स साधकः पंचमेन भवेद्योगी सर्वसिद्धिपरायणः
यस्य भवेद्यदा नित्यं पंचतत्त्वस्य संभवः पंचतत्त्वे भवेद्वीरः
शिववन्द्यः स साधकः पंचमेन विना देवि पंचमी पूजयेत्तु
यः स तु स्याड्डाकिनीभोग्यो नारकी ब्रह्मघातकः अन्यमू
र्तैस्तु दुर्गायाः पंचमेन विना सदा निश्चितं नैव सिद्धिः स्याज्ज
पहोमार्चनतर्पणात् तद्विहीनस्य या पूजा जपं वा तर्पणं
पुनः रौरवाय भवेत्सर्वं तस्य भ्रष्टस्य निश्चितं चंडिकाद्य

कौ जयेद्यस्तु विना पंचमकारकैः चत्वारि तस्य नश्यंति आयुर्वि
व. द्यायशोधनं मकारपंचमं चैव देवताप्रीतिकारकं पंचमेन
१२ तु वीरेन्द्रः सर्वपापैः प्रमुच्यते मद्यं मांसं तथा मत्स्यं मुद्रा मैथु
नमेव च मकारपंचमं देवि देवताप्रीतिदायकं विना पंचो
पचारं हि देवीपूजां करोति यः योगिनानां भवेद्दस्यः पापं चै
व पदे पदे विना मांसेन मद्येन भैरवीसेवनं विना न मंत्र
सिद्धिमाप्नोति तस्माद्यत्नपरो भवेत् प्रमादाद्यदि लुप्येत
देवताशापमाप्नुयात् यथाविधि यजेद्देवीं मकारपंचकैः
सदा रक्षार्थं सर्वदेवानां तत्त्वज्ञानोद्भवाय च तेषां चलद
लां वदे शोधनं च क्रमेणात मद्यस्य ललितां वदे साधकानां
हिताय च सप्तकमात्रतुर्वर्गौः तीराज्यमधुपिष्टकैः चेता
यां पूजिता देवि पूतेन सर्वजातिभिः मधुभिः सर्ववर्गौश्च
पूजिता द्वापरे युगे पूजनीया कलौ देवी केवलैरासवैश्च तैः
चतुर्युगेषु संपूज्या त्वरीयैः सर्वैः सदा तत्र नानाविधं द्रव्यं
कथ्यते तंत्रवर्त्मना वार्क्षं गौडं तथा पैष्टं तेषां फलसमुद्भ
वं सर्वोत्कृष्टं तु विज्ञेयं द्रव्यमन्नेन संभवं अथवा पत्रपु
ष्पांकुरफलं मूलवल्कलपात्रजं रसं छतलताजातमेवं
वं दशविधं स्मृतं पानसंज्ञातमाध्वीकं खार्जूरं तालमैक्षवं
माध्वीकमासवं श्रेष्ठं मैरेयं नारिकेलजं प्रालेयकादशै
तानि भुक्तिमुक्तिकराणि च द्वादशं तु सुराद्रव्यं सर्वेषामु

नमोऽस्तु मे मधुपुष्परसोद्भूतमासवं तण्डुलोद्भवं सर्वसिद्धिक

रीपैष्टी गौडीभोगप्रदायिनी माध्वीमुक्तिकरी प्रोक्ता खार्जूरी

विघ्ननाशिनी नारिकेलाद्भवा श्रीदा पेद्व्रवं सुखवर्द्धनं अन्यथा

पि गौडीपिष्टकजाततालतरुजाद्राक्षीच माध्वी तथा खा

र्जूरी नवनारिकेलतरुजा (जानिता) गौडीच भोगप्रदा पैष्टी

सिद्धिकरी विपद्दलनी तालीच द्राक्षी शुभा प्रज्ञा (आद्या

श्रा विहिता सदा शुभकरी मोदप्रदाः सात्त्विकाः अपक्वैश्च सु

पक्वैश्च द्रव्यैरमृतसन्निभैः तर्पयेत् परमेशान्याः सर्वकामफ

लप्रदं आत्मस्थाने मत्स्यं देहस्य शुद्धिं च पंचमी यावन्न कुरु

ते मंत्री तावद्देवार्चनं कुतः असंस्कृतं यजेद्द्रव्यं बलात्कारेण

मैथुनं स्वप्रियेणाहृतं मांसं रौरवं नरकं व्रजेत् संशोध्य नम

नाचर्यस्त्री शुभमद्यं तु साधकः हानेपि सिद्धिहानिः स्यात् क्रुद्धा

भवति चण्डिका तस्मात्संशोधयेद्वक्ष्ये यथा तंत्रानुसारतः

वामभागे च षट्कोणं तन्मध्ये त्र्यस्रमध्यकं तद्बाह्ये मंडलं कु

र्याच्चतुरस्रं समालिखेत् सामान्यार्घ्यजलेनैव प्रोक्षयेन्मंड

लं ततः अभ्यर्च्याधारशक्तिं च कुंभस्याधारमास्तरेत् तत्र

संपूज्य वह्निमंडलं तदनन्तरं तत्र संस्थापयेत्कुंभं सौवर्णं

राजतं तथा ताम्रं भूमिमयं वापि यद्वा लोहविवर्जितं

सौवर्णं भोगदं प्रोक्तं राजतं मोक्षदं भवेत् कांस्यं शांति

करं चैव स्तम्भनं पुष्टिदं तथा पंचाशदंगुलायामं उन्नतं

कौ षोडशांगुलः कलशानां प्रमाणं तु मुखमष्टांगुलः भवेत् पश्चा
व देकतमं कुंभं अक्षेणाक्षालितं ततः आधारे स्थापयित्वा त
१८ पूजयेत्कलशमंडले ततश्चकारवर्णादिकैः पूरयेन्मूलमुच्चरन्
भूषयेद्रक्तपुष्पेण रक्तमाल्येन साधकः रक्तवस्त्रेण संवे·
18 ष्टयेल्लेपयेद्रक्तचन्दनैः सोममंडलमभ्यर्च्य अमृतं परिभा
व्य च विभावयेत्ततो द्रव्यमिष्टदेवस्वरूपकं प्रणमेद्भक्ति
भावेन मुद्राभिः पंचसंज्ञकैः अधोमुखौ समीकृत्वा भूमौ पा
णितलद्वयं सकलांगुलिभिः सम्यङ्मुद्रेयं चतुरस्त्रिका अ
यकंदं (अधोमुखं) मुष्टियुग्मं संपुटं परिकीर्तितं अन्यो
न्याभिमुखौ हस्तौ पुटाकारेणाकारेण कारयेत् संपुटा
ख्या महामुद्रा योजिता नातिकर्मणि एतस्याः एव मुद्रायाः
कनिष्ठामूलदेशके अंगुष्ठौ च निपेतत् संपुटांजलिरीरिता
मध्यमे सरले कृत्वा तर्जन्युपरि संस्थिते अनामिकामध्यग
ते तथैव हि कनिष्ठके सर्वा एकत्र संयोज्य अंगुष्ठपरिपीडिता
पश्चात् परमा मुद्रा योनिमुद्रा प्रकीर्तिता ह्रां नमश्चतुरस्रं
स्यात् ह्रीं नमः संपुटस्तथा ह्रौं नमः संपुटं ज्ञेयं ह्रैं नमः संपुटां
जलिः हः नमो योनिमुद्रा स्यात्पंचमुद्राः प्रकीर्तिताः भक्त्या वि
लोकयेद्द्रव्यं मूलमंत्रं समुच्चरन् अमृतार्णवं वरुणं सेन्दु वामदेवं च
ङे·युतं वौषडंतमनुं चार्घ्यं पूजयेत्तु यजनमं विषं कूर्चं ततः
पशुपतये तदनंतरं अस्त्रायवर्मबीजं च फटकारांतः परोम

उः अनेनादौ प्रयत्नेनैव पथिकस्य बलिं हरेत् त्रिकोणाद्युत्तरे
गेहं लिखेत्कुंभसमीपतः सिन्दूरकुंकुमाभ्यां च सर्वपथि
कदेवताः तत्र संपूजयित्वा च बलिं दद्यात्ततः परं सहेतं
सामिषान्नं च निधाय मन्त्रमुद्धरेत् मायां लक्ष्मीं समुद्धृत्य स
र्वपाथिकदेवताभ्यो हूं मन्त्रं समुच्चार्य अनेनोत्सृज्य साध
कः उद्धृत्य वामहस्तेन भ्रामयेत्कलशोपरि ततः क्षिप्त्वा ब
हिः स्थाने मूलमंत्रं समुच्चरन् धूपयित्वा ततो द्रव्यं विकारान्ना
शयेत्ततः मायां लक्ष्मीं पञ्चहं हं संतु दीर्घं हृदयान्वितं छुरि
काभेति योभिनि विकारान्सचान्तरं द्रव्यस्य हरं पुनश्च
हिठान्तं प्रजपेन्मन्त्रं विकारहारिणीं जप्त्वा च तद्दोषशोधनं
चरेत् अस्त्रेण ताडनं कुर्याद्धर्मेण अभ्युक्षणं ततः मूले
नवीक्षणं कृत्वा प्रोक्षयेत्तु मूलेन गंधमादाय वहृन्ना
साधकः त्रियाद्द्व्यमध्ये लिखेद्योनिं तन्मध्ये च ह्सौः लिखेत्
ह्सौः स्हौः नामान्तेन पूजयेत्कुंभमध्यके वाग्भुमायाकम
लाघोत्काथ्रानन्देश्वराय विद्महे सुधादेव्यै धीमहीति त
न्नोर्द्धनारीश्वरेति च प्रचोदयादिति जपेद्गायत्रीं दशधा
सुधीः मायावल्किपुतं कामं रतिबिन्दुसमन्वितं परमस्वा
मिनिपदं परमाकाशशून्यं च वाहिनि चन्द्रतः यांते सूर्या
ग्निभक्षिणीमपि पात्रं विशपादांते त्वविशस्वाहा ततः
परं त्रियाच प्रजपेन्मन्त्रं ब्रह्मशापं विमोचयेत् वेदादि

कौ वरुणं बीजं उदीर्घस्वरभेदितं ब्रह्मशापपदस्यान्ते विमोचितां
व. चङेयुतां सुधादेव्यै नमोन्तं च दशधा प्रजपेन्मन्त्रं मायां लक्ष्मी
५८ (कदं) मदं सेन्दुं षड्दीर्घस्वरवत्किमत् सुधाकृष्णास्वरूपान्ते
शापं मोचयतत्परं अमृतं स्रावय ह्रं ह्रं हिठां तेमन्त्रमनवं द
19 शधा परिसंजप्य कृष्णाशापविमुक्तये विषं विन्दुयुतं वान्ते
दीर्घषट्कसमन्वितं शुक्रशापपदं प्रोच्य विमोचितां ङेयुतां
सुधादेव्यै हृदन्तं च दशधा संजपेन्मन्त्रं अथवान्यप्रकारेण
शुक्रशापं विमोचयेत् मायां कामे खं वीवां चं अमृते अमृतो
द्भवे अमृतवर्षिणि प्रोक्ता कामबीजं ततो मृतं स्रावय हि
तयं शक्तिबीजं भार्गवमुद्धरेत् शापं च मोचय प्रोक्ता (
स्रायनं च) मपीनां वततो वदेत् सिद्धिसामर्थ्य भा
सयदद्युग्मं महापदं खेचरीपदतो युग्मं तथा प्रकटयद्व
यं अस्त्राय फट् द्विठं तं च अष्टम दशधा जपेत् अथवान्यं
प्रवक्ष्यामि शापत्रयविमोचनं सुराणाममृतं पूर्वं वलभ
देन धीमता समानीतां प्रयत्नेन पानार्थं वारुणी सुरा
दत्तात्रेयेण मुनिना शुक्रेण च महात्मना धीमता वलभ
द्रेण पुरा पीतो स्थितार्णवात् वारत्रयं तु संजप्य पठेदमृ
तं मन्त्रं शिवशक्तियुतां वाणीं वरुणं दितिसंयुतं षड्
दीर्घस्वरसंभिन्नं नादविन्दुविभूषितं अमृते अमृतोद्भवे
अमृतवर्षिणीति च सुरा शुक्रशापं मोचय मोचय हि तये तत :

अमृतं त्ववाय हंहं स्वाहा शापपरो मनुः दशाधा परिसंजप्यशा
पत्रयं विमोचयेत् त्रिशापमोचनीं जप्त्वा प्रकाशशुक्लांततो ज
पेत् मायालक्ष्मीं ततो वाचं अमृते अमृतोद्भवे अमृतवर्षिणी
मोच्य महाप्रकाशशुक्लेपि च द्विठांते च समुच्चार्य ऽमृतेत्व
ङ्गिकां ततः प्रेतबीजं समुच्चार्य हसक्ष्रौं हसरीं तथा हसख
फ्रें च हसरौं भगवति ततो वदेत् अनुग्रहो (अनुगेह) (पाठ)
हसमानेऽङ्गिके पि ततः परं हसखफ्रें युगं प्रच्यसत्रोरेवत
तो वदेत् यो रे खमां च खसभ्री च किल द्वय समन्वितं विच्चे
पि हसखवां नं च हसखह्रैं च हसरीं शिवशक्तिद्वयांते च माया
हसरैं ततो वदेत् अनेन मन्त्रराजेन अमृतं परिचिंतयेत्
तिरस्करिणीं ततो ध्यायेत् सदा पशुविनाशिनीं नीलं हयं
समधिरूढा शुरः प्रयांती नीलांशुकाभरणमाल्यविलेप
नाढ्यां निद्रापुटेन भुवनानि तिरोदधाना खड्गायुधा भग
वती परिपातु भक्तान् एवं ध्यात्वा जपेद्विद्यां द्वयं च साधको
नमः मायालक्ष्मी समुद्भूत नमो भगवतीति च माहेश्वरि प
दस्यांते सर्वपशुजनोद्भवेत् मनश्चक्षुस्तिरस्करिणी ऊरु
द्वंद्वं च द्वयं अन्यतिरस्करिणीं वदेत् मायां कामेश्वरीं ततः
वाग्ग्लैं तिरस्करिणी सकलेति जने तिच वाग्वादिनि पद
स्यांते सकलपशुचक्षुतान् जनांते च मनश्चक्षुःश्रोत्रजिह्वा
पदं ततः घ्राणोक्तिच तिरस्कांते रिणी ऊरुद्वयं ततः

कौ दहयंचसर्गयुतंहिंवांतोयंमहामनुः त्रिधाजप्त्वाचवीरेन्द्रस्त्रि
व॰ कोणोचिन्तयेततः
१॰ अकथादित्रिपंक्त्यातुहलंतंमध्यसंस्थितं इतिसंचिन्त्यतत्त्व
स्याहुत्यसुहिंसमाचरेत् अथवान्यप्रकारेणाहुत्यसुहिंसमा
20 चरेत् ॐहसः‌शुचिसहसुरंतरीतसहोतावेदिसदतिथिर्दु
रोणसत् नृशाहरसत्समहतोतिसह्योमसदब्जागोजाऋत
जाअद्रिजाऋतंबृहत् पैं त्वमोइवसिद्धोभवसर्वज्ञोभव
सर्वजनकोइवायअमृताय अमृतनाथाय अमृतकुलकुंभाय
पैं फैंचलचलपिवपिवकुलकुंडलिनि अमृतकुंडलिनि अम
तेद्रवद्रवनिर्फरनिर्फर पैंहींकुलकुंडलिनि अमृतेकुरुकुरु
स्वाहा प्रथमंप्रणवंहंसः शुचीतितदनंतरं सद्वसुरन्तरीते
तिसहोतावेदिसेत्यथ दतिथिर्दुरोणसदित्यर्द्धमस्याऋचो
भवेत् नृषहरसदित्यन्कामसहतोतीत्यनंतरं सद्योमसदब्
जागोजाऋतजाअद्रिजा ऋतंबृहदित्यर्द्धंचअस्याऋचउदा
हृतं त्रिधावसंजपेन्मंत्रमथवान्यतमंजपेत् वाक्बीजमोइ
वस्यांतेसिद्धोइवततःपरं सर्वज्ञोइवसर्वांतेजनकोइव
डे॰युतं अमृतायम्टतंप्रोक्तानाथायपदतोमृत कुलकुंभा
यवाग्भवंफैंततश्चलयुग्मकं पिवद्वंद्वकुलंप्रोक्ताकुंडली
नीततोवदेत् अमृतपदतःकुंडलिनीतिअमृतेद्रव द्वयंनि
र्फरयुग्मंचवाग्भवंभवनेश्वरी कुलकुंडलिनीप्रोक्ताअमृते

ऊरुयुग्मके स्थितं तं मन्त्रमुच्चार्य पाययित्वा चकुंडलीं शिव
शक्तिसमायोगं चिंतयित्वा च साधकः तस्मात्तथा समुत्थाप्य
हृदयेत्पादमुन्नमं अनेनैव विधानेन द्रव्यशुद्धिं समाचरेत्
कालिकाया विशेषं च वक्ष्ये हं तेन वर्त्मना एकमेव परं ब्रह्म
स्थूलसूक्ष्ममयं ध्रुवं कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्य
हं सूर्यमंडलसंभूते वरुणालयसंभवे अमाबीजमये दे
वि शुक्रशापाद्विमुच्यतां वेदानां प्रणवो बीजं ब्रह्मानन्द
मयं यदि तेन सत्येन ते देवि ब्रह्महत्यां व्यपोहतु एवं मंत्र
येणैव अभिमंत्र्य सुरां शुभां प्रदद्यात्कालीकायै च ततो नैवे
द्यमुत्प्रभवेत् इति शुद्धिमयं त्रैयं शापानां मोचनात्परं एषा
मेकतमं कृत्वा ध्यायेदानन्दभैरवं सूर्यकोटिप्रतीकाशं
तेजकोटिसुशीतलं अष्टादशभुजं देवं पंचवक्त्रं त्रिलोचनं
अमृतार्णवमध्यस्थं ब्रह्मपद्मोपरिस्थितं वृषारूढं नील
कंठं सर्वाभरणभूषितं कपालखट्वांगधरं घंटाडमरुवा
दिनं पाशांकुशधरं देवं गदामुसलधारिणं खड्गखेट
कपट्टीशं मुद्गरं शूलदंडधृक् विस्कं मुंडहस्तं च वरदाभय
विग्रहं लोहितं देवदेवं शंखमध्ये नियोजयेत् तस्योत्सं
गे स्थितां देवीं चंद्रकोट्ययुतप्रभां हिमकुन्देन्दुधवलां पंच
वक्त्रां त्रिलोचनां भुजाष्टदशसंयुक्तां सर्वायुधकरोद्यतां
महसंतीं विशालाक्षीं देवदेवस्य संमुखीं अथवान्यप्र

कौ कारेणस्तथा देवीं च चिन्तयेत् चंद्रांशुसदृशीं श्वेतां वारुणीं
तृपिरणीं शिरश्चंद्राद्विगलंतीं ध्यात्वा च परदेवतां एवंध्या
२१ त्वा ततो वीरः पूजयेन्मंत्रमुच्चरन् आनन्दभैरवं देवमानन्द
21 भैरवीं तथा शिवचन्द्राघवर्णाग्निकालध्रुवरुणानलं
षष्ठस्वरान्वितं वायुं बिन्दुनादविभूषितं आनन्दभैरवाये
ति शिखामंत्रं ततो वदेत् ततः पूर्ववद्धृत्य विपरीतमु
रवं हृदयं वायुबीजं वामनेत्रमानन्दभैरवीं ततः ङे.युतां नेत्र
मंत्रं च कथितो मनुसत्तमः पूजयित्वा द्वयमर्घ्यं च रुणं च
स्वधां जपेत् मूलं चोपरि संजप्य अमृतं परिभावयेत्
आवाहन्यादिमुद्रां च दर्शयेत्तदनंतरं आवाहनीं दर्शयि
त्वा स्थापनीं तदनंतरं सन्निधापनमंत्रं च तथा च सन्निरो
धनं अवगुंठनमुद्रां च विधाय साधकोत्तमः धेनुषट्कमु
द्रां च तालत्रयमतः परं दिग्बन्धनं प्रकुर्वीत छोटिका
भिरनंतरं परमीकरणं कृत्वा अमृतीकरणं चरेत् येन मु
द्रास्तीकृत्य द्रव्यशुद्धिं समाचरेत् आलोकाजिघ्रणा
स्वादनान्नाद्द्रव्यं विशुद्धति इदमस्यानंततः कुर्याद्देवेश
त्वा च कुलकं द्रव्यमकुलकं रक्तकरेक्षतान्तु साधकः वाम
नासापुटयोगात्पूजाद्रव्येषु निक्षिपेत् बिन्दुं तिस्रास्ववक्त्रे
च मार्जयेद्धस्तयुग्मकं हस्ताभ्यां मार्जयेद्देहं मूलमंत्रं समु
च्चरन् एतत्कारणं दिव्यं सुरसंघनिषेवितं अतएवना

मतस्यस्तुरेतिभुवनत्रये इतिज्ञानानन्दपरमहंसविरचि
तेकौलावलीनिर्णये ४ उल्लासः ॥
अथातः संवक्ष्यामि मांसानि तंत्रवर्त्मना मांसंचत्रिविधंप्रो
क्तंजलभूचरखेचरं गोनरेभाश्वमहिषवराहाजमृगोद्भवं
महामांसाष्टकंप्रोक्तंदेवताप्रीतिकारकं गोजेभाश्ववरा
हाणां माहिषंमृगखड्गयोः एतन्मांसाष्टकंप्रोक्तंचंडि
काप्रीतिकारकं अथवा अजाश्वावपिगंडाचमहिषश्च
मरीनथा वराहव्याघ्रभल्लुकशशकाः कूर्मकुक्कुटौ कू
षणसारसहरिणास्तथा विहङ्गमानपि मत्स्यांगवय
श्चैवशाल्लकीचविशेषतः हंसः पारावतश्चैवतथैवग्रा
मकुक्कुटाः विहिताबलयः प्रोक्ताश्चंडिकाप्रीतिकारकाः
एतेषांमांसदानेनसर्वसिद्धिः प्रजायते अथवा गोजेभाश्व
वराहाणांमाहिषंमृगखड्गयोः एतन्मांसाष्टकंतेयंचंडी
काप्रीतिकारकं यथामेकतमेतज्ञ्यातपराणार्थेप्रकल्पये
त् मांससन्दर्शनेनापिसुरासन्दर्शनवत्फलं पितृदेव
तयत्तेषुवेदेहिंसाविधीयते अन्यार्थंप्राणिनांहिंसाक
दाचिन्नोदितासदा अनिमित्तंतृणंवापिछेदयेन्नकदाच
न देवतार्थंद्विजंगांवाहत्वापापैःनलिप्यते मांसंविनापि
पूजायांपापंस्यात्पदेपदे गंधपुष्पादिनैःपूजामन्यथान
रकंव्रजेत् हत्वामंत्रेणचानेनअभिमंत्र्यपशुंततः ॥

कौ शिवोत्पन्नमिदं पिंडमतस्त्वं शिवतां गतः तद्रुद्रस्त्वं पशो त्वं हि
नाशिवस्त्वं शिवोसि हि ब्रह्मासात्मलतस्यांते विष्णुश्चेंद्रस्तत
२२ दुर्गौ परमात्मा तदानन्द सत्यमेतन्नतः सुधीः इति हत्वा पशुंप
श्चाद्वारुपक्वं समाचरेत् पूजास्त्वग्रासमांसानि दद्याद्देसाध
कः क्वचित् ऋतेतल्लोहितं शीर्षमस्तं तन्तु जायते संशोध
येन्मांसानि यथाशास्त्रप्रमाणतः मांसशुद्धिं प्रवक्ष्यामि
शाक्तानां सिद्धिहेतवे अस्त्रांतमूलमंत्रेण प्रोक्षयित्वा तु साध
कः चतुर्धा शोधनं ज्योत्स्वविर्केनतु वर्त्मना शोधयेद्वायुबी
जेन वह्निबीजेन संदहेत् शिवशक्तिसमायोगाद्वारुणेनामृ
तं कुरु ततश्च संजपेन्मंत्रं मांसानां शोधनाय च प्रणवं पूर्व
मुच्चार्य प्रतद्विष्णुस्ततः परं तदेति तिस्रगाभीमः संप्रोच्य कु
वेदो भवेत् गारिष्ठति च यस्मोरुशुविष्णुर्मोक्षस्ततः परं विक्र
माणेषु पितिर्यति भुवनानि विश्वेति पूर्वोक्तादर्शयेन्मुद्रा
श्चावाहन्यादि संज्ञकाः मूलमंत्रं जपेद्वीरः सप्तवारं ततः परं
मत्स्यानां शोधनं वक्ष्ये यथा तंत्रानुसारतः पाठीनश्च वोदाल
श्च तथा शकुलशालकौ महाशकुलचिंगीच खड्गीचजलवृ
श्चिकाः अनेन विहिता सर्वे पीनमीनाः शुभप्रदाः आदौ कु
वीनमीनं च पूर्ववत् शोधनादिकं जपेन्मंत्रं ततः पश्चान्मीनानां
च विशुद्धये त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं उर्वारुक
मिव बन्धनान्मृत्योर्मुक्षीय मामृतात् शेषं पूर्ववदाचरेन्मुद्रां

22

वपरिशोधयेत् श्वेतेयं मंडलाकारं चन्द्रबिम्बनिभं शुभं चारु
पक्वमनोहारि शर्कराद्यैः प्रपूरितं पूजाकाले देवतायामुद्दे
शापरिकीर्तिता अष्टधान्यादिकं यत्र वै राशीयं प्रकल्पयेत्
तस्याः संज्ञाकृता मुद्रा महामोदप्रवर्द्धिनी मुदं रातीति मुद्रा
स्याद्येनैका मुद्रिभेदतः मुद्रां च शोधयेद्दोषं पूर्ववदाचरे
त् गेतद्विष्णोः परमं पदं सदा पश्यंति सूरयः दिवीव चक्षुरा
ततं नहि भासो विपन्यवो जागृवांसः समिन्धते विष्णोर्यत्पर
मं पदं इति संजप्य वीरेन्द्रः शेषं पूर्ववदाचरेत् ॥
अथ वक्ष्ये च कुंडोत्थं देवताप्रीतिकारकं मद्यकुंभसहस्रैस्तु मां
सभारशतैरपि नैव तुष्टिर्भवेद्देव्याः कुंडगोलोद्भवं विना (भग
लिंगामृतं विना) भगलिंगात्मिका देवी भगलिंगामृतात्मि
का शुक्ररूपा च शुक्रस्य रजोरूपा रजः स्थिता बिन्दुरूपा च
बिन्दुस्या रजो बिन्दुस्वरूपिणी भगलिंगप्रिया देवी भगलिं
गामृतप्रिया भगलिंगामृतेनैव तस्मात्तां परिपूजयेत् वीरद्र
व्यस्य पानेन परस्त्रीरमणेन च भगलिंगामृतेनैव देवीं यस्तु
प्रपूजयेत् नरः स्वं जायते तस्य सिद्धमंत्रो भवेन्नरः कुलस्त्रीकु
लपुष्पैश्च कुलद्रव्यैः कुलामृतैः संपूज्य लभते कामानष्टसि
द्धिंस्तु साधकः विना कुंडोद्भवैः द्रव्यैः पूजयेद्यश्च चंडिकां
जन्मान्तरसहस्रस्य सुकृतं तस्य नश्यति द्रव्यशोधनमाचर्य
शक्तिशोधनमाचरेत् यथाद्रव्यं तथा शक्तिं समानीय यथा

कौ क्रमे स्थापितांप्रमदांदिव्यांहेतुयुक्तांवदीतितां स्वकांतां
२२ परकांतांस्वाहृतांलज्जाविवर्जितां सलंकारांसुवेषांचस्था
पयेत्तलिकोपरि न्यासंजालंप्रकुर्वीत स्वकल्पोक्तविधानत
23 मातृकान्यासमाचर्यकलान्यासंसमाचरेत् ह्रींकारस्तुलला
टेचक्लींकारंवदनेतथा ऐंकारंहृदयेचैवनाभौब्लूंकारमेवच
स्त्रींकारंविन्यसेद्गुह्ये पंचकामान्प्रसेद्बुधः ऋष्यादिकंस्वक
ल्पोक्तंपाद्यादिभिस्ततोयजेत् द्राविणीविन्यसेद्योन्यैमूलवि
द्यांततःपरं गाथारंहृदयेचैवभ्रुवोर्मध्येन्यसेत्क्रमात् पुनःमू
लंब्रह्मरंध्रेन्यसेत्साधकपुंगवः मूर्द्धादिपादपर्यंतंन्यासंकुर्या
ततःपरं मौलौकुंतलकर्षणंनयनयोराचुम्बनं गंडयोर्दंतो
नाधरपीडनंहृदिहतिंमुष्ट्याचनाभौशनैः कृत्वाकंठकपो
लमंडलकुचश्रोणीषुदेयानखाः सीमंतेलिखनंनखैरुरसि
जेगाढग्रहणंतथाफ्रंततः कुर्वीतविरतंमनोभवगृहेमातंग
लाङ्गवजंघांगुष्ठपदोरुगुल्फहननं चान्योन्यतःकामिनोः
मायाबीजंवामनेत्रंकामवरुणभूयुतं एकादशस्वरेणा
ढ्यंचंद्रबिंदुसमन्वितं ग्रभुक्लींद्रावयस्वाहाविन्यसेत्साध
कोत्तमः वामायाचपलविनैरतोस्यचहृदयंपठेत् वरुणंभृ
दतकर्णाग्रंतंचकामबीजकं सोमवधूसमायुक्तंचन्द्रमंत्य
स्वरान्वितं द्राविणीबीजंकथितंसाधकानांहितायच त
स्यायोन्यांन्यसेद्विद्यांततोमैथुनमाचरेत् आत्मनिचिंतयेद्दे

वीशक्तिमायास्वरूपिणी लिंगेनचर्षयेयोनिं मूलमुच्चार्य
साधकः धर्माधर्महविर्दीप्ते आत्माग्नौमनसास्रुचा सुषुम्ना
वर्त्मनानित्यमक्षवृत्तीर्जुहोम्यहं स्वाहान्तोयंमहामंत्रश्चारंभे
परिकीर्तितः ततोजपेत्स्वियंगच्छेत्सुखेजिह्वारतेपिबे
त् जलमर्घंसमानीयवारुणेनचसंस्कृतं वरुणंस्वरसंयु
क्तंपंचदीर्घसमन्वितं वौंवरुणायअमृतंवमंत्रराजेनशोधि
तं मुहुर्मुहुःपिबेत्तातेनशक्तिजिह्वाविलोडितं आत्मनिदेवी
संयोगाद्देवीभूतांविचिंतयेत् आत्मनिशक्तिसंयोगाद्देवी
भूतंविचिंतयेत् सत्स्वरूपकमात्मानंशक्तिंकुंडलिरूपिणीं
कुलाकुलविभागेनआत्मानंनीयतेतयपि सुद्दमंत्रोयथैनै
वयोनेःप्रमथनेचरेत् मथ्यमानेपुनस्तस्याजायतेतत्वमु
त्तमं तत्वत्यागेपठेन्मूलंसाधकःस्थिरमानसः प्रकाशा
काशहस्ताभ्यामवलंब्योन्मनीस्रुचा धर्माधर्मकलास्नेह
पूर्णमग्नौजुहोम्यहं स्वाहान्तोयंमहामंत्रस्तत्त्वत्यागेप्रकी
र्तितः शिवशक्तिसमायोगोयत्रयत्रप्रजायते तत्रतत्रैव
संयोज्यंहृदयमेनंयथाक्रमात् स्वकीयात्मप्रयत्नेनद्रव्यंकु
ण्डोद्भवंस्मृतं इदंकुंडोद्भवंद्रव्यंकथितंसुदुर्लभं ॥
गोलोद्भवंप्रवक्ष्यामिवीराणांसिद्धिहेतवे कुलीनांदीक्षितां
भर्तापतिहीनांविचक्षणां सालंकारांहेतुकामनयन्यां
मनोरमां सुन्दरींशोभनांवीरांपीनोन्नतपयोधरां साध

कौ

व

२८ काकोतहृदयां कलाशास्त्रविचारिणीं न्मासादिकंप्रङ्
वीन स्वकल्पोक्तविधानतः पूर्वोक्तक्रमयोगेन तत्त्वमुत्पा
दयेत्सुधीः तत्त्वं प्रगल्भयत्नेन पूजार्थं साधकोत्तमः
इदंगोलोद्भवं कुंडं देवतात्मिकारकं ताम्रपात्रे गटही
त्वातु तत्र इदं कुंडगोलोवितं नानागंधसमायुक्तं कटुत्रयस
मन्वितं ॐ इंगोलोद्भवादीनां शोधनं च प्रवक्ष्यते शोधये
त्कुंडगोलादीन् यत्नाद्वा समाहितः ॐ विष्णुः योनिं कल्प
तत्वष्टा रूपाणि पिंषतु आसिंचतु प्रजापतिः धाता गर्भं
दधातु ते गर्भं धेहि सिनीवालि गर्भं देहि सरस्वति गर्भं
ते आश्विनौ देवावाधत्तां पुष्करस्रजौ स्त्रुं स्त्रुं स्त्रुं ततः सा
हा प्रस्तनो लितनोवदेत् प्रस्तने प्रस्तनोऽद्वे प्रस्तनवर्षि
रणीति च प्रस्तनं स्त्रावयस्तात्र हिरुद्रायेत्यपि संस्मरेत्
शेषं पूर्ववदाचर्य प्रथवान्यतमं चरेत् तारं स्वाहा सुस्वार्थ
शिवादित्रयविद्युक्त वह्निजाया तारमाया श्रीबीजं स्तुर
तिप्रिये तारमायारमास्वं च वह्निजायां च वर्द्धलं ततोऽस्तो
द्रवायेति प्रस्तनवर्षिणीतमस्ते प्रिये देवि पदं शुक्रशाप
मोचययुग्मकं प्रस्तनं स्त्रावय हंहं मस्तं तं युग्मकं व
क्लिजायें तमंत्रेणाद्य (शुक्र) शुद्धिं समाचरेत् वीर्यमेतत्त
मादाय विशेषार्घ्ये नियोजयेत् तेनास्तेन देवेशीं तर्प
येत्साधकोत्तमः सान्निध्यं जायते देव्याः सर्वकामसुपाल

२४

भेत् अविरात्सर्वमाप्नोति हि दृष्ट्वा नराधमः निर्विकल्पक
चेतास्तु कुर्याद्देवं समाहितः शंकया जायते हानिः शंकया दुः
खभाजनं शंकया सर्वहानिः स्याच्छंकया धनहानिता शंक
या सिद्धिहानिः स्यात्तस्माच्छंकां परित्यजेत् अथ वक्ष्यामि द्र
व्याणां शक्तिभेदेन यद्भवेत् स्वल्पांगी दीर्घकेशी च साधकः
शुद्धभावतः पुष्पगंधा जवापुष्पैर्देवीं गंधैश्च पूजयेत् तस्याः
पुष्पैः प्रयत्नेन सर्वकाममुपालभेत् १ दीर्घांगी दीर्घनयना
श्यामा विलज्जिता सदा सुगंधा सा स्वरन्ताधे विल्वपत्रैः सुगं
न्धिना तस्याः पुष्पैः प्रयत्नेन देवीं संपूजयेत्परां २ गौरांगी पु
ष्टनेत्रा या पुष्टहस्ता मदातुरा मदगंधा च खाद्यैः पलाशैः
कुसुमैर्यजेत् ३ पुष्पगंधा न गहात्री सा सदा कृष्णरूपिणी
कृशांगी कृशमध्या च मधुदग्धां यजेत्परां ४ स्थूलांगी च
सदा कृष्णा दीर्घकेशी मदाकुला तीव्रगंधा च मन्दारैर्नारि
केलोद्भवैः सदा ५ पुष्टा खर्वा सितांगी या सा भवेन्मदनाश्र
या मधुगंधा च गौरीभिः पद्मपुष्पैर्यजेत्परां ६ कृशांगी
गौरदीर्घा या सा परा शिशुमालिनी साधकः पूजयेद्देवीं
मल्लिकाभिर्विशेषतः पुष्टा खर्वा सितांगी या सेन्दीवरवि
कारकैः अस्या मैथुनसंभूतैः केतकीगंधयोजितैः ८
दीर्घा दीर्घा च गौरांगी मालतीगंधयोजिता सा भवेदंकुशा
(दतिरणा) नाम्नी तस्या मैथुनभावकैः ९ बंधूकैर्यदि

कौ गौरांगीयानंगमेखलाम्नुभा कर्पूरगंधह्लारिद्रद्रव्यैस्तान्प्रपूः
२५ पूजयेत् ९ आसांद्रव्यंगृहीत्वातुतैनैवपरिशोधयेत् तत्र
स्नुष्यैः प्रपूज्यैव सर्वसिद्धिमुपालभेत् ज्ञात्वानैवंक्रमं योहि
25 यदिदेवीं प्रपूजयेत् भवेद्धि विफलंसर्वंयज्ञेषुहुतवर्जितं
षडक्षादशमीशक्तिः संकीर्णाहूतिसंस्थिता गंधमात्रेतु
गृह्णीयाद्धरणीमात्रेनभेदयेत् स्वयंस्रष्टास्वयंविष्णुःस्वयंदे
वोमहेश्वरः साधकानन्दभावेनयजेद्देवींकुलक्रमे गजाश्वा
नांद्विजातीनांनराणांशोणितात्मनः उड्डगोलोद्भवैर्मांसैः
स्वयंभूकुसुमैःसदा मत्स्यै(रसैः)र्मधैश्चनैवेद्यैःप्रत्यक्षीकृ
यतेनरैः मदिरायांमैथुनेचजातिभेदंनचाचरेत् (जातिमा
वेनचिंतयेत्) नाधर्मोजायतेकिंचिन्महामंत्रस्यसाधने
सर्वसिद्धिर्भवत्येवपंचतत्त्वनिवेदनात् द्रव्यशुद्धेरभावेन
नित्यंकर्मनलोपयेत् प्रमादाद्यदिलुप्येतरौरवंनरकंव्र
जेत् मकारपंचकंत्यक्त्वापुनःजन्मनविद्यते अतएवमहा
प्राज्ञःपंचतत्त्वेनपूजयेत् येनावश्यंविधातव्यंमदिरादान
पूजनं नष्टैःपर्युषितोच्छिष्टैर्दुर्गंधैर्गन्धवर्जितैः द्रव्यैभि
परपात्रस्थैस्तर्पणंनिष्फलंभवेत् आमिषासवसौरभ्यहीनं
नंयस्यमुखंभवेत् प्रायश्चित्तीसवर्ज्यश्चपशुरेवनसंशयः
यावदासवगंधःस्यात्तावत्पशुपतिःस्वयं विनालिमांसग
न्धेनपशुःपशुपतिःस्वयं मत्स्यमांसविहीनेन(मद्येन)

द्रव्येणापिनतर्पयेत् नकुर्यान्मत्स्यमांसाभ्यांविनाद्रव्येण
तर्पणं पिशितंतिलमात्रंतुनिलार्द्धमपिविन्दुना महत्त
र्पणमात्रेणायुतकोटिफलंलभेत् रक्तवस्त्रैःसमाच्छाद्य
पंचतत्त्वंतुरक्षयेत् मकारपंचकैर्देवीनार्चयेत्पशुसन्निधौ
संस्थापयेन्नदद्याच्चद्रव्यशुद्धिरितीरिता एतत्तुकथितंद्रव्यं
सर्वसिद्धिप्रदायकं द्विजानामत्रकल्पंतुतत्समानाच्चविकल्पि
नां अथातःसंप्रवक्ष्यामिद्रव्यादिपरिकल्पनं अलाभेनास्त्र
पात्रेतु अथवानाम्रपात्रेपुरगव्यंदद्यात्कृतंविना नारिकेलोदकं
कांस्येगुडार्द्रकंतथैवच गौडीदद्यात्त्रियेणमाध्वीवस्रपेन
तत्रैवसर्वशूद्रेणदातव्यंयत्नवान्तुविर्भवेत् अथवा।
मत्स्यमांसाविजयाचाष्टगंधैःसुमिश्रिता संमर्घवटिकांकृ
त्वासंदद्याद्यविचक्षणः तदभावेतुवटिकांजलेसंलोड्यत
र्पयेत् गुडमिश्रेणतक्रेणतर्पयेत्सुप्रयोजितं सौवीरेणाथ
वाकुर्यात्पतत्कर्मनलोपयेत् मांसाभावेतुलशुनमार्द्रकं
नागरंतुवा शूरणंमांसवटकंमूलंवान्यतमंचरेत् मांसा
नुकल्पंकथितंमीनस्याथविधिंशृणु माहिषंगवयंतीरं
भ्रजातीरंतथैवच फलमूलेचयत्किंचिद्गंधवेदामिषंभवेत्
मीनस्यकथितंकल्पंअण्डगोलोद्भवंशृणु अपराजुष्पगर्भे
तुकुलस्थानेमनोरमं सर्वसत्त्वंभवेत्तत्तुमहाकामकलात्म
कं हयारिजसुमेनित्यंस्वयमास्तिसदाशिवः तन्मुखेद्रव्य

कौ मादाय पुष्पमध्ये तु चन्दनं रक्तकुंकुमरागाद्याभिन्नं तत्त्वं शिवा
२८ त्मकं योजयेद्धि वशान्त्या स्वपेकं संभावयन्धिया तत्तांवि
विंत्यतश्चैव विचिंत्य परमेश्वरीं जप्यात देवकुंडे स्थं द्रव्यं पर
28 मंडलेभं अंतरादधिकं ज्ञेयं पतद्रव्यं मंडलेभं यद्यच्च काथि
तं द्रव्यमनुकल्पं विकल्पिनां आदाय पूजयेद्देवीमन्यथानि
ष्फलं भवेत् अहत्वा पंच मे पूजां न लब्ध्वा गुरुसंमतिं स्वद
त्तेन पशुं दत्वा रौरवं नरकं व्रजेत् इति कौलावलीये पंचमः ५
अथेदानीं प्रवक्ष्यामि अर्घ्यस्य विधिमुत्तमं गृहीत्वा तां महा
देव्या विशेषार्घ्यं समाचरेत् आत्मदेव्योर्द्वयोर्मध्ये भूमौ चक्रं
लिखेत्ततः त्रिकोणं चैव षट्कोणं वृत्तं भूपुरसंयुतं मध्ये मा
यां समालिख्य शोलयेत्तदनंतरं अस्त्रांत मूलमंत्रेण सामा·
न्यार्घ्यजलेन च आधारशक्तिमभ्यर्च्य पूजयेत्पीठदेवताः
चतुरस्रे पूर्णशैलं उड्डीयानं जलंधरं पूजयेत्कामरूपं च पूर्वा
दिक्रमयोगतः अंगषट्कं यजेत्तत्र षट्कोणेषु च मंत्रवित् मूलं
त्रिकोणेषु संपूज्य साधकोत्तमः आधारशक्तिं मध्ये च संपू
ज्य तदनंतरं अस्त्रेण क्षालिताधारं स्थापयेत्तत्र साधकः
आधारेण विना अंशेन चत्र्पंति मातरः तस्माद्विधिवदाधा
रं कल्पयेत्कुलनायिके आधारस्त्रिपदं प्रोक्तं षडस्रं वा चतुष्प
दं अथवा वर्तुलाकारं ऊर्ध्वादाधारमुत्तमं यद्यामन्यतमं सं
पं पूजयेत्कुलवर्त्मना सर्ववर्त्मं त्वं नेकत्वा संपूज्य तेन वर्त्मना

आसेसेन्द्रं महाकामं वह्निमंडले ऽधृतं हृदंतं मंत्रमुच्चार्य
आधारे पूजयेत्ततः तत्र संपूजयेद्वह्नेः कलादशकसंज्ञ
या धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिंगिनी सुश्रीः
सुरूपा कपिला हव्यकव्यवहाग्र पियादिसेन्दुतकारांताः
अज्ञाद्याः परिकीर्तिताः ऽधृता वेनमोन्ताश्च कला वह्ने
रितीरिताः अथ ह्रांतमूलमंत्रेण तालितं पात्रमुत्तमं स्वर्ण
रौप्यशिलाहूमेकपालालाबुमृण्मयं नारिकेलं च शांखं
च शुक्ताशुक्तिसमुद्भवं पुण्यवृक्षसमुद्भूतं पात्रं कुर्यान्मनो
रमं यद्वा कांचनरौप्यकाचजनितं शुक्ताकपालोद्भवं विश्वा
मित्रमयं च कामदमिदं हैमं प्रियं स्फाटिकं ताम्रं शांखं
मीतिदं मंत्रसिद्धिजनकं श्रीनारिकेलोद्भवं कपालं स्फुट
मंत्रसिद्धिजनकं भुक्तिप्रदं मौक्तिकं अथवा सौवर्णरौप्य
ताम्राणि सर्वसिद्धिकराणि च शांतिके च शिलापात्रं लभे
वैवतृमृण्मयं नारिकेलं सर्ववश्ये मोहे चैवतु मौक्तिकं ज्ञान
प्रदं कपालं स्यान्मारणे लोहमुत्तमं कुर्यात्स्वर्णमयं पात्रं
विश्वामित्रं कपालकं शांखं ज्ञानप्रदं शुक्ताशुक्ति विद्या॰
प्रदायिनी कपालालाबुपात्राणि सिद्धिकराणि च पुण्य
वृक्षजपात्राणि सर्वपापहराणि च ऽक्तेष्वेतेषु पात्रेषु पा
त्रमेकं प्रकल्पयेत् षोडशांगुलविस्तारं षडंगुलसमुच्छ्र
यं अथवापि तदर्द्धं स्यात्तदर्द्धं वाथ कारयेत् पंचांगुलं तत

कौ थ्यासार्द्धं वर्द्धं चवै प्रमाणतः अतिसूक्ष्ममतिस्थूलं सच्छिद्रं परि
वर्जयेत् नयोजयेद्गन्धपात्रं स्वप्रादेशं प्रशस्यते एषामेकतमं
२० पात्रं स्थापयेत्त्रिपदोपरि मंगलं पूर्ववत्कृत्वा पूजयेत्पूर्वव
र्त्मना सूर्यस्य मंडलं तत्र चिंतयित्वाथ पूजयेत् वर्णाद्यं वि
न्दुसहितं अर्कमंडलङे-युतं नमोन्तं मंत्रमुच्चार्य पूजयित्वा
पात्रकं कलाः संपूजयेत्तत्र भानोर्द्वादशसंज्ञकाः तपिनी
तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः सुषुम्ना भोगदा विश्वा
बोधिनी धारिणी क्षमा कभाद्याश्च ठडान्ता वै विन्दुयुक्ता
यथाक्रमात् बीजाद्याश्च कलाङेयाश्च तदर्थ्यैनानमोन्विताः
इमाः कलाः समं पूज्याः पात्रं च पूजयेत्ततः रक्तचन्दनपुष्पै
श्च सुगंधैः सुमनोहरैः ततश्च पूरयेत्पात्रं त्रिभागं कुंभहेत
कः वरुणं मूलमंत्रं च विलोममातृकां पठन् जलेन भागमे
कं तु पूरयेत्साधकोत्तमः तत्र दूर्वाक्षतान् रक्तपुष्पचन्दन
संयुतं पूर्वोद्धृतं कुंडगोलं बिल्वपत्रं तिपेत्ततः मांसं मत्स्यं
विनिक्षिप्य मुद्रां चैवाविशेषतः नानासुगंधिकं चैव नव
रत्नं विनिक्षिपेत् एलालवंगकर्कोलजातीफलसम
न्वितं चन्द्रचंदनकस्तूरीरोचनागुरुकुंकुमं स्वयंभूकुसु
मं कुंडगोलोद्भवं चाष्टगंधकं तत्रतिभावचवीरेन्द्रः पूजयेच्च
न्द्रमंडलं सविन्दुवामकर्णं सोममंडलङे-युतं हृदंतं मंत्रमु
च्चार्य पात्रमध्ये प्रपूजयेत् कलाः सोमस्य तत्रैव हिरष्टसंख्य

कायजेत् अमृता मानदा पुषा तुष्टिः पुष्टी रतिर्धृतिः शशि
नी चंद्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरंगदा पूर्णा पूर्णामृता का
मदायिन्यः स्वरजाः कलाः अकाराद्या बिन्दुयुक्ता ङेयुताश्च
नमोन्तिकाः पूज्याः सर्वाः प्रयत्नेन कलान्तेयाविधोरिमाः
पूर्ववत्तीर्थमावाह्य पूर्ववन्मंडले लिखेत् पूर्ववन्मंत्रमुच्चार्य
आनन्दभैरवं यजेत् आनन्दभैरवीं देवीं तत्र संपूज्य देशिकः
निजेष्टदेवतां तत्रावाहयेच्च ततः परं आवाहन्यादिमुद्रां
च साधको दर्शयेत्ततः सकलीकृतिविधानेन मुद्राः संदर्शये
त्ततः दर्शयित्वा ततो मुद्रामिष्टदेवं यजेत्ततः पूर्ववच्च षडंगा
नि त्रिकोणानि प्रपूजयेत् अकथादित्रिरेखायां मध्ये मा
यां समालिखेत् स्रोमध्ये च संलिख्य पूर्वादिचातुरस्रके
संपूजयेत्ततः पश्चात्संवर्त्तं तु साधकः पंचान्तकेतितियुतं
दत्तकर्णसमन्वितं गगनान्तेचरत्नेभ्यो नमोन्तमन्त्रमुद्धरेत्
शीतलेशाकसंयुक्तमर्धविंदुविभूषितं स्वर्गपदं समुच्चार्य र
त्नेभ्यो नमः इत्यपि पंचमं देवराजं च दत्तश्रोत्रसमन्वितं
पातालपदं रत्नेभ्यो नमोन्तश्चापरो मन्त्रः महाकालं त्रि
युतं दत्तकर्णसमन्वितं मर्त्यरत्नेततः पश्चाद्भ्यो नमोन्तं स
मुद्धरेत् वामपादं तिथियुतं दत्तश्रवणभूषितं नागपदं स
मुच्चार्य रत्नेभ्यो नमः इत्यपि इति मध्ये तु संपूज्य त्रिरेखासु ततः
परं वाग्भवान्ते च दिव्यौघगुरुसंज्ञाश्च पादुकां पूजयामि
ततः पश्चाद्देवं त्रिविधं यथा यजेत् सिद्धौघं मानवौघं च पूजये

कौ० मन्त्रं जपेत् अथ शेषे करसानन्दकरे परमे तथात्मनि स्वच्छन्दस्फु
२८ २९ रणामत्र निधेहि अकुलरूपिणि अकुलस्यामृताकारे शुद्धज्ञा
नकरे परे अमृतत्वं निधेह्यस्मिन्वस्तुनि क्लिन्नरूपिणि तद्रू
पेणैकरस्यं च दत्वा ह्येतत्स्वरूपिणि भूत्वा परामृताकारं
मयि चित्स्फुरणां कुरु इति मन्त्रत्रयेणैव मभिमन्त्र्य ततः
परं ब्रह्माण्डखण्डसंभूतमशेषरससंभवं आपूरितं महापा
त्रं पीयूषरसमावह वाग्भवं पंचमे लोणी वामश्रोत्रसम
न्वितं तैजसं सं अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि
प्रोच्य अमृतं स्रावयद्वयं वह्निजायां समुच्चार्य उद्धरेत्परं
ततः वाग्भवं वदेत् पश्चाद् वाग्वादिनि ततः परं वाग्भवः
पदमाभाष्य क्लिन्ने क्लेदिनि तत्परं क्लेदय द्वितयं महा
मोक्षं कुरु द्वयं वदेत् कामबीजं शक्तिबीजं मोक्षं कुरु द्वयं
वदेत् प्रेतबीजं समुच्चार्य ह्सौं नमस्ततः परं अनेनैव विधा
नेन अभिमन्त्र्य ततः परं आनन्दभैरवं देवं आनन्दभैरवीम
पि त्रिवारं मूर्ध्नि संतर्प्य अङ्गे संदर्शयेत्ततः पूर्वोक्तास्तत
रस्वाधाः शंखमुद्रा ततः परं वामाङ्गुष्ठं च संदल्य दक्षि
णेन तु पाणिना ह्लौनानेन याममुष्टिमंगुष्ठं तु प्रसारये
त् वामाङ्गुल्यस्तथाश्लिष्टाः संयुक्ताः सुप्रसारिताः दक्षि
णाङ्गुष्ठसंस्पृष्टा मुद्रैषा शंखमुद्रिकाः अथोमुखं दत्तपा
णिं वामं चैव तथाविधिं उपर्युपरियोगेन मिलिताः सव
लाङ्गुलीः अङ्गुष्ठौ चालयेत्किंचिन्मुद्रैषा मत्स्यसंज्ञिता ।

मत्स्यमुद्रां च सन्दर्शयेत् मुद्रां च दर्शयेत् एवं गुरुमततः प
श्चात्योनिमुद्रां च दर्शयेत् त्रितालच्छोटिकाभिश्च दिग्बंध
नेततश्चरेत् पृष्टया मूलविद्यां च जप्त्वात्म चिन्तयेत्ततः इष्टदे 6
वस्वरूपं च विभाव्य साधको नमः अर्घ्यस्य स्थापनं प्रोक्तं स
र्वेशाक्तेषु सिद्धिदं तथा च सिद्धविद्यानां स्वतंत्रतंत्रे । ततः श्री
खं वीरपात्रं स्थापयेत्मध्यभागतः श्रीविद्योक्तविधानेन ततः पू
जां समाचरेत् विसर्जनावधि वीरो नोद्धरेन्न च चालयेत् तस्माद्विंदं
विनिक्षिप्य सामान्यार्घ्यं ततः परं देव्यर्घ्यकुंभयोर्मध्ये पात्राणि स्थाप
येद्यथा गुरोः पात्रं चटस्यान्ते तदंते भोगपात्रकं तदंते शक्तिपात्रं च
योगिनीनां तदंतिके तदंते वीरपात्रं च वलिपात्रं तदंतिके पाद्यमा
चमनीयं च पात्राणि स्थापयेद्बुधः उत्तमं नव पात्राणि सप्त पात्राणि
मध्यमं केचिद्वदंति मंत्रज्ञाः पंच पात्राणि मध्यमं अधमं तानि पात्रा
णि एकपात्रं न कारयेत् एकपात्रं न कुर्वीत यदि साक्षात्कुलेश्वरः
मंत्राः पराङ्मुखा यांति विघ्नाश्चैव पदे पदे इहलोके च दारिद्र्यं मरणे च
पशुतां व्रजेत् देवीपात्रं गुरोः पात्रं पंचपात्रेष्वयं विधिः शक्तिपात्रं
वीरपात्रं सप्तपात्रेष्वयं विधिः पूजापात्रं च विज्ञेयं योगिनीनां च वर्
जने पाद्यमाचनीयं च नवपात्रेष्वयं विधिः १॥ पात्रारंगस्थापनं
वक्ष्ये यथा तंत्रविधानतः कुंभस्य दक्षिणे कुर्यात्त्रिकोणं वृत्तभूपुरं
पूर्ववत्मोक्षणादिं च कृत्वाधारं विनिक्षिपेत् तत्र संपूजयेद्वह्निमंड
लं तदनंतरं प्रक्षाल्य पूर्ववत्पात्रं आधारे स्थापयेत्ततः अर्घ्य

कौ मंडलं तत्र सूर्यस्य पूरयेत्ततः ॐ भास्करेन संपूज्य सोमस्य मंडलं यजे
३० त् ॐ रं गोलं क्षिपेत्तत्र ज्ञस्य मंगं पचन्दनं षष्ठो गांशमधुपूरं लिखि
त्वा पूजयेत्ततः अंगषट्कं कोणषट्कं मुद्राः पूर्ववदाचरेत् द्विरवथनं
30 विधायाथ तालत्रयपुरःसरं ग्रहणं धामंत्रं च जप्त्वा विन्दुं क्षिपेत्ततः
विशेषार्घस्य वीरेन्द्रो गुरूंश्च परितर्पयेत् स्वस्वनामयुतान्दिव्या
न्सिद्धमानवसंज्ञकान् तर्पयित्वा स्वीयमूर्ध्नि मुद्रया तत्त्वसंज्ञया
अंगुष्ठानामिकाभ्यां च वामहस्तस्य सर्वदा कथितातत्त्वमुद्रेयं
योजिता तर्पणे बुधैः गुरुं परगुरुं चैव परापरगुरुं तथा परमेष्ठि
गुरुं चैव तर्पयेत्तदनंतरं विशेषार्घ्यस्तेनैव तर्पयेन्निजदेवतां
पंचधा सप्तधा वापि हृत्सरोजे तु साधकः गुरूणां पात्रदत्ते च भो
ग पात्रे प्रकल्पयेत् पूर्ववत्पात्रं संस्थाप्य तत्त्वशुद्धिं समाचरेत्
कलायसदृशं तत्र क्षिपेच्छुद्धिचतुष्टयं अंगुष्ठमध्यमानामायोगे
रेकं च धारयेत् वामहस्तस्य विप्रेन्द्रः स्वीकुर्यात्तदनेन तु मायां
च कमलाबीजं शिवशक्ति सदाशिवे एवं विद्याकलात्मानं स
विन्दुं षोडशान्तरं उच्चार्य वाग्भवं मूलं प्राप्तं तत्त्वेन तत्परम्
स्थूलदेहं ततः पश्चात् प्रोगयपामि पदाद्विठः अनेनाथः शुद्धिव
एं स्वीकृत्य तदनंतरं मायालक्ष्मी ततो मायाकलानियतिशक्तितः
कलात्मशुद्धविद्याश्च रागाश्च पुरुषात्मने कादिपंचकवर्गं च वि
न्दुयुक्तामबीजकं मूलमंत्रं ततो विद्यातत्त्वेन सूक्ष्मदेहकं प्रो
धयामि ततः स्वाहा स्वीकुर्यादपरं ततः ज्ञां लक्ष्मी प्रक्रमशंकार

बुद्धिमनः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादच पायूप
स्थपदं शब्दस्पर्शरूपंततोरसः गंधाकाशपदंवायुस्तेजः सलिलशब्द
तः भूम्यात्मनेसमुच्चार्य विन्दुयुग्मादिवर्णकं शाक्तिबीजंस्वमंत्रंच
शिवतत्त्वेनतत्परं परदेहं शोधयामिस्वाहाचैवततीयकं स्त्रीह्रं
यच पुनः मायांलक्ष्मीबीजंसमुच्चरेत् पुनःशिवादिकंप्रोच्य माया
दिकंततःपरम् प्रकृत्यादिकमुच्चार्य पंचाशत्मातृकांततः वालां
वमूलविद्यांचसर्वतत्वेनतत्परं तत्वत्रयान्वितंबीजं शोधयामिततः
स्वाहा स्त्रीकुर्यादमुनायुग्मंस्वत्वामक्रमेणतु गंग्राईज्वलतिद्यो
तिरहमस्मिज्योतिर्ज्वलति ब्रह्माहमस्मियोहमस्मिब्रह्माहमस्मि अह
मस्मिअहमेवाहंमांजुहोमिस्वाहा गं त्वमेवप्रत्यक्षंब्रह्मासित्वामेवप्रत्य
क्षंब्रह्म वदिष्यामि ऋतंवदिष्यामि सत्यंवदिष्यामि तन्मामवतु
तद्वक्तारमवतु अवतु मांअवतु वक्तारं गं यच्छन्दसामृषयोगावो
हयस्तथा ब्रह्मपुत्रमामेधोः नैधयास्पृष्ट्वातुभावविध्रुवं मेगो
पायेत्तु वाससाकरयुग्मंच स्पृष्ट्वादेहंच शोधयेत् पाणिभ्यांसर्वदेहं
प्रोञ्छयेदितिशोधनं क्षालयेद्धस्तयुगलमथवान्यमतंचरेत्
गंप्राणापानव्यानोदानसमानामेशुध्यंतां ज्योतिरहंविरजाविपा
प्माभूयासंस्वाहा १ गं पृथिव्यप्तेजोवाय्वाकाशानिमेशुध्यंता
मित्यादि २ गं प्रकृत्यहंकारबुद्धिमनः श्रोत्राणिशुध्यंतामित्या
दि ३ गं त्वक्चक्षुर्जिह्वाघ्राणवचांसिमेशुध्यंतामित्यादि ४
गं पाणिपादपायूपस्थप्राणामेशुध्यंतामित्यादि ५ गं स्पर्श

कौ रूपगन्धरसानिमेशुद्ध्यंतामित्यादि ६ वायुतेजःसलिलभूतात्मने
३१ मेशुद्ध्यंतामित्यादि ७ सप्तमंत्रमिदंचैवपठेत्तत्वविशुद्धये तत्वशु
द्धिंविधायाथस्थापयेच्छक्तिपात्रकं योगिनीनांचसंस्थाप्यवीरपा
त्रंततःपरं बलिपात्रंततःपश्चात्पाद्यपात्रंचसंदिशेत् आचमनी
यपात्रंचपूर्ववत्स्थापयेद्बुधः योगिनीपात्रतत्वेनतर्पयेद्राशिमुद्र
कं बलिपात्रामृतेनैववटुकादींश्चतर्पयेत् तत्तद्भावनतोवीरः
सामान्यार्घ्येणतर्पयेत् देवीपात्रामृतंबिन्दुंपूजाद्रव्योपरिक्षिपेत्
आत्मदेहंचसंप्रोक्ष्यभावयेद्देवतामयं भोगपात्रामृतंबिन्दुंस्वीकु
र्यान्मदनंततः अथातःसंप्रवक्ष्यामिबलिपंचकमुत्तमं यावन्नेवटुके
दद्याद्योगिनीनांसर्वभूतके क्षेत्रपालेतथाराजराजेश्वरेचसाधकः
अकृत्वाबलिदानंहिकथंपूजांसमाचरेत् अदत्वाक्षेत्रपालायक
थंदेवींप्रपूजयेत् अदत्वावटुकादीनांयःपूजयतिचंडिकां पू
जाचविफलातस्यदेवीशापःप्रजायते दक्षिणेवटुकेदेयउत्तरेयो
गिनीबलिः सर्वभूतेबलिंदद्यात्क्षेत्रपालस्यपश्चिमे राजराजेश्वरे
मध्येबलिंदद्यात्तुसाधकः दक्षिणादिचतुर्दिक्षुपूर्ववन्मंडलं
लिखेत् प्रोक्षणंपूर्ववत्कृत्वावटुकंतत्रचिन्तयेत् करकलित
कपालःकुंडलीदंडपाणिस्तरुणतिमिरनीलोव्यालयज्ञोपवी
ती क्रमसमयसपर्याविघ्नविच्छेदहेतुर्जयतिवटुकनाथःसिद्धिदः
साधकानां इतिध्यात्वातुसंपूज्यपूर्वोक्तबलिमाचरेत् अंगुष्ठाना
मिकाभ्यांचवटुकस्यबलिंहरेत् विषमायारमादेवीपुत्रवटुकनाथतः

पिंगलपदतोजटाभास्वरप्रोच्चपिंगल त्रिनेत्रच इमंबलिंगृह्णंगृ
ह्णफुगेंततः वह्निजायांतमुच्चार्यवटुकस्यमहात्मनः अनेनबलि
मुत्सृज्ययोगिनीश्चिंतयेत्ततः योगिन्यःकामरूपाणिविलक्षणा
युताःस्वभावांतस्वभावामत्ताः कंकालमालाकलितकुचतटीरक्त
वस्त्रोत्तरीयाःलिंगपाशंकपालंशूलमपिदधतःसुस्मिताः
त्रिभुवनाभक्तानांसाधकानामभिलषितफलंदीयमानाः
सुवेशाः एवंध्यात्वाप्रभूतैवपश्चादपिबलिंददेत् ॐगृह्ण
गृह्णमध्यमानामायोगिनीभ्योबलिंहरेत् तारंलज्जांरमासर्वासि
द्धिच योगिनीभ्यःसर्वाभ्योमातृकाभ्यश्च इत्युत्सृज्यबलिंददेत्
विषमायांततःसर्वभूतेभ्यश्चततःपरं सर्वभूतपतिंप्रोच्यभ्या
भ्योनमोन्तेसमुच्चरेत् सर्वभूतबलिंदत्वाक्षेत्रपालबलिंहरेत्
ततःसंचिंतयेत्क्षेत्रनायकंसिद्धिदेनवे निर्वाणंनिर्विकल्पंनि
रूपमसकलंनिर्विकारंतत्कारंहुंकारंवज्रदंष्ट्रज्वलवह्निवदने
रौद्रमुन्मत्तभावंफट्कारंवद्धनागभुजंगदिनटस्वंभैरवंशूलपाणिं
खट्वांगंव्योमनीलंडमरुकसहितंक्षेत्रपालंनमामि इतिध्या
त्वातुसंपूज्यबलिंपश्चान्निवेदयेत् ॐगृह्णन्जनीभ्यांचक्षेत्रपा
लबलिंहरेत् विषमायांरमाबीजंतत्कारंबिन्दुभूषितं षष्ठीचैस्व
रसंभिन्नंस्वस्थानक्षेत्रपालच इमंबलिंपदस्यांतेगृह्णांगृह्णफुगांत
तः स्वाहांतमंत्रमुच्चार्यक्षेत्रपालबलिंदिशेत् क्षेत्रपालबलिंद
त्वामथोदद्यात्ततःपरं इत्युत्सृज्यबलिंदद्याद्राजराजेश्वरायच

कौ 32 बलिपात्रशनेनैव नर्पयेद्वटुकादिकं एकत्र वापंचबलिं द
द्याद्यापकमंडले वामभागे स्थिते चैव सर्वविघ्नहरो भवेत् द
क्षिणे वटुके देयाद्दुत्तरे योगिनीबलिं पूर्वेभूतबलिं दद्यात्तले
त्रपालस्य पश्चिमे राजराजेश्वरे मध्ये बलिं दद्यात्तु साधकः
इति श्री ज्ञानानन्द परमहंस विरचिते कौलावली निर्णये ६
अथ वक्ष्ये च पूजाया विधानं यत्र यद्भवेत् पूजादौ तर्पणादौ
तर्पणस्यांते तथैव च पूजांते चाग्निकार्यांते प्राणायामत्रयं
चरेत् प्राणायाम षडंगे च कृत्वा साधकसत्तमः पीठपूजां
प्रकुर्वीत स्वकल्पोक्तविधानतः स्वकल्पोक्तविधाने
न ध्यात्वा देवीं समाहितः हृत्सरोजात्समानीय नासा
पुटपथात्सुधीः तेजोमयीं महादेवीं दीपाद्दीपान्तरं यथा
पुष्पांजलौ ततः पश्चात्तं यंत्रमध्ये समानयेत् आवाहन्या
दिमुद्रां च दर्शयेत्तदनंतरं पुष्पांजलि बद्धः कुर्यादियमावा
हनीभवेत् इयं तु विपरीता चेत्तदा वै स्थापनीभवेत् मि
लितं मुष्टियुगलं सन्निधापनकं भवेत् अंतरंगुष्ठमुष्टिभ्यां
सन्निरोधनरूपिणी एतस्या एव मुद्राया तर्जन्यौ सरले
यदि अवगुंठनमुद्रेयमभितो भ्रामिता सती देवतांगेष
डंगानां न्यासः स्यात्सकलीकृतिः अन्योन्यग्रथितांगुष्ठा प्र
सारितकरांगुलिः महामुद्रेति कथिता परमीकरणे बु
धैः परिवृत्य करौ पश्चात् तर्जनी मध्यमे युगे कनिष्ठा

नामिकायुग्मं चवसम्युतेक्रुक येन्मुद्रेयमाख्याता प्रसन्नीकर
णे बुधैः सम्सकल्पोक्तविधिना मुद्राः सन्दर्शयेत्ततः दर्शयित्वात
तो मुद्रां तालत्रयपुरःसरं छोटिकाभिर्दिग्बन्धनं कृत्वा जीवं
न्यसेत्ततः लेलिहामुद्रया यंत्रे स्पृष्ट्वा स्पष्टा पंचक्रमेण वा तर्जनी
मध्यमानामाः समं कृत्वा अधोमुखं प्रनामायांतिपेदृढां रुजुं कृ
त्वा कनिष्ठिकां लेलिहेति च विख्याता जीवन्यासे प्रकीर्तिता
मूलमंत्रेणादौ मात्वा प्रविभाव्योदकेन च यिवारं प्रोक्षयेद्धीमा
न् देवशुद्धिरितीरिताः ततः संपूजयेद्देवीं षोडशैरुपचारकैः
आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकं मधुपर्काचमनस्नानव
सनाभरणानि च गन्धपुष्पे तथा धूपदीपनैवेद्यवन्दना, प्रथवा।
पाद्यार्घ्याचमनस्नानवसनाभरणानि च गन्धपुष्पे धूपदीप
नैवेद्याचमनं ततः ताम्बूलमर्चना स्तोत्रं तर्पणं च ततः परं अर्घ्यं
पाद्यं निवेद्याथ तथैव चाचमनीयकं मधुपर्काचमनं चैव गंधप्रसू
नके ततः धूपदीपौ च नैवेद्यं दशोपचारकं स्मृतम् गंधादयो
नैवेद्यांता पूजापंचोपचारिका उत्तमामध्यमा चैव बुधैः कार्या यथा
क्रमात् अभावे पुष्पतोयाभ्यां पत्रेण तदभावतः तदभावे सर्ष
पेण श्वेतेनापि विशेषतः तदभावे तु तैनैव दूर्वया तदभावतः अ
भावे वारिणा वापि तदभावे च मानसैः मूलेन देवतानाम डे.युतं च
समुद्धरेत् देयद्रव्यपरो मंत्रे एवं कृत्वा चतरनंतरं हृदयेन तु पाद्यं च
शिरसार्घ्यं निवेदयेत् वारुणेनाचमनं प्रोक्तं तेनैव मधुपर्कं

कौ शिखामंत्रेण गंधं च पुष्पं नेत्रेण दापयेत् निवेदयामि वदनेदद्या
त्सर्वं तु साधकः पाद्यादिकं निवेद्याथ स्नानीयं च निवेदयेत् ततश्च
३३ पाडुके दत्वा तु रक्ते स्नानमन्दिरे नानारत्नसमायुक्त स्वर्णसिंहा
33 सनान्विते तत्रानीय महादेवीं साधकः शुद्धभावतः हृतेनोद्वर्त
नेकार्यं मनसा तदनंतरं सुगंधिदिव्यतैलेन देवकन्यासहस्रकैः
सहस्तैः स्वर्णकुंभैश्च सुगंधजलपूरितैः प्रासिंचेद्भक्तिभावे
न भवानीं भक्तवत्सलां नानातीर्थोदकैः शुद्धैर्गंधराजसहस्र
कैः नागकन्यासहस्रैस्तु किन्नरैरप्सरोगणैः पंचामृतैः पं
चगव्यैः स्नापयेत्तदनंतरं नारिकेलोदकेनैव तथैक्षुवारिणा
ततः सप्तमृत्तिकयायुक्तशीतलेन जलेन च शीतलोष्णोद
केनैव तथा रत्नोदकेन च सुवासितजलेनैव देव्याः स्नानं
समाचरेत् सहस्रशीर्षामंत्रेण पवमान्या तथैव च भृंगाराष्ट
कुंभैस्तु देव्याः स्नानं विधाय च ततः शुद्धैर्दुकूलैश्च गात्रमार्ज
नमाचरेत् कार्पासं वाल्कलं वा तत्कौषजं वस्त्रमिष्यते रक्तकौषे
यवस्त्रं च महादेव्यै प्रशस्यते सपीताम्बरकौषश्च सदेवाय च उ
त्सृजेत् विचित्रं सर्वदेवेभ्यो दिव्यांशुकं निवेदयेत् नीलरक्ते
न यदुक्तं तत्सर्वं च विवर्जयेत् विचित्ररागाविमलं लग्नहीनं
विवर्जयेत् वस्त्रं दद्यान्महादेव्यै नान्यसैत कदाचन रक्तवस्त्रं
रक्तमाल्यं रक्तालंकरणं तथा दद्यांगलेपनं कार्यं गंधचन्दन

सिद्धैकैः पुनश्च पादुके दत्वा मनोरमे स्वसाधकः यंत्रमध्ये समानीय तन्
मस्कुर्यात्समाहितः पुनः पाद्यादिकं दत्वा पूजयेद्विधिपूर्वकं यथोक्त
त्रं फलं पुष्पं तथा दद्यात्पत्रकं पुष्पांजलिप्रदानेन न भवेद्विषमस्त
थं नाभौ सुखं फलं दद्यादिति शास्त्रस्य निर्णयः ज्ञानाख्यमुद्रया
चैव पूजयेत्परमेश्वरीं अंगुष्ठातर्जनीभ्यां तु ज्ञानमुद्रा प्रकीर्तिता
मध्यमानामिकाभ्यां तु अंगुष्ठाग्रेण साधकः दद्याद्विमलं
गंधं मंत्रेण पूर्ववत् यथा गंधं तथा चैव धूपं दद्याद्विचक्षणः
मध्यमानामिकाभ्यां तु मध्यपर्वणि देशिकः अंगुष्ठाग्रेण धूपं
चषतां च विनिवेदयेत् उत्तोलनं विधायाकृत्वा गायत्र्या मूलयोगतः
अनामिकांगुष्ठयोगे नैवेद्यं तु निवेदयेत् ग्रन्थतः सर्वं सदा धीरः
प्रदद्यात् ज्ञानमुद्रया दधि मधु घृतेनैव मधुपर्कः प्रकीर्तितः
पायसं कृशरं दद्यात्कुल्यान्नं मधुसंयुतं पिष्टकं मोदकं चैव तु
ग्यं दधि तथा फलं ताम्बूलं च ततो दद्यात्कर्पूरादिसुवासितं
तत्र तत्र जलं दद्यादुपचारान्तरान्तरा पुनर्मासं प्रदातव्यं गन्धचंद
नपंकजं दर्पणं चामरं छत्रं पादुकां च निवेदयेत् विधिवत्पूज
नं कृत्वा तर्पयेत्तत्त्वमुद्रया अंगुष्ठानामिकायोगात्तत्त्वमुद्रा तु स
सर्वदा अंगुष्ठे भैरवो देवो नामायां चण्डिका सदा अनामांगु
गुष्ठयोगेन तर्पयेत्कुलसंतति अंगुष्ठामध्यमाभ्यां च वटुकं
योगिनीस्तर्पयेत् कनिष्ठांगुष्ठयोगेन स्तंभने तर्पयेत्ततः तर्जन्यं
गुष्ठयोगेन तर्पयेदभिचारके एवं संतर्प्य देवेशीं कुलद्रव्यै

कौ र्येद्यथाविधि तर्पणं चाष्टधा कार्यं सकृद्वापि यथेच्छया नार्चये
देकहस्तेन तर्पयेन्नैकपाणिना तर्पयित्वा महादेवीं स्वीयक्र
३५ ममथाचरेत् देवतामंतिकं कुर्यात्कुलैर्विहितैः सदा पूजा
34 काले देवताया नो परिभ्रामयेत्करं देवमुक्तां गृहीत्वा तु पूज
येदंगदेवताः ध्यात्वा गुरुकुलं धीरो रश्मिवृन्दं तथैव च
स्व स्व स्थाने समावाह्य प्रश्रयेत्तदनंतरं विना योगिगुरोः पू
जां इष्टदेवं यजेद्यदि निष्कृतिर्नास्ति तस्यैव नरकार्णवकोटि
षु तस्मात्सर्वप्रयत्नेन गुरुपूजां समाचरेत् दिव्यौघा गुरवो ने
व सिद्धौघा गुरवस्तथा मानवौघाः समासेन पूजनीयाः प्रयत्न
तः अथवा सर्वशास्त्रेषु गुरवः पूर्वसूचिताः अथवा येषु येषु
च मंत्रेषु ये ये ऋषिगणाः स्मृताः ते ते पूज्याः सपर्यादौ संक्षेप
कृदितं मया अज्ञात्वा गुरुनाम्नां वै गुरुत्रितयमर्चयेत् चतुष्टये
वा संकोचो न च कार्यस्ततः परं गुरुः परगुरुश्चैव परापरगुरु
स्ततः परमेष्ठिगुरुश्चैव कथिता गुरवः शुभाः न जानाति गुरो
र्नाम वंशशुद्धिः कदाचन तत्पादाम्बुजरेणूनां कणमादेहि
दासतां इति स्तवेन संस्तुत्य तस्मिन्निजगुरुं यदि तन्नाम्ना पूजये
त्तस्तु तेन पूजा गुरोर्भवेत् गुरुपूजां विनाचैव यदि पूजां समाच
रेत् तद्दोषशमनेचैव कुलपूजां समाचरेत् पूर्ववत्तर्पणं कृत्वा
रश्मिवृन्दं प्रपूजयेत् यत्र यत्र स्थितिश्चैव तत्र तेनार्चयेद्यदि
तन्मांसरुधिरेणैव पारणं तस्य जायते पकपीठे पृथक्कार्ं

विना यंत्रं करोति यः अंगांगितं परित्यज्य देवताशापमाप्नुयात्
आवाह्य देवतामेकामर्चयेद्यान्यदेवतां उभाभ्यां लभते शापं मंत्री
चंचलमानसः तस्मात्सर्वप्रयत्नेन स्वस्वस्थाने यथाक्रमात् संपूज्य
देवताः सर्वास्तर्पयेत्तदनन्तरं ब्रह्माण्याद्यष्टशक्तीश्च पूजयित्वा
च तर्पयेत् पुनः संपूजयेद्देवीमुपचारैश्च विस्तरैः आसनं प्रथमं
दद्यात्सौवर्णं दारुकमेव वा वस्त्रं वा चार्मणं कौशं मंडपस्योत्तरे स्र
जेत् पाद्यं दत्वा महादेव्यै चार्घ्यं दद्यात्ततः परं अथामाहृत्वा पं
कजं च विधायुक्तातासमन्वितं गंधपुष्पाक्षतजवाज्यशालितिल
सर्षपैः सदूर्वैः सर्वदेवानामेतदर्घ्यमुदीरितं केवलेनोयमात्रेण
तदाचमनमिष्यते वासितं तत्सुगंधाद्यैः कर्तव्यं यदि लभ्यते
अर्घ्यादिकं प्रदद्यात्तु गन्धाष्टकं निवेदयेत् चन्दनागुरुकर्पूर
चोरकुंकुमरोचना जटामांसीकपियुता शाक्तंगंधाष्टकं विदुः
नानाविधानि पुष्पाणि वसनाभरणानि च माल्यं दद्यात्ततो
देव्यै गंधचन्दनमिश्रितं सर्वांगलेपनं दद्याद्धूपं दद्यात्ततः परं
उशीरं चन्दनं कुष्टमगुरुं गुग्गुलुं तथा मधुनाघृतसंयुक्तो धूपोयं
चंडिकाप्रियः अथवा शेगरोगहररोगदकेशाः स्वरतरुयन्त्र
लघुपत्रविशेषाः रत्नविवर्जितवारिजमुद्राधूपवर्तिरिह सुन्द
रि भद्रा अथवा मधुसर्पिःशर्करा च चन्दनागुरुगुग्गुलः उशीर
उशीरः सप्त चैवैते धूपोयं चंडिकाप्रियः अथवा अगुरूशीरगु
ग्गुलुशर्करामधुचन्दनैः धूपयेदाज्यसंमिश्रैर्नीचैरस्यात्तु देशिकः

कौ. केवलं गुग्गुलुं धूपं गुग्गुरुं वापि संदिशेत् पथामेकतमेकृत्वा
३५ निवेदयेत्सार्ववर्त्मना नधूमोस्थापयेद्द्रुममासनेचहृदेथवा
35 घृतप्रदीपंप्रथमंतिलतैलोद्भवंततः सार्षपफलनिर्यासजा
तंवावारिजोद्भवं प्रणवंजयध्वनिपदंमातःस्वाहाततःपरम्
अनेनप्रज्वलयेद्धूदामनेनपरिवारयेत् तैजसंदारुजंवापि
मार्तिकंदापहृतकं अग्रदीपप्रदातव्यंधूमोनहिकदाचन
एवंदीपंप्रकुर्वीतनेत्ररंजनकारकं घृतदीपंदक्षिणेतुसव्या
मेतैलदीपकं अग्निनोदीपयेन्मन्त्रीदीपमालांघृतप्लुतां
कर्पूरवर्तिकायुक्तांतेनैववापरिप्लुता ॥
वल्मीककर्पूरगंधिन्यासर्षिपातिलजेनवा आरोप्यदर्शयेद्दीपा
नुच्चैः सौरभशालिनः दीपावलिंततोदत्वाकुलदीपंनिवेदये
त् सौवर्णेराजतेकांस्ये स्थानकेकुंकुमेनतुदलाष्टकयुतंपद्मं
विलिख्यतत्रसाधकः यवगोधूममुद्गाद्यैःकृत्वेन्दुरूपकंचरुं
अष्टपत्रेषुमध्येचस्थापयित्वाततःपरं नवदीपंक्षिपेत्तत्रमूलमं
त्रेणमंत्रयेत् समथाततउन्नोह्यनवधाभ्रामयेत्ततः निर्मञ्छये
न्महादेवीमूलमंत्रंसमुच्चरन् ततश्चसाधकश्रेष्ठश्चक्रमुद्रांप्र
दर्शयेत् दक्षिणेतरहस्तस्यहृद्यागर्भकनिष्ठिका दक्षिणेयो
जयित्वातुकनिष्ठेगर्भकेतुयः वामेवदक्षिणांगुष्ठंसाधको
विनियोजयेत् अन्योन्ययोगतश्चैवचक्रमुद्राप्रकीर्तिता प्रदत्वा
प्रदत्वाकुलदीपंचनैवेद्यंतुप्रदापयेत् तैजसेषुचपात्रेषुप्रसरे

ताम्रपात्रके यत्तदारुमयेवापिनैवेद्यंकल्पयेद्बुधः सर्वाभावेतुमा
हेये स्वहस्तघटितेयदि नदद्याद्धात्कलेलोहेदत्तेनरकमाप्नुयात्
यद्योग्यंसर्वपात्रेतुतत्रिधायनिवेदयेत् प्रत्यतोयैर्यथास्पष्टमर्घ्य
पात्रस्थितैस्तैः नदद्यातिमहादेवीदत्तेविधिशतैरपि नैवेद्यं
षड्रसोपेतं नानाविधफलंतथा नानाविधानिद्रव्याणिदद्याद्दे
व्यैप्रयत्नतः मद्यंनिवेद्यमांसंचमत्स्यमुद्रांततःपरम् दद्याद्देव्यै
प्रयत्नेनअन्नंबहुविधंतथा दुग्धंदधितथातक्रंनवनीतंसशर्करं
शार्करामोदकंदद्याद्दत्यंनानाविधंतथा चर्व्यंचोष्यंलेह्यपेयं
भक्ष्यभोज्यंनिवेदयेत् प्रशान्तोमनसादद्यादेतत्कर्मनलोपयेत्
पुष्पकंच ततोदत्वाप्राणमुद्राःप्रदर्शयेत् कुह्वानामाकनिष्ठाभिः
प्राणमुद्रासमीरिता समानमुद्रासर्वाभिरंगुलीभिःप्रदर्शि
ता प्राणापानौतथाव्यानउदानश्चसमानकः चतुर्थ्यंतोग्नि
जायांतस्ताराद्योमुद्रिकामनुः वामहस्तेग्रासमुद्राग्रासवत्परि
कीर्तिता पुनराचमनीयंचदत्वादेव्यैतुसाधकः स्वयंभूकुसुमं
कुंडगोलं गोरोचनागुरुं कस्तूरीकुंकुमारक्तचंदनानिप्रदाप
येत् गंधपुष्पंतथामाल्यंरक्तपुष्पादिभूषणं सिन्दूरंकज्जलं
दद्यादलक्तंपट्टगुच्छकं द्रोणापराजितापुष्पंकरवीरंजवांतथा
प्रयत्नेनप्रदातव्यंचंडिकाप्रीतिकारकं दत्तेचैवजवापुष्पेपट्टवस्त्र
फलंलभेत् अपराजिताश्चमाहात्म्यंवक्तुंनहिकदाचन ताम्बूलंच
ततोदद्यात्कर्पूरादिसुवासितं पुनर्माल्यंप्रदातव्यंगंधचन्दनसं

कौ युतं दर्पणं पादुकां छत्रं चामरं व्यजनादिकं अजादिबलिदानेन
चंडिकां तोषयेत्ततः यत्नतस्तु बलिं दद्यान्न हन्यादात्मना पुनः
३८ 38 स्वहस्तैर्न पशुं हन्यात् स्वतो हिंसाविवर्जितं यदि हन्यात्प्रमादेन रौरवं
नरकं व्रजेत् छागादीनि बलिं दत्वा धूपदीपं निवेदयेत् गृहीत्वा
शोणितं पात्रे स्वकीयं हृदयोद्भवं तोयसैन्धवसंयुक्तं शार्करामधुसं
युतं प्रदद्यान्महादेव्यै सर्वसौभाग्यहेतवे अभ्युक्ष्य रुधिरं धीरो
वाग्भवेन प्रदापयेत् शक्तिबीजेन वा दद्यान्नाभेरूर्ध्वमथो न हि
पुष्पांजलित्रयं दत्वा तर्पयेन्निजदेवतां ततश्च साधकश्रेष्ठो मंत्र
सिद्धिं समाचरेत् गृहीत्वा मातृकावर्णं मूलमंत्राक्षराणि च क्र
मा द्विरावृत्तिर्मंत्रसिद्धि रितीरिता आदौ मंत्रविशुद्ध्यर्थं जपं
कुर्यात्ततः परं जपं च त्रिविधं प्रोक्तं वाचिकोपांशुमानसं जिह्वो
ष्ठाधरसंस्पृष्टैर्जपो यश्च प्रजायते तज्जपं वाचिकं विद्धि जिह्वामा
त्रमुपांशुकं मनसा मंत्रवर्णस्य चिंतनं मानसं स्मृतं वाचिकस्य
प्रातज्ञेयं पकोत्तरमुपांशुना तस्माच्छतगुणं प्रोक्तं मानसं जपमु
त्तमं अथवा निगदश्चैव तथा ज्ञेयः स्पष्टवाचा निगद्यते अव्यक्त
स्फुटवर्णश्चोपांशुः परिकीर्तितः मानसश्च स्वबोधव्याप्तिर्नेनान्तर
रूपवान् निगदेन तु यज्जप्तं लक्षमात्रं स साधकः उपांशुस्मरणे
नैव तत्तुल्यं भवति सर्वथा उपांशुलक्षमात्रं तु यज्जप्तं साधकेन च मा
नसोच्चारणात्तुल्यं जायते साधकस्य च प्राणायामं षडंगं च कृ
त्वा ऋष्यादिकं चरेत् स्वगुरुं मूर्ध्नि संचिन्त्य हृदि देवीं ततः परं

स्वयंकामकलारूपंभावयन्जपमारभेत् जपस्यादौशिवांध्यायेद्ध्यान
स्यांतेपुनर्जपेत् जपध्यानसमायुक्तः शीघ्रंसिद्ध्यतिसाधकः ध्यात्वंकृ
त्वाजपेन्मंत्रंगुरूक्तक्रमतोबुधः सर्वेमंत्राःसिद्धिदाःस्युः सत्यमेवनसंशा
ततः संपूजयेन्मालांतोयैरभ्युक्ष्ययत्नतः पैंद्री प्रथममालायेहृन्मंत्रे
णाप्रपूजयेत् ॐमालेमालेमहामालेसर्वसिद्धिस्वरूपिणी चतु
र्वर्गस्त्वयिन्यस्तस्तस्मान्मेसिद्धिदाभव पूजयित्वाततोमालांगृहीत्वा
दक्षिणेकरेहृत्समीपेसमानीयतद्वामेनसंस्पृशेत् विनायन्त्रंचमंत्रं
चकवचंमंत्रसूत्रतः मालांचवामहस्तेनस्पृष्ट्वाविक्रमलक्षणं संख्या
कृतासतिकाचअदत्तंचतथैवच मध्यमायामध्यभागेस्थापयित्वा
समाहितः तर्जन्यानस्पृशेन्मालामंगुष्ठाग्रेणचालयेत् पार्श्वयोः
सेतुमादायजपकः समाचरेत् निःसेतुश्चयथातोयंक्षरणान्निम्नंप्र
सर्पति मंत्रस्तथैवप्रणवोद्विजानांसेतुरीरितः शूद्राणांचन्द्रबिन्दुस्य
मोकारंसेतुरुच्यते शूद्राणामादिसेतुर्वाद्विसेतुर्वायथेच्छया द्विसेत
वःसमाख्याताः सर्वेषैवद्विजातयः यथामंत्रंतथास्तोत्रंकवचंचत
थाविधं सेतुंविनाभवेद्व्यर्थंतस्मात्सेतुंसमाचरेत् प्रत्येकंबीजमाद
यंश्रीकाहंसैनमंत्रवित् सर्वबीजंजपन्यस्तुपरबीजंतुसंस्पृशेत् श्रं
श्रंग्रस्तेनविनायस्यनिष्फलःसजपःसदा एवमुक्तविधानेनविलंघ्य
वर्तितंत्यजेत् मेरुंप्रदक्षिणीकृत्यप्रजपेत्साधकोत्तमः गणनाविधि
मुल्लंघ्ययोजपेन्नजपंपुनः रहस्यान्निरादमास्तेनगणयेत्सर्वथावृथाः
अथवाकरमालायांमातृकायांतथैवच नित्यंजपंकरेकुर्यान्नतुकाम्यं

को कदाचन नित्यजपेच होमेच यत्र संख्या नचोदिता तत्रेयंगणना
प्रोक्ता अष्टोत्तरसहस्रकं अष्टोत्तरशतंवापि त्रिंशदापि कदाचन
३७ निंद्यानूनंनकुर्यात्तु नित्यजापेच साधकः यथाशक्तिजपंकृत्वा प्राणा
37 यामंविधायच गोपयित्वा ततो मालां सप्रहृनार्घ्यवारिणा तेजोम
यंजपफलंदेव्याहस्ते समर्पयेत् गुह्यातीति समर्प्याथ स्तवंघं
टांचवादयेत् त्रिविधेन नतिंकुर्यादष्टांगकविधानकैः चिबुकेन
मुखेनाथनासयामस्तकेनच ब्रह्मरन्ध्रनकराभ्यां पद्भ्यां स्पर्शनं
भवेत् अथवा उरःशिरोदृष्टिजानुमनश्चरणवाक्यैः अष्टांगन
मनंज्ञेयं नित्यहोमं ततःपरं नित्यनैमित्तिकंहोमं स्थंडिलेवासमाच
रेत् नकुर्यात्काम्यहोमंवै विनाकुंडेन मंत्रवित् स्वदक्षिणेलिखेद्ध
स्तप्रमाणंचतुरस्रकं अंगुलोत्सेधसंयुक्तवालुकाभिःसमंततः
तत्रमध्येच षट्कोणंलिखित्वाशोध्य पूजयेत् आधारशक्तिमभ्यर्च्य
पूर्ववच्चषडंगकं ततोवह्निंसमुज्वाल्य क्रव्यादंशं परित्यजेत् शाह्नास्व
मनुनामंत्री नैर्ऋत्यां ज्वलदग्निकं आत्मनोभिमुखंकृत्वा वह्निंसंस्थाप
येद्बुधः अग्निंप्रज्वाल्यमूलेन ज्वालिनींचप्रदर्शयेत् मणिबन्धौसमौ
कृत्वाकरौतुप्रसृतांगुली मध्यमेमिलितेकृत्वा तन्मध्येंगुष्ठकौदि
पेत् इयंस्याज्ज्वालिनीमुद्रा परमाहोमकर्मणि अग्निंसंपूजयित्वातु
शिवशक्तिसमागमात् वह्निमध्येसमावाह्य इष्टदेवींसमाहितः
आवाहन्यादिकांमुद्रां दर्शयित्वातु रत्नयेत् संपूज्यचमहादेवींहव्यं
संशोधयेत्ततः संस्थाप्यहवनीयंच पूर्ववत्प्रोक्षणंचरेत् चतुर्दी

प्रोथनं कृत्वा आज्यस्थालीं च संदिशेत् पूर्ववन्मंडलं कृत्वा पूजये
त्पूर्ववर्त्मना अन्नपात्रं विनिक्षिप्य हव्यं तत्र निधापयेत् दशाथाम्
लमंत्रेणाभिमंत्र्य जुहुनेत्ततः प्रणवं भूस्ततः स्वाहा इदमग्निचडे.
प्रतं तारं भुवो वह्निजाया इदं च वायवे पदं ॐ स्वः स्वाहा इदं सो
मप्रजाधिपतये ततः इत्याहुतित्रयं दत्त्वा महाव्याहृतिसंज्ञकं
हव्ये वह्नौ तथा देव्याः आत्मनैक्यं विभावयेत् षडंगमनुना षडा
माहुतिं जुहुयात्ततः मूलांते स्वीयदेवानां नाम ङे. युतमुद्धरेत्
ततः स्वाहा समुच्चार्य अष्टोत्तरसहस्रकं हविषा च हुनेद्धीरक्ति
लेन पललेन वा अष्टोत्तरशतं वापि तदर्द्धं वापि साधकः अथवा
ष्टादशं कुर्यान्नित्यहोमे ह्ययं विधिः मांसेन मधुना चाज्यैर्मत्स्यैः पु
ष्पैस्तिलैस्तथा यवैर्धान्यैश्च मुद्राभिः कुलपुष्पैस्तथा फलैः अ
पामार्गैर्बिल्वपत्रैर्भृंगराजैः सुशोभनैः करवीरैर्जवापुष्पैरपराज्ञेण
किंशुकैः पद्मैश्च कुमुदैः कल्हैर्नीलरक्तोत्पलैस्तथा सौगंधिकैश्च बंधू
कैः केशरैश्चंपकैस्तथा जातीभिर्मालतीभिश्च मल्लिकाभिः कद
म्बकैः मनोरमैः प्रसूनैश्च फलैः पत्रैर्यथाविधि अनेन विधिना मं
त्री देव्या होमं समाप्य च पंचप्राणाहुती मूलैः षडंगानां षडाहुतीः
गुरुद्वन्द्वं चाग्निद्वन्द्वं समावास्य हुनेत्ततः क्रमादेकाहुतिं हुत्वा प्रत्येके
न तु साधकः आहुतित्रितयं हुत्वा पुस्तकेन सुसाधुनैवेद्यमर्पयेत्ततः
पुनराचमनीयं तद्दत्वा विन्दौ समानयेत् संहारमुद्रया देवीं गेंश्र
मयेत्ततः परं वह्निजायांतमंत्रेण आहुतित्रितयं हुनेत् विसृज्या

कौ ग्निंच देवींच शंखघंटांचवादयेत् तर्पयित्वाततोदेवींचक्रस्यां प
३८ रमेश्वरीं देव्यांतस्यांमूर्द्धिकृत्वा शेषंकर्मसमाचरेत् ततश्चकौ
38 लिकैःसार्द्धंपानंकुर्यात्कुलामृतं पंचतत्त्वंमहादेव्यैदत्वानस्वीक
रोतियः नैवेद्यादितथासोपिदेवीनांशापभाग्भवेत् रोगीदुः
खीदरिद्रश्चभूत्वानरकमाप्नुयात् एकाकीनाचरेत्पानंकौलिकैः
माययासह पानंचत्रिविधंप्रोक्तंदिव्यवीरपशुक्रमात् दिव्यंदेव
व्रतःपानंवीरमेकांतवासिनं संस्कारादिविहीनंयत्तत्पानंपाशवंस्मृ
तं इतिश्रीज्ञानानन्दपरमहंसविरचितेकौलावलीनिर्णयेसप्त- ७
क्रमंतस्यप्रवक्ष्यामिचतुर्वर्गप्रदायकं अन्नमध्येन्वष्टपत्रंपद्मंनि
र्मायतत्रवै कारणैःपूर्णपात्रंतुसंस्थाप्यतत्रसाधकः षडदी
र्घमाययाचैवषडंगन्याससमाचरेत् ततोध्यायेदन्नपूर्णांपरमा
नन्ददायिनीं आदायदक्षिणकरेणसुवर्णदर्वींदुग्धान्नपूर्णामि
तरेणचरत्नपात्रं भिक्षाप्रदाननिरतांनवहेमवर्णामम्बांभजेस
कलभूषणमाल्यशोभां एवंध्यात्वामहादेवींतत्राबाह्यतुसाध
कः तत्वमुद्रांप्रदर्श्याथइदमन्नामृतंवदेत् हृदयंहंहमुच्चार्यन
मःस्वाहाततःपरं तत्रसंपूजयेद्धन्यामन्नपूर्णांयजेत्ततः तारंच
भुवनेशानींश्रीबीजंकामबीजकं हृदंतेभगवत्यन्तेमाहेश्वरी
पदंलिखेत् अन्नपूर्णेअग्निजायात्वन्नपूर्णामनुत्तमं यथाशक्ति
जपंकृत्वास्तुत्वादेवीसमाहितः अर्चयित्वातुदेवेशींकौलिकान्ना
र्चयंतिये पापिष्ठास्तेचंडिकायाःप्रसादभाजनंनहि नैवेद्यंत

रतोन्यस्तं दर्शनात्स्वीकृतं मया साधुभक्तस्तु तिकाया
मप्याति कमलेश्वराग वसंति तस्यजिह्वायां शिवशास्त्रादिदे
वताः तस्मात्कौलिकवक्त्रेषु होतव्यं साधुकोत्तमैः चण्डिकायाः
प्रियाकांक्षी देवीभक्तान्यजेत्सदा ॥ कौलानां लक्षणं वक्ष्ये
यथा तंत्रानुसारतः निवृत्तिदुःखसंतुष्टा विद्यागमविमत्सराः
कुलज्ञानरताः शान्ताः शिवभक्ता दृढव्रताः कीर्त्यमाने कुलेये
षां रोमांचगद्गदस्वराः आनन्दाश्रुयुता धीराः कथिताः कौलिके
श्वराः सर्वधर्माधिकोलोके कुलधर्मः शिवोदितः इतियेनि
श्चितधियः प्रोक्तास्ते कौलिकोत्तमाः योभवेत्कुलतत्त्वज्ञः कुल
शास्त्रविशारदः कुलार्चनरताः पुंसः कौलिकास्तेधिकाः सदा
कुलभक्तात्कुलाचारात्कुलज्ञानात्कुलव्रतात् प्रीतो भवति ये
इष्टाः कौलिकः सशिवप्रियः पंचतत्त्वस्वीकरणात् मूलमंत्रार्थ
तत्त्ववित् देवतारुद्रभक्तश्चेत्कौलिकः स्यात्तदीक्षया दुर्लभं
सर्वलोकेषु कौलिकाचलक्षणं यः प्राक्तिंस्वयमाहृय
कुलभिज्ञानथैवच अभ्यर्च्य देवतां बुद्ध्या गंधपुष्पाक्षतादि
भिः मादिभिः पंचमुद्राभिः यद्भक्त्या परितोषयेत् तेषु दत्तेषु
सन्तुष्टाः शिवाद्याः सर्वदेवताः कुलज्ञानीवसेयत्र सदेशः पु
ण्यभाजनः दर्शनादर्चनात्तस्य त्रिसप्तकुलमुद्धरेत् कुलज्ञा
निनमालोक्य स्वगृहे न्यस्तदेहे स्थिते समायांति सदा तत्र योगि
न्यो योगिभिः सह प्रविश्य कुलयोगीशो भुञ्जन्ते पितृदेवताः

कौ यत्कृतं कुलनिष्ठानां तद्देवानां कृतं भवेत् देवाः कुलप्रियाः स
३९ र्वे तस्मात्कौलिकमर्चयेत् ब्रह्मेन्द्राच्युतरुद्रादिदेवतामुनिशा
३९ त्तमाः कुलधर्मपरा ह्येते मानुषेषु च का कथा न तद्दानं चंडि
कान्यव्रतथातः स्यात्सुपूजिता कौलिकेन्द्रे र्चिते सम्यग्यथा त
ष्टा तु चंडिका यत्फलं कौलिकेन्द्राणां पूजनाल्लभते सुधीः
तत्फलं नाप्नुयात्तीर्थे तपोव्रतमखैः सदा पूजनाज्जपनाद्धो
मात्तद्धानं विविधस्तथा कौलिकस्य भवेद्यर्थे कौलिकं योव
मानयेत् श्मशानं तद्गृहं विद्धि पापिष्ठः श्वपचाधमः कुलनि
ष्ठं परित्यज्य यस्त्वान्यस्मै प्रदीयते तद्दानं निष्फलं विद्याद्दातापि
नरकं व्रजेत् पापाचारसमायुक्तं सर्वलोकवहिष्कृतं त्रायते
हि कुलद्रव्यं कुलयोगीश्वरार्पितं कौलिकेन्द्रः सकृद्भुंक्ते पुण्यं
कोटिगुणं भवेत् किं पुनर्बहुभिर्भुक्तैस्तत्पुण्यं नैव गम्यते
तस्मात्सर्वप्रयत्नेन सर्वावस्थासु सर्वदा कुलधर्मपरो भूत्वा
कुलज्ञानिनमर्चयेत् नन्दंति पितरः सर्वे गायंति च पितामहाः
प्रपितामहास्तु नृत्यंति कौलिके गृहमागते यज्ञकोटिफलं
तस्य वाजपेयशतानि च ददाति कौलिकेभ्यश्च विन्दुमात्राणि
संगमात् पृथिवी हेमपूर्णा च कल्पकोटिप्रदानतः तत्पद
स्पर्शनाद्धानात् कौलिके यागमन्दिरे कौलिकेषु प्रसन्नेषु प्र
सन्ना चंडिका भवेत् संस्मृतः कीर्तितो दृष्टो वन्दितो भावितो
पि वा पुनाति कुलधर्मिष्ठः श्वपचोऽपि यदृच्छया सर्वलोका

पि मूर्खो वाऽज्ञमो वाथ सोपि वा सर्वथैव शिवः सोपि तस्माद्यत्नं
समाचरेत् सधन्यः खलु लोकेषु पुरुषः क्षीणकल्मषः यत्समी
पं समायांति कुलचार्याश्च साधकाः अथ कौलान्समानीय शाक्ती
श्चैव विशेषतः स्वशक्तिं वीरशक्तिं वा दीक्षितां दक्षिणां मय
पाययित्वा पिबेद्द्रव्यमिति शास्त्रस्य निर्णयः अनिवेद्य तु यः
शक्तो कुलद्रव्यं निषेवते पूजा च विफला तस्य देवता न प्रसीद
ति विना यंत्रेण या पूजा विना मांसेन तर्पणं विना शाक्त्या तु य
त्पानं तत्सर्वं निष्फलं भवेत् आगतो यो निवर्तेत अनाहूतोपि
यो विशेत् चक्रमध्ये स पापी स्यात्सर्वधर्मबहिष्कृतः तिर्यग्
योनिमालभ्य नरकान्प्रतिपद्यते पूजास्थाने प्रयत्नेन आस
नानि प्रदापयेत् ततः कौलाः स्त्रियः सर्वाः प्रक्षाल्य पाणिपाद
कं प्रणम्य प्रविशेच्चक्रं मुद्राभिः पंचसंज्ञकैः क्षीणमत्यन
संस्थानं पुंसामन्यतमं समहृत् अथवा मिथुनं कृत्वा क्रमात्संप्र
वेशयेत् पंक्त्याकारेण वा सम्यक् चक्राकारेण वाथवा चक्र
मध्ये तु मूढात्मा जातिभेदं करोति यः तं भक्षयंति योगिन्य
स्तं शापयेच्चंडिका सदा जातिभेदो न चक्रेऽस्मिन्सर्वे शिवसमाः
स्मृताः प्रवृत्ते भैरवीचक्रे सर्वे वर्णा द्विजातयः निवृत्ते भैरवीच
क्रे सर्वे वर्णाः पृथक्पृथक् अथवा रहस्यमार्गे निरता ये ये व
र्णा भवंति हि ते ते विप्राः सर्वथैव सत्यं सत्यं न संशयः स्वर्गादि
पुण्यलोकेषु देवादन्यो यथा न हि तथैव चक्रमध्ये तु देवाः स
र्वे तु मानवाः देवेपि स्थितमेवं हि सर्वं ब्रह्मेति चाब्रवीत् बहु

कौ नात्रकिमुक्तेनचक्रमध्येतुसाधकाः पुरुषाः शिवरूपाश्चदेवी
४. रूपाः स्त्रियः सदा शिवशक्तिधियासर्वाश्चक्रमध्येसमर्चयेत्
संस्कारंक्षेपेद्भ्रमतोलतासेगंधचन्दनं शक्तीनांसाधकानांच
तिलकंचमहादत्तो कृत्वावलेपनंमाल्यंप्रदद्यात्साधकोत्तमः
नस्थूलंनहिस्वल्पंचपात्रंकृत्वामनोरमं नयनाग्निवानसंख्या
तैः कर्यंतुसाधकोनच हेतुपानंप्रकर्तव्यंइत्युक्तंकुलसाधने
इत्यप्यधिकपात्रंतुनकर्तव्यंतुसाधकैः कराभ्यांपात्रमुद्धृत्यद्वि
तीयंचयथाक्रमात् ततःश्रीगुरुपादायसात्मात्मरशिवायच
समांसंदेवताबुद्ध्यासमर्पयेद्यथाक्रमात् कृत्वामृतरसंस्पृष्टं
गुरवेतदनंतरं योषिद्भ्यस्तुविशेषेणवीरेभ्यश्चततःपरं कुल
ज्ञायकुलीनायकुलभक्तायदापयेत् गुरुभ्योगुरुपात्रंचशा
क्तेभ्यःशक्तिपात्रकं वीरेभ्योवीरपात्रंचभोगपात्रंस्वयंपिबे
त् मातायदिगुरुर्नस्यात् तदातोयेविसर्जयेत् सुधाबुद्ध्या
ततः सर्वेगृहीत्वापात्रमुत्तमं ध्यानंकुर्यात्तथादेव्याः यथाशा
स्त्रप्रमाणतः समुद्रेमथ्यमानेतुक्षीरोदधौसागरोत्तमे तत्रोत्पन्ना
तथांदेवीकन्यकारूपधारिणी गोमूत्रसदृशाकारांफेनाढ्य
तसमुद्भवां अष्टादशभुजैर्युक्तांनीरजायतलोचनां आनन्दाधि
ख्येजातआनन्दश्चमहेश्वरः तस्यायोगाद्भवेद्ब्रह्माविष्णुश्चशि
वएवच तस्मादिमांसुरादेवींसर्गोहंतांभजाम्यहं एवंध्यात्वामू
लमंत्रंसप्तवारंजपेत्ततः तस्योपरितत्तोवीरःपंचमुद्रांप्रदर्शयेत्
धेनुयोनिंततःपश्चाद्दर्शयेच्चपुनःपुनः तालत्रयंछोटिकाभिः

कुर्वीत दिक्षुबन्धनं पूर्ववत्तर्पणं मूर्द्धि आनन्दभैरवं तथा आनन्द
भैरवीं देवीं गुरुपंक्तिं प्रयत्नतः इष्टदेवं रश्मिवृन्दं गणेशं क्षेत्रपालकं
वटुकं भैरवं चैव योगिनीं डाकिनीं तथा महाभूतान्दिग्गदांश्च तर्पयेत्त
यथाक्रमात् अयष्ट्वा भैरवं देवं मकृत्वा गुरुतर्पणं पशुपानविधौ
पित्वा वीरोपि नरकं व्रजेत् गुरुपंक्तिमसंतर्प्य रश्मिवृन्दं तथैव च
यः पिबेत्कौलिको द्रव्यं तस्य पानं तु पाशवं कौलज्ञानं विना योपित
द्रव्यं भोक्तुमिच्छति स महापातकी भूयात्सर्वकर्मबहिष्कृतः सेवेत म
द्यमांसानि तृष्णावशेन पातकी भवेत् मंत्रार्थस्मरणार्थं तु मनसः
स्थिरहेतवे भेदपाशविनिर्मुक्तो मद्यपानं समाचरेत सेवेत यः स्व
स्वार्थी मद्यादीनि स पातकी आशयेद्देवताप्रीत्यै तन्मांसानि साधकः
पंचमुद्राणि सेवेत अन्यथा पातकी भवेत् यागफलं विनान्यत्र हर्ष
णं जायते सदा यः शास्त्रविधिमुत्सृज्य वर्तते कामचारतः न स सिद्धि
मवाप्नोति परत्र नरकं गतिं स्वेच्छया वर्तमानो यो दीक्षासंस्कारवर्जि
तः न तस्य सुकृतिः कापि तपः सुकृतादिभिः पूर्णाभिषेकयुक्ता
नां पानमत्यंतमिष्यते पूर्णाभिषेकहीनानां पानमत्यंतदुर्गतिः अ
कृत्वा कौलिकाचारमयष्ट्वा गुरुपादुकां ये स्मिन्चक्रे प्रवर्तन्ते तेषां
हिंसंति भैरवाः अदीक्षितैरनाचारैर्मुद्रामंत्रविवर्जितैः जपपूजां विना
नैव न कुर्याद्द्रव्यभक्षणं भक्षणान्नरकं याति निष्कृतिर्नैव जायते
मंत्रसंस्कारशुद्धात्मा अलिपानं समाचरेत् जायते देवताभावो भवब
न्धं विमोचयेत विचारयेत्ततो वीरः सत्तर्केण विशेषतः सिद्धान्तं भे

कौ ते विप्राश्च वर्णेश्चाम्लकसंभवं कांजिकं कासमर्दं च तथैव च शिवाद्यु
५१ ते एतेषु यदि दोषो स्ति तदा सर्वत्र दोषभाक सुरां पीत्वा द्विजो मोहा
दग्निवर्णां सुरां पिबेत् इति मंत्रादिशास्त्रेषु निषेधः परिनिश्चितः
मोहादज्ञानतः पीत्वा प्रायश्चित्तं विधीयते यत्पाने दूषणं प्रोक्तं प्राय
श्चित्तं तदेव हि देवान्पितॄन्समभ्यर्च्य वेदशास्त्रोक्तवर्त्मना ज्ञानतो
भैरवी चक्रे ज्ञानिनां नैव दूषणं गुरुं स्मरन्पिबेन्मद्यं खादन्मांसं न दोष
भाक् न मांसभक्षणे दोषो न मद्ये न च मैथुने यथाक्रतुषु विप्राणां
सोमपानं विधीयते मद्यपानं तथा कार्यं समये भोगमोक्षदं
फलार्थिना महद्भाव रतां भूषणमेव हि निरहंकारिणां चैव न निषे
धो न वा विधिः पाने भ्रांतिर्भवेद्यस्य द्भुणा स्याद्भक्षणे तथा मोः स्त्रीहेया
स्पृहता भ्रांतिराशंका चैव मैथुने न भ्रष्टः पूजयेच्चण्डीं देवीमंत्रंक
थं जपेत् रोगी दुःखी भवेत्सोपि रौरवे नरके व्रजेत् तस्मादद्वै
तभावेन साधकः पंचमं भजेत् पात्रं ब्रह्मा सुरा विष्णुः रसा रुद्र
एव च आनन्दः शेश्वरः प्रोक्तः आनन्दस्तु सदाशिवः मद्यस्तु भैर
वो देवो मदः शक्तिः समीरिता प्रक्षोभकं च मद्यं हि मोहयेत्त्रिदशान
पि सुराशक्तिः शिवो मांसं तद्भोक्ता भैरवः स्वयं तयोरैक्यं समु
त्पन्नं आनन्दो मोक्ष उच्यते आनन्दो ब्रह्मणो रूपं तच्च द्रव्ये प्रति
ष्ठितं तस्याभिव्यंजनं मद्यं योगिभिस्तेन पीयते एवं विचिंत्य मतिः
मान्द्रव्यशोधनमाचरेत् पूर्वं वा हि विना वीरः पात्रस्वादनं चरे
त् श्रीमद्भैरवशेखरप्रविलसच्चन्द्रामृताप्लाविते क्षेत्राधी

सर्वयोगिनीगणमहासिद्धैः समासेवितं आनन्दार्णवकंमहाम
कमिदंसाक्षात्त्रिखंडा स्मृतं वन्देश्रीप्रथमं कराम्बुजगतं पात्रं विशुद्धि
प्रदं १ वन्दयित्वाततः पात्रं पठेद्भक्तिपरायणः ज्ञानताज्ञानता
वापियन्मयाक्रियतेशिवे तवकृत्यमिदंसर्वमितिमत्वाक्षमस्वमे
इतिमत्वामहादेवामन्योन्यवंदनंचरेत अनुज्ञांप्रार्थितोलब्ध्वागृह्णा
मीतिस्वयंवदेत् तुपरखेत्यभानुज्ञातोगुरुणावाकुलीनकैः गृह्णी
यात्स्वयंसिद्धोवद्दयम्रासनः स्वर्थीः सव्येनोद्धृत्यपात्रंचमुद्रांहत्वा
तुसव्यतः विलासाहनयोगेननकुर्याद्दव्यभक्षणं नोद्धरेदेकह
स्तेनपिबेदेकेनपाणिना ततः संचिन्तयेद्देवींप्रकृतिंपरमांकलां
आत्ममूलेत्रिकोणस्थेकोटिसूर्यसमप्रभे कुंडलीशक्तिचिद्वह्नौ
हुनेद्द्रव्यंसमंत्रकं सशाह्नंनापिवेद्द्रव्यंनविन्दुंपातयेदथः सशा
ह्नंयोपिवेत्कुर्यात्कुलदेव्यास्तुतर्पणे सोरवंनरकंयातियावदाहूत
संप्लवं विनाचर्वणयत्पानं केवलंविषवर्द्धनं तस्मात्प्रचर्वयेत्
र्व्यंयथाक्रमविधानतः एकासनेनिविष्टायेभुंजानाश्चैकभाजने
एकपात्रेपिवेद्द्रव्यंतेयांतिनरकंकिल उच्छिष्टंनस्पृशेत्पात्रंकु
लद्रव्याणिसर्वथा वहिः प्रक्षाल्यचक्रेषुकुलद्रव्याणिदापये
त् नैवहस्तेनदातव्यंनमुद्रावर्जितंसदा निष्ठीवनंमलंमूत्रंअथो
वायुविसर्जनं चक्रमध्येतयःकुर्यात्सभवेत्योगिनीपशुः परीहा
संप्रलापंचवितण्डांवक्रभाषणं उदासीन्यभयंक्रोधंचक्रमध्ये
विवर्जयेत् नपादाभ्यांस्पृशेत्पात्रंमध्यमांगेनसर्वथा नपात्रंचाल

कौ येत्स्थानात्तु कुर्यात्पात्रशंकरं सपात्रं नोद्धरेत्पात्रं तथैव च न पूरयेत्
५२ पात्रं न पात्रमानयेदथः साधारं नोद्धरेत्पात्रमनाधारे न निःक्षिपेत्
रिक्तपात्रं न कुर्वीत न पात्रं भ्रामयेत्सदा न पात्रं लंघयेद्धीमानुत्क्षि
42 प्य न च पातयेत् समीनं च पुनः पात्रं प्रदद्यात्तु यथाक्रमम् व
न्दयेत्तु पुनः पात्रं इमं मंत्रं स्मरेद्बुधः ह्रैं मं मीनरसावहं दयितया
दत्तं च पेयादिभिः किंचिच्चंचलरक्तपंकजदृशा तस्यै समावेदितं
वामे स्वाङ्गविशुद्धिशुद्धिकरणं पाणौ निधायात्मके वन्दे पात्रम
हं द्वितीयमधुनानन्दैकसम्बर्द्धनं २ पूर्ववत्तर्पणं कृत्वा तृतीयं
च समाचरेत् मुद्रया सहितं कृत्वा वन्दयेत्पात्रमुत्तमं सर्वाम्नायक
लाकलापकलितं कौलद्रुमद्योतकं चन्द्रोपेन्द्रमहेन्द्रशंभुवरु
णब्रह्मादिभिः सेवितं ध्यातं देवगणैः परं मुनिगणैः मोक्षा
र्थिभिः सर्वदा वन्दे पात्रमहं तृतीयमधुना स्वात्मावबोधं तमः ३
पूर्ववत्तर्पयित्वा तु तुरीयं वन्दयेत्ततः मद्यं मीनरसावहं हरिहर
ब्रह्मादिभिः पूजितं मुद्रामैथुनधर्मकर्मनिरतं ताराप्रतिक्ताश्रयं
आचार्याष्टकसिन्धुभैरवकलामांसेन संशोधितं पायात्पंचम
कारतत्त्वसहितं पात्रं चतुर्थं नमः ४ इति चतुर्थपात्रवन्दनम्
पूर्ववत्तर्पयित्वा तु पंचमं वन्दयेत्ततः आधारे भुजगाधिराजवल
ये पात्रं महीमण्डलं मद्यं सप्तसमुद्रवापि पिशितं चाष्टौ च दिग्दन्तिनः
सोऽहं भैरवमर्चयन्प्रतिदिनं तारागणै रक्षितै रादित्यप्रमुखैः सुरा
सुरगणैराज्ञाकरैः किंकरैः ५ इति श्रीपंचमपात्रवन्दनम् ॥

अथषष्टपात्रवन्दनंयथा ॐ रुद्रंवामरमद्यपीठपरमानन्दोदितंदीप
नम् वामांराज्यमनोरमांशुभकरांसाध्वञ्जमामात्मकम् नानाव्या
धिमदान्धकूपदहनंजन्मान्तरेनाशनम् श्रीमत्स्वन्दरितपिण्डंहरि
रसंपात्रंवषष्ठंभजे अमन्त्रंसर्वंपूर्ववत् अथसप्तमपात्रवन्दनम्
यथा ॥ ॐ ज्ञानात्मस्वमस्तभुक्तिकार्थ्यंपरतत्त्वेतत्समाहित्प्रदम् वि
न्दुभास्करवह्निचन्द्रयतुमोज्योतिःकलाचार्पितम् इडापिङ्गल
मध्यमातिवलयायक्रान्तीमध्यगाम् पात्रंसप्तमंषरणेनप
रमानन्दाधिकंपातुमाम् इत्यमन्त्रंसर्वंपूर्ववत् अथाष्टमपात्र
वन्दनम् ॥ ॐ मूलाज्ञानकन्दकाननकठोराग्निस्वरूपापराम
ज्ञानव्यस्तसमस्तसंशयधियांपूर्णांस्वधाधारया भोगंमोक्ष
करंस्वभावशाकरंमूर्धिज्वलन्तींपराम् देवीवत्तसिंसंजनयन्त्र
न्तुदिनेपात्रंभजेचाष्टमम् इत्यमन्त्रंसर्वंपूर्ववत् अथनवमपा
त्रवन्दनम् यथा ॐ मम्येव्रलमयंसमस्तजगतांसारंमहत्ता
त्वतम् उन्नेयंभवभोगवंवलयिधाम्स्थलाकृतिर्भायतास्
अस्माकंद्रवरूपतांकरुणयाप्राप्तंतदेतत्कृतम् तत्पात्रंनवमं
पिवेत्वनियतंभुक्तिंचमुक्तिप्रदम् इत्यमन्त्रंसर्वंपूर्ववत् अथद
शमपात्रवन्दनंयथा ॐ वामेचन्द्रमुखीमुखेवमधुरंपात्रंकरो
मोरुहे मूर्ध्निश्रीगुरुचिन्तनंभगवतीध्यानास्पदंमानसे जिह्वा
यांजपसाधनंपरिणतंकौलक्रमाभ्यासनम् तत्पात्रंदशमंपिवे
त्परमंभुक्तिंचमुक्तिप्रदम् इत्यमन्त्रंसर्वंपूर्ववत् अथएकादशपा

त्रवन्दनम् यथा ॐ वामांसा वामकरे स्वधां च अधरे मंत्रजपध्यानमे
वीणावेणुरवावंधत्रविधिवध्नायन्तिपंचो रसः क्रीडाकेलिकतू
हलेन कमला लावण्यलीलारसः पात्रोल्लासविलासपूर्णसमये
पात्रं च एकादशम् रसमत्स्यं वपूर्ववत् सर्वपात्रेषु आकुर्य्युः तत्रतः
यावन्न चलते दृष्टिर्यावन्न चलते मनः तावत्पानं प्रकुर्वीत पशुपा
नमतः परम् तेन यावद् दृष्ट्यादिकं न चलते तावत्परिमाणं पान
स्येति तत्रैवाह समयातन्त्रादौ मन्त्रार्थस्फुरणार्थाय ब्रह्मज्ञान
स्थिरायच अलिपानं प्रकर्त्तव्यं लोलुपो नरकं व्रजेत् यद्वा पंच
मं पंचमं कुर्य्याद् यावदेकादशावधि तत्रत्य पूर्णे तरेऽथवाश
क्तौ दद्यात् पूर्णाहुतिं बुधः तेन पञ्चमारम्भे दतेन मंत्रेण ॐ य
मीयमिह विदीमि आत्माग्नौ मनसा स्रुचा सुषुम्नावर्त्मनानित्यम
क्षवृत्तीर्जुहोम्यहम् स्वाहेति मूलमंत्रेण मंत्रमेनमुदीरयन् पंचम
पंचमं कुर्य्याद् दत्ते पूर्णाहुतिं चरेत् अन्ते एकादशपात्रान्ते तदश
क्तौ नवमं सप्तमं पंचमं एवेत प्रागेवोक्त पूर्णाहुति मन्त्रस्तु ॐ प्र
काशाकाशहस्ताभ्यामवलंब्योन्मनी स्रुचा धर्माधर्मकलास्ने
हपूर्णमग्नौ जुहोम्यहम् स्वाहेति मूलमंत्रान्ते प्रोच्य तत्त्वसमुत्सृजेत्
ततः स्वस्वकर्म्मोक्तस्तवपाठानन्तरम् ॐ नश्यन्तु प्रेतकूष्माण्डाः न
श्यन्तु दूषका नराः साधकानां शिवाः सन्तु आम्नायपरिपालिनां
जयन्ति मातरः सर्वा जयन्ति योगिनीगणाः जयन्ति सिद्धडाकि
न्यो जयन्ति गुरवः सदा जयन्ति साधकाः सर्वे विशुद्धाः साधकाश्च

ये समयाचारसम्पन्ना जयन्ति पूजका नराः नन्दन्तु अणिमासिद्धा
नन्दन्तु कुलपालकाः नन्दन्तु अणिमासिद्धा नन्दन्तु कुलपालकाः
इन्द्राद्या देवताः सर्वे तृप्यन्तु वास्तुदेवताः चन्द्रसूर्यादयो देवास्तृ
प्यन्तु मम भक्तितः नक्षत्राणि ग्रहा योगाः करणा राशयश्च ये स
र्वे ते सुखिनो यान्तु सर्पा नश्यन्तु पक्षिणः पशवस्तुरगाश्चैव पर्वताः
कन्दरा गुहाः ऋषयो ब्राह्मणाः सर्वे शान्तिं कुर्वन्तु मे सदा स्तुता
मे वन्दिताः सन्तु मित्राणि हृष्यन्तु पूजकाः ये ये पापधियास्सुदूषण
रता मन्त्रिन्दकाः पूजने वेदाचारविमर्दनप्रहृदया भ्रष्टाश्च ये साध
काः दृष्ट्वा चक्रमपूर्णमन्दहृदया ये कौलिका दूषकास्ते यान्तु
विनाशमत्र समये श्रीभैरवस्याज्ञया साधकानां च ये द्वेष्टारः सदैवा
म्नायदूषकाः डाकिनीनां मुखे यान्तु तृप्तास्तत्पिशितैः स्तुताः
शत्रवो नाशमायान्तु मम निन्दाकराश्च ये द्वेष्टारः साधकानां च
ते नश्यन्तु शिवाज्ञया ॐ इति शान्तिस्तोत्रपाठानन्तरं श्रीकुला
र्चकानामानन्दस्तोत्रपाठस्यावश्यकत्वात्तदपि लिख्यते यथा
रत्नमालायाम् ॐ नमाम्यहं मङ्गलयोगमुद्रां सौन्दर्यलक्ष्मीं
भुवि वै जयन्तीम् श्रीसुन्दरीमिन्दुकलावतंसां सानन्दमान
न्दमयीं स्मरामि श्रीसुन्दरीपूजनतत्पराणां हालाभिराघूर्णित
लोचनानाम् अस्माकमानन्दितमानसानां माहेश्वराणां दिव
साः प्रयान्तु नित्या यथा शांवदने सुधानां श्रीचक्रमभ्यर्च्य कुलक्र
मेण आस्वाद्य मद्यं पिशितं मृगाक्षीमालिङ्ग्य मोदं सुधियः प्रया

न्तु दिनेदिने तीर्थघटोःस्तुपूर्णो दिनेदिने तर्पणमस्तु देव्याः दिनेदि
नेस्यघटंताद्वितीयं दिनेदिने पञ्चममङ्गलोऽस्तु आस्वादयन्तःपिशि
तस्यावंणऽभाकएदपूर्णांमदिरांपिबन्ति वामेक्षणासङ्गममादयाना
भुक्तिंचमुक्तिंचनराःप्रयान्ति नास्वादलाभःपिशितस्ययस्मिन्नव
र्ततेहेतुकथानयस्मिन् नयत्रसङ्गोमृगलोचनायास्तत्तद्दिनंदु
र्दिनमेवमन्ये प्रवर्तकानांसहसाचलक्ष्मीःप्रयात्युरुगेहेषुपदक्रमे
ण श्रीसुन्दरीसाधकनिन्दकानामायुःक्षयंगच्छतितत्क्षणेन स्वां
गेषुकुष्ठंस्वगृहेषलक्ष्मीर्वहुःशरीरेभवनंश्मशानम् श्रीसुन्दरी
साधकनिन्दकानांआयुश्चवित्तंचलयंप्रयाति हालांपिबन्तोदिति
मन्दिरेषुस्वपतिंशयानागणिकागृहेषु गृहेगृहेभोजनमेवकुर्वन्
वंभ्रमन्तेसाधकचक्रवर्ती अनन्तरंकालवशेनयोऽहंसोऽहम
विद्यामिनमेवविषादः श्रीसुन्दरींतांसततंस्मरामिदिंनततङ्करवा
सोऽहमेव विकल्पवाटीनटसन्निकर्षेप्रवर्तमानाःपशवोवराकाः
प्रविश्यमानास्वयमेवादेयजन्तयानिन्दतिकौलमार्गम् उन्मूल
नमात्रविनिन्दकानांउन्मीलनंचित्तकुतूहलानाम् आकर्षणंप
करुहेक्षणानांमैरेयपानंस्वयमाचरामि वाराणसीजह्नुसुताप्र
यागकेदारतीर्थानिमहात्म्ययासः तेनैवपुण्येनजगस्तुनाहश्री
सुन्दरीचिन्तनष्ठेवनत्थम् आयातयातेनभवाभिलाषोजातोमहा
नेवममप्रवासः मोनायनाथस्यपदप्रसादादङ्गीकृतःसम्प्रतिकौल
मार्गः नांथमजेऽहंननथानामीडेनान्यस्मरेनोपनराश्रयामि अद्यापि

नाहं शरमाश्रमावं श्रीसुन्दरीचेतसि विस्मरामि विलिख्य सिन्दूरम
यं सुराभिः श्रीचक्रमिश्रं निशितं प्रयन्तः श्रीसुन्दरीचेतसि चिन्त
यन्तः कृपावलोकैर्वशयन्ति लोकान् यत्रास्ति भोगो न च तत्र मो
क्षो यत्रास्ति मोक्षो न च तत्र भोगः श्रीसुन्दरीतर्पणतत्पराणां भो
गश्च मोक्षश्च करस्थ एव वामे रामारमणकुशलाद्दक्षिणे चालि
पात्रं अग्रे मत्स्यं मरिचसहितं शूकरस्योष्णमांसम् स्कन्दे वीणा
ललितसुभगा सत्कथा सद्गुरूणां कौलो धर्मः परमगहनो यो
गिनामप्यगम्यः वामे चन्द्रमुखी सुखे च मधुरं पात्रं करांभोरुहे
मूर्ध्नि श्रीगुरुचिन्तनं भगवतीध्यानास्पदं मानसे जिह्वायां न
पसाधनं प्रयतिभिः कौलक्रमाभ्यासनम् मत्तो नियतं पिबन्ति
सततं भक्तिं च मुक्तिं नराः करे पात्रं मुखे स्तोत्रं आनन्दहृदयाम्बुजे
मूर्ध्नि श्रीगुरुचिन्ता च चिन्तनं किमतः परम् एकेन शुष्कचणके
न घटं पिबामि द्वाभ्यां पिबामि सहसालवणार्द्रकेन आस्वादया
मि यदि रोहितमुण्डखण्डं गङ्गां पिबामि यमुनां सहसागरां च
ये देव्याः क्रमदूषकाः समयिनां सुद्वेजकाः सद्गुरोर्द्वेष्टारः कुला
योगिनीगणमनस्तापाः कुलद्वेषिणः वीरद्रव्यविनिन्दकाः कु
लवधूर्वैहासिकाः दुर्जने द्रोहाचारधियः पतन्तु नियतं योगि
नीनां मुखे अलिपिशितपुरन्ध्रीभोगपूजारतोऽहं बहुविधकुल
मार्गारम्भसम्भावितोऽहं पशुजनविमुखोऽहं सुन्दरीमाश्रितोऽ
हं गुरुचरणरतोऽहं भैरवोऽहं शिवोऽहं करे माला मुखे हाला

कौ ३
४५
45

वामेवालास्तुकोमला हृदयेत्रिपुराबालाअन्नपूर्णालाशृङ्गेशृङ्गे अकु
लकुलमयन्तीचक्रमध्येस्फुरन्ती मधुरमधुपिबन्तीसाधकान्तो
षयन्ती दुरितमपहरन्तीकण्ठकान्वर्धयन्ती जयतिजयवदन्ती
सुन्दरीक्रीडयन्ती कदाचिद्भैरवीचक्रेलभेचिन्ताररसंयदि तदाम
द्यादिकंपीत्वास्वमेरुरूपस्थगमाहरेत् इत्यानन्दस्तोत्रंसमाप्तम् ॥
चक्रमध्येघटेभग्नेपात्रेचपतितेतथा दीपेनिर्वाणमापन्नेपुन
रर्कंसमाचरेत् पाययित्वायथाभोग्यंपात्रावसाधकोत्तमः पु
नःसंतर्पयेद्देवींपरिवारसमन्वितां पुनर्माल्यादिकंदत्वागन्ध
चन्दनमिश्रितम् धूपदीपंततःपश्चाद्दर्पणंचामरंतथा नैवेद्य
शंखघण्टांचवादयेत्तुमनोहरम् यथाशक्तिस्तवंकृत्वाप्रद
क्षिणीकृत्यसाधकः सपुष्पाञ्जलिमन्तेनीत्वाआत्मानंचसमर्पयेत्
इतःपूर्वंततःप्राणबुद्धिदेहेततोवदेत् धर्माधिकारतोजाग्रत्स्व
प्नसुषुप्त्यवस्थासुच कर्मणामनसावाचाहस्ताभ्यांवाततःपद्भ्या
मुदरेचशिश्नाचयत्कृतंयत्स्मृतंततः यदुक्तंप्रोच्यतत्सर्वंमामदी
यंचसंलिखेत् सकलंश्रीमदिष्टान्तेदेवतायाचपदेततः समर्पणंत
तःपश्चादनेनैवसमर्पयेत् देवीपदेततोदत्वानमस्त्वेतिवदेत्ततः
पुनराचमनीयंचदद्यादेव्यैपुनःपुनः समस्तावरणंदेव्याश्चाङ्गेली
नंविभाव्यच अर्घ्यपात्रंततःपश्चादुत्थाप्यसाधकोत्तमः देवपरिवि
धाभ्यामनिवेदयेत्ततःपरम् तेजोमयीमहादेवींसंहारमुद्रयाहृ
दि नासापथान्समानीयनिर्माल्यवासिनींयजेत् निर्माल्यकुसु

मेर्वीरः प्रणम्य गुरुपादुकाम् भक्तिभावेन ततः पश्चात्प्राणायामम
उद्धृको कृत्वा सोऽहं विभाव्याथ साधकः स्थिरमानसः अन्तरस्थेग
रोः स्थाने यन्त्रलेपं च धारयेत् नास्तिकेभ्यो न पशुभ्यो न मूर्खेभ्यो
न वा द्विजे कुलीनाय च दातव्यमथवा जलमध्यतः नैवेद्यं च गण
कादेभ्यो वा दद्यान्ति विबुधाः सदा तस्माद्देयं सदा पश्चाद्ब्राह्मणो विस
वेपि च सर्वं भक्ताय मूर्ध्याय गणेशाय यमाय च अग्नये वरुणा
यापि वायवे धनदाय च ईशानाय महादेवि साधकाय प्रकल्पये
त् अथवा तरुमूले च गर्ते वा शुचिदेशके पत्नतः साधकश्रेष्ठो
निर्माल्यानि समर्पयेत् शक्तिभ्यः साधकेभ्यश्च दत्वा निर्माल्य च
न्दनम् माल्यं गन्धं ततो दत्वा आत्मदेहं ततोऽर्चयेत् अथवा कार
येत् स्नानं मधुना वीरसाधकः श्रीपात्रं गृह्णीं कृत्वा आदौ वक्रं क
रोति यः पशुपानं भवेत्तस्य प्रायश्चित्ती स साधकः अर्च्यं स्मृतं ततो
वीरः सामयिकेभ्यो निवेद्य च ततश्च साधकश्रेष्ठः शेषमात्मनि यो
जयेत् पूर्वं देवेभ्यः पात्रं च प्रगृह्य साधकोत्तमः देवं मन्त्रमयं विधा
य पूरतः कृत्वा गुरोर्वदनं श्रीपात्रं कुलविद्यया विलसितं संशो
ध्य विद्यामन्त्रम् विद्यापीठं च तत्त्वं शिवपीठो मन्त्रोपसिद्धिका
मात् आस्वाद्यापि पिबेद् स स्वकरं दुःखस्य निर्मालनम् महापा
तकयुक्तो वा वकुपायायुतोऽपि वा अर्घस्य बिन्दुमात्रेण मुक्तो भ
वति पातकात् एवं पानं समाचार्य स्वीकृत्वा शूर्णपात्रकम् स्त्री
कुर्य्याद् व्रतं भूमौ न तत्पूर्णं भवेद् ध्रुवः तदर्धं तत्स्थितं भूमौ मायाबीजं

४
कौ विलिप्यच कनिष्ठांगुलिनावामहस्तस्यतिलकंस्तथा अनेनमन्त्र
४८ नामंत्रीमूलाद्येनसमाहितः यंयंस्पृशामिपादेनयंयंपश्यामिचा
48 क्षुषा सएवदासतांयातुयदिशक्रसमोभवेत् ततःप्रदद्यात्स्ववीरे
न्द्रोगोपयेपात्रमुत्तमम् ततोयथाक्रमेणैवप्रसादंपरिवेशयेच्च
भोजयेच्चततोविद्वान्स्त्रीभिश्चसाधकैःसह सत्कादद्यात्तुनर्मा
ल्यंगन्धचन्दनसंयुतम् तांबूलाभरणादींश्चयथातत्वंस्वसाधकः
सेवितेचकुलद्रव्येकुलतत्वार्थदर्शिनः जायतेभैरवावेशःसर्वत्र
समदर्शिनः मातरंवापिगच्छन्तंकौलिकंननिवारयेत् वारुणी
त्रिपुराकृष्टानततोहानिस्तुजायते कौलिकःपशुगामीचपरशक्ति
रमेहलात् गोष्ठीमध्येतुयत्नेनस्पार्शनस्पनकारयेत् भगिनींवा
सुतांभार्यांयोदद्यात्कुलयोगिने मधुमत्तायवीरायपूर्णेनस्पन
गणपते कुलकौलाययोदद्यात्सोपियोनौनजायते भगरूपाच
सादेवीरेतःप्रीताचसर्वदा रेतःसमर्पणेनस्मैमयेंमासैःसंमस
दा ध्यात्वाकुण्डलिनींशक्तिंरमन्रेतोविमुञ्चयेत् आमंत्रतय
दानारीवलायत्नात्तुलभ्यते आत्मदेहस्वरूपेणतंकर्णेमंत्रमुत
सृजेत् ततःसाशक्तिरूपास्यात्भुक्तिमुक्तिफलप्रदा रतिकालेच
दीक्षायामभिषेकंसमाचरेत् स्वरयारेतसावापिजलेनचन्दनांबु
ना संभोगेऽभिषिचेन्नारींरण्डांचमंत्रवर्जिताम् आदौबालांसमु
च्चार्यत्रिपुराद्यैसमुच्चरेत् नमःशब्दंसमुच्चार्यइमांशक्तिंततो
वदेत् पवित्रीकुरुशब्दांतेममशक्तिंकुरुप्रिये वह्निजायांसमुच्चा

र्य्यस्तु सिद्धिमन्त्रः प्रकीर्तितः अनेन मन्त्रेनाचैव अभिषिक्ताः स्त्रियः
सदा रममाणो भवेन्नित्यं सर्वसिद्धिमवाप्नुयात् इह लोके परं भोगं
भुक्त्वा मुक्तिमवाप्नुयात् रंभा शक्र्वशी मुख्या या नारी गगनेषु
वि पाताले वसुस्थिता या च तस्या नाथस्तु कौलिकः तस्य वर्ज्या च
या नारी कथ्यते तन्त्रवर्त्मना त्रिपुरैव गुरुः साक्षात् तत्पत्नी त
त्स्वरूपिणी मनसा कर्मणा वाचा रमणं तत्र वर्जयेत् तस्या
एकपदे भक्त्या मुक्तिमप्यचिराल्लभेत् गुरोः स्नुषा च कन्या च स
पत्नी मन्त्रपुत्रिका एतस्या रमणं वर्ज्यं ब्रह्मविन्मानसेन च
कौलिकस्य च पत्नी वे साक्षात् सिद्धीश्वरी शिवा तस्या रमण
मात्रेण कौलिको नारकी भवेत् माता पितोरवाहस्यापि
वहीनातथैव च अस्यस्या ने विचारे च देवीशापः प्रजायते
मन्त्रमाता च पुत्री च भगिनी च कुलाङ्गना नरमेत् कौलिको नि
त्यमेताः सम्यक् समर्चयेत् अथवा गुरुवीरवर्ग्यस्य कार
णाः सर्वास्तु योषिताः अथवा गुरुपत्नीं मातरं च परित्यज्य
उपासते अथवा मातृयोनिं परित्यज्य सर्वयोनिं विचारयेत्
एताः वर्ज्याः प्रयत्नेन सन्दिग्धानां च सर्वदा अद्वैतानां च कु
लापि निषिद्धयोने व विद्यते मातृगर्भस्य वीजेन पिण्डो रेवनतंस
श्रयः गर्भनिःसारकाले तु बालको हि दिगम्बरः जननीज
ठरा योनिरर्थ्नाद्यहर्निर्भवान् जननीयोनिसम्बन्धस्ततः
सिद्धोऽपि गच्छति एवं विचार्यमाने तु कोणस्या कुरुतस्य

कौ ४७

गः निर्विकारतया नात्र भवेत्स्माद्व्यथा ततः अत एव यदा
यस्य वासना कुत्सिता भवेत् तदा दोषाय भवति नान्यथा ह
षणं कुचित् निर्विकल्पमनः भूत्वा चिन्मयीं समुपासयेत्
तदारूढिषु वीरेषु कार्याकार्यं न विद्यते तस्माद्द्वैतरूपे
ण सर्वथा नि विचारयेत् निश्चयं मुक्तिमाप्नोति सहस्रयोः
निदर्शनात् अनाचारः सदाचारः अकार्यं कार्यमुत्तमम्
अमेध्यमपि मेध्यं स्यात् अद्वैतानां च निश्चितम् अपेयमपि
पेयं स्यात् अभोज्यं भोज्यमेव च अगम्यापि च गम्या स्यात् अ
द्वैतानां हि निश्चितम् न विधिर्न निषेधश्च न पुण्यं न च पात
कम् न स्वर्गो नैव नरकं अद्वैतानां च निश्चितम् यत्र यत्र
निषेधश्च विधिर्वा परिकथ्यते तत्र तत्रापि वा द्वैतं सत्वि
द्यानां च निश्चितम् सर्वथैव गुरोरग्रे अद्वैतं नैव कारयेत्
तस्मात्सुयत्नतो वीरो गुरुयोनिं परित्यजेत् अद्वैतं द्वैतभे
देन पूजनं कथितं मरत् पञ्चतत्त्वसंयुक्तं पञ्चमं यस्तु
कारयेत् तस्य पूजावसानष्ठा प्रायश्चित्ती स नायकः तत्त्व
हीनं कृतं कर्म जपकर्म च निष्फलम् शाम्भवी कुप्यते तेजो
ब्रह्महत्यादिने दिने चक्रं संक्रान्तदेवेशी पूजयेत्तर्पणं
विना वक्तारितस्य नश्यन्ति आयुर्विद्या यशो बलम् चक्रम
ध्ये तत्परं दृष्ट्वा भवाय दिवा शुभम् प्रभाते तत्र वक्तव्यं सा
धकेन महात्मना निस पूजा च कथिता साधकानां स्वामि

हृदये ॥ इतिज्ञानानन्दपरमहंसविरचिते कौलावलीनिर्ण
येऽष्टमोल्लासः ८ ॥ इतिगुप्ततरंज्ञेयंगात्यर्वस्वकमंशुभ
म् अप्रसन्नगोपनाथस्तुपंचतत्त्वेनपूजयेत् सर्वसिद्धिमवाप्नो
तिमन्दभाग्योऽपिपूजनात् तस्मात्पूजांसदाकुर्यात्सिद्धार्थी
सिद्धिसंग्रहः पूजाफलेनदौर्भाग्यदुःखदारिद्र्यनिग्रहम् स
र्वप्रशमनंयातिर्दृष्टोजायतेभुवि अर्चनक्षणभंगेनवि
कलायोगिनीभवेत् पूजाहीनोऽशुचिर्निसर्गाहितःसर्वक
मस्तु पूजांविहाययोमूढोमन्त्रंजपतिनिस्पृशः तज्जपंनि
ष्फलंविद्यात्समंत्रीपातकीभवेत् विद्यांसंगृह्यपूजायांश्र
द्धायस्तुनविद्यते समहापातकीभूत्वापशुयोनिमवाप्नुया
त् पूजाहीनस्यमांसेनरुधिरेणविशेषतः परेणयोगिनीनां
वैभैरवाणांभवेत्फवम् तस्मात्पूजांसदाकुर्यात्सिद्धार्थीमा
नवोऽथवा यद्देहेपूजयेद्देवीसदेवतत्रपूजनम् अतिगुप्तेनत
न्कांक्षदिवसेनैवसर्वदा दिवसेपञ्चमेःपूजाराष्ट्रहानिं
करोतिहि साधकस्यमहादोषंप्रददातिसुनिश्चितम्
तस्मात्पञ्चमकारेणदिवसेनैवसर्वदा उत्तमानिशपूजास्या
त्सर्वपूजाचमध्यमा मासपूजाधमाप्रोक्तामासार्द्धंयच्छुभ
वेत् विहितैर्मांसादिभिर्द्रव्यैर्मासार्द्धंसमाचरेत् पशोर्भूयःप्र
वेशोवाथदिग्वादीतदपेक्षतः समन्तोचयजेल्लाभेनपोदीक्षाव
तेशुभे पीठोपगमनेवीरफलपीठस्यदर्शने देशिकागमने

कौ ४८ 48

गुणपतिस्थिदेवतदर्शने पर्वमादिषुकालेषुविशेषदिवसे
षुच गुरुजन्मदिनेप्राप्तेतद्गुरोस्तद्गुरोरपि मातवीवा
दिषुमासेवस्वजन्मदिवसेपिच पकादशपाष्टमीपातेक
मलोपंनकारयेत् अष्टम्यांचचतुर्दश्यांपूजाकार्याप्र
यत्नतः नलंघयेदष्टमींचलंघनात्पातकीभवेत्
इतिपर्वदिनेप्राप्तेयंचतत्रेषुसाधकः पूजांकुर्यात्प्रय
त्नेनअन्यथासिद्धिहाभवेत् बहिःपूजाविधानेनगन्ध
र्वोवापिकिन्नरः राजापिसाधकोवापिनान्यःकोपिम
हीतले यतिर्वाभूपतिर्वापिनान्योऽस्तिपूजकःक्वचित्
पूजाकोटिसमंस्तोत्रंस्तोत्रकोटिसमोजपः जपकोटि
समंध्यानंध्यानकोटिसमोलयः नहिध्यानात्परोमंत्रो
नदेवस्त्वात्मनःपरः नानुसन्धानात्परापूजानहितृप्तःप
रंफलम् उत्तमासहजावस्थामध्यमाध्यानधारणा
जपस्तुतिःस्यादधमाहोमपूजाधमाधमा उत्तमातत्त्व
चिन्तास्यात्जपचिन्ताचमध्यमा शास्त्रचिन्ताधमा
ज्ञेयालोकचिन्ताधमाधमा नदेवःपर्वताग्रेषुनदेशे
विस्मृतानि देवश्चिदानन्दमयोहृदिभावेनदृश्यते य
त्रयत्रदृढाभक्तिर्यदायस्यमहात्मनः तत्रतत्रमहादेवी
प्रकाशमनुगच्छति ॥ अथवक्ष्येफलादिकंचपूजायां
यत्जायते वाराणस्यांमहापूजासमस्तफलदायिनी

ततस्त्रिगुणा प्रोक्ता पुरुषोत्तमसन्निधौ ततोपि द्विगुणा-
प्रोक्ता द्वारवत्यां विशेषतः सर्वक्षेत्रेषु तीर्थेषु पूजा द्वारवती
समा विशेषात्रिगुणा प्रोक्ता गङ्गायामपि तत्समा आर्य्याव
र्ते मध्यदेशे च ब्रह्मावर्ते तथैव च विन्ध्यवत्फलदा पूजा प्रया
गे पुष्करेषु च ततश्शतगुणा प्रोक्ता करतोयानदीजले न
द्याश्च तद्गुणफला नन्दिकुण्डे च निश्चितम् ततश्शतगु-
णा प्रोक्ता जल्पीशस्य च सन्निधौ ततः सिद्धेश्वरीयोनौ त
तोपि द्विगुणा स्मृता ततश्शतगुणा प्रोक्ता लौहित्यनदपा
थसि तत्समा कामरूपा च सर्वत्रैव जले स्थले सर्वश्रेष्ठा
यथा विष्णुर्लक्ष्मीः सर्वोत्तमा यथा देवीपूजां तथा शंभो
कामरूपे सुरालये कुलार्णवे कामरूपं वह्निविधं सकं
गुप्तं महेश्वरि करतोयानदीं पूर्वं यावद्दिक्करवासिनी
त्रिंशद्योजनविस्तीर्णं शतयोजनमायतम् त्रिकोणं कृष्ण
वर्णं च कामरूपमुदाहृतम् अत्रैतत्रैव विज्ञेयं गुप्तं चैव-
गृहे गृहे अस्माद्गुप्तं महापुण्यं लभते साधकोत्तमैः
देवीक्षेत्रं कामरूपं विद्याद्यत्र तत्समम् अन्यत्र विरला
देवी कामरूपे गृहे गृहे ततः शतगुणा प्रोक्ता नीलकूटस्य
मस्तके ततोऽपि द्विगुणा प्रोक्ता स्वमेरोपि शिवलिंगके त-
तोपि द्विगुणा प्रोक्ता शैलपुत्र्याश्च योनिषु ततः शतगुणा

कौ
४९ प्रोक्ता कामाख्यायोनिमण्डले ततस्समापि वसाष्टजायो
49 षितां योनिमण्डले पीठानां परमं पीठं कामरूपं महाकुल
म् ततः शतगुणं प्रोक्तं कामाख्यायोनिमण्डलम् यत्रको
टिगुणैः सार्द्धं माया महिषमर्दिनी यत्पीठं ब्रह्मणो वक्त्रगु
णं सर्वसुखावहम् यतो देवाश्च दैत्याश्च मुनयश्चैव मावजाः
सर्वेऽप्याविर्भवन्त्यत्र तेन तत्तं महाकुलम् कामाख्यायां
महायोनौ पूजां यः कृतवान् सकृत् स चेह लभते कामा
न् परत्र शिवतां व्रजेत् अत्र यत्क्रियते पूजा सकृद्धा
साधकेन च विहाय सर्वपीठानि तत्पदे देवसेच्छिवा
अथ वक्ष्यामि सामान्यपूजायाः क्रममुत्तमम् आदा
वृष्यादिकन्यासः करशुद्धिस्ततः परम् अंगन्यासा
पकन्यासो हृदादिन्यास एव च तालत्रितयदिग्
बंधः प्राणायामस्ततः परम् ध्यानं पूजा जपश्चेति
सर्वतन्त्रेष्वयं विधिः जपार्थं सर्वमन्त्राणां विन्यसे
त् लिपिं विना कृतं च निष्फलं विद्यात्तस्मादादौ
लिपिं न्यसेत् ॥ ॥

अथातः संप्रवक्ष्यामि शिवाया बलिपूजनम् तद्दाति बलिं य
स्तु शिवायाः शिवतामये सर्वापिष्टो नाधिकारी कुलदेव्यास्तु पू
जने पशुरूपां शिवां देवीं यो नार्चयति निर्जने शिवारावेणात
स्याशु सर्वं नश्यति निश्चितम् पूजाजपविधानानि यत् किंचि
त् सुकृतानि च गृहीत्वा शापमासाद्य शिवा रोदिति निर्जने
अवश्यमन्त्रपाठेन नियतं तोषयेत् शिवाम् एकया पूज्य
ते यत्र शिवायाश्चैव सर्वदा तदेव सर्वशक्तीनां प्रीतिः परमदु
र्लभा पशुशक्तिर्नरशक्तिः पक्षिशक्तिस्तु सर्वदा पूजिता दि
गुणं कर्म समग्रं साधयेद्यतः तेन सर्वप्रयत्नेन कर्तव्यं
पूजनं महत् राजादिभयमापन्ने देशांतरभयादिके शुभा
शुभानि कर्माणि विचिंत्य बलिमाहरेत् बिल्वमूले प्रांतरे वा
श्मशाने वापि साधकः मांसप्रधानं नैवेद्यं संध्याकाले निवे
दयेत् गृह्ण देवि महाभागे शिवे कालाग्निरूपिणि शुभाशुभं
फलं व्यक्तं ब्रूहि गृह्ण बलिं तव एवमुच्चार्य दातव्यो बलिः कु
लजनप्रियः कालीकालीति वक्तव्यं तत्र उमा शिवरूपिणी प
शुरूपा समायाति परिवारगणैः सह भुक्त्वा याति यदेशा स्या
त्प्रशान्तोल्लासस्वरा तदेव मंगलं तस्य नान्यथा साधकस्य च
यदि न भुज्यते तत्र तदा नैव शुभं भवेत् नित्ये नैमित्तिके काम्ये
बलिं दद्यात् प्रयत्नतः अतिगोप्येन कर्तव्यं बलिदानं शुभावहं
कुलपूजां प्रवक्ष्यामि यथाशास्त्रविधानतः कुलागमे कुलवा

कौ रे कुलाष्टम्यां च तद्दर्शे पञ्चम्यां विशेषतः कुलतिथौ कुलर्क्षे च कुलपूजां
समाचरेत् योगिनीपूजनं यत्र प्रधानं कुलपूजनम् यथा विस्तृति
५० थौ विस्तृः पूजितो वाञ्छितप्रदः तथा कुलतिथौ देवी पूजिता फ
५४ लदायिनी नित्यश्राद्धं तथा सन्ध्यावन्दनं पितृतर्पणम् तथैव
कौलिकीनां च नित्यता कुलपूजने एकरात्रं द्विरात्रं वा न द्विचेत्
कुलपूजनम् तदान्तं साधकं सत्कालयमेव प्रति चण्डिका कुल
पूजासमं नास्ति पुण्यमस्य जगत्त्रये तस्माद्यः पूजयेद्भक्त्या भुक्ति
मुक्त्योः स भाजनम् अनधीतेऽप्यशास्त्रज्ञो गुरुभक्तो दृढव्रतः
कुलपूजारतो यस्तु स मे प्रियतरो भवेत् इच्छासिद्धिफलं दद्या
त् पूजिता स्त्रवधूरिव अपूजिता यदा देवी दुःखदा क्रूरवधूरिव
कुलपूजां तदा यस्तु यः करोति हि दुर्मतिः स याति नरके घोरे ए
कविंशतिभिः कुलैः विघ्नाय तत्र यद्यत्स्यात्तत्सर्वं कुलपूज
नात् कुलावलोकनं चेत्स्यात्कृतः प्रोक्षणमार्जनम् कुस्ना
नं कवचं वा कुशुद्धिः कवचमासविशोधनम् तस्मात्सर्वप्रयत्ने
न कुलपूजाः समाचरेत् लभते सर्वसिद्धिं च नात्र कार्या विचा
रणा कथ्यते कुलवारादिनिर्णयः सिद्धिहेतवे द्वितीया नव
मी षष्ठी कुलाकुलमुदाहृतं विषमाश्चाकुलाः सर्वाः प्रोक्ताश्च
तिथयः कुलाः रविः सोमो गुरुः शौरिश्चत्वारश्चाकुला मताः
भौमशुक्रौ कुलाख्यातः बुधवारः कुलाकुलः वारुणार्द्राभिजि
न्मूलं कुलाकुलमुदाहृतम् कुलानि समयिष्ठानि शेषभासक

लानि च तिथिवारे च नक्षत्रे वा कुले स्थायिनो जयः कुलर्क्षे जनि
नो निःसंशयं चैव कुलाकुले योगिनां स्यान्न मासेन तिथि कुसंवि
धीयते महाष्टम्येव विज्ञेया कुलाष्टमी महासिद्धिदा कथितं कुला·
वारादिनिर्णयं सिद्धिहेतवे स्नानं पाद्यार्घ्यपर्य्यन्तं सकलस्योऽकुवि
धायच लाक्षारसस्पृष्टहेवीरस्नूलिकां रचयेत्ततः नटीकापालिकी
वेश्या रजकी नापितांगना ब्राह्मणी शूद्रकन्या च तथा गोपाल·
कन्यका मालाकारस्य कन्या च नवकन्याः प्रकीर्तिताः अथवा
चण्डाली चर्मकारी च मागधी पुक्कसी तथा श्वपची खण्डिका चै
व कैवर्त्ती विटयोषितः कुलाष्टकं तु कथितं अकुलाष्टकमुच्यते
कलम्बी चैव शौण्डी च शस्त्रजीवि च वर्द्धकी गोमुखी रजकी शि
ल्पी कौलिकी च तथाष्टमी अथवा गणिका शौण्डिकी चैव कै·
वर्त्ती रजकी तथा तंत्रकारी चर्मकारी मातंगी पुक्कसी तथा अ
थवा नटी कापालिकी वेश्या पुक्कसी योगिनी तथा रजकी रंज
की चैव स्वैरिण्यी च विलासिनी खटिका घटिका चैव तथा गोपा
लकन्यका विशेषवैदग्ध्ययुताः सर्वा एव कुलांगनाः उरुजा
संगनाभावेवातर्वांणि·· नांयजेत् मंत्रतंत्रसमायुक्ताः समयाचा
रपालकाः अवीरा च व्रतपरा योगमुद्रापरापि वा गुरुभक्ता देवभ
क्ता घृणालज्जाविवर्जिताः संभोगपानरताः प्रायलक्षणैः सिद्धिदा·
यिकाः दीक्षिता मन्त्रनायेनकेन मूलेन वा पुनः तत्र वस्तीचया
नारी कथ्यते तंत्रमार्गतः विकृतांविधवांरोगिवृद्धांचैवतपस्विनीं

कौ तीक्ष्णां गीर्वाणवस्त्रां नाम सदा वकलहप्रियाम् लोकवेदविरुद्धां च त।
५५ था निष्ठुरभाषिणीम् मिथ्याप्रलापनिरतां मिथ्याचारमदोन्मत्तकां
५। इत्यादिदोषसंयुक्तां प्रमत्तां च विवर्जयेत् विकृतास्यां मदीक्षितां स
विकल्पमानसाम् वर्णीयं सीपापरतां क्रूरां मत्संतलोलुपाम् अत
केमनसां दीनां वर्जयेत्साधकोत्तमः ततः समानयेद्धीरः पृथ्वी।
कामकुलोद्भवाम् एकतरां सुरूपां च सालंकारां सुदीक्षिताम्
गुणाविवर्जितां शांतां शिववाक्यदृढव्रताम् गुरुदेवपदे भक्तां सु द
तां साधिकां पराम् स्वकीयां परकीयां वा विदग्धां चारुहासिनीम् त
स्याः पादादिकं दत्वा स्थापयेत्तलिकोपरि साधयेत्सिद्धिमत्तां सा
धकः स्थिरमानसः पूजाकाले यतः प्रोक्ताः शक्तयः सहजास्तु ये: त
स्माद्देहे स्वकल्पोक्तमासजालप्रविश्य सेत् देवी परा भगवती जग
दाधाररूपिणी ब्रह्मविष्णुशिवानां च योनिरुत्पत्तिकारिणी सा
योनिः सर्वभूतानां सृष्टिस्थितिलयात्मिका गुणत्रयसमापन्ना का
लत्रयविभाविनी शृंगाररूपमापन्ना विकारतां गता भगरूपेण स
र्वेषां भूतानां देहमध्यगा शिवमन्त्रिर्थिमास्थाय सर्वेर्थलिंगरूपि।
णीम् सर्वेषां जननी मातृ रत्नं र्थरमणी परा पुंसां योनिः स्त्रियायो
निर्भगदा भगरूपिणी यस्मात्तु जायते जंतुस्तस्मां वा तेप्रलीयते
त्रिशक्तिसहिता योनिर्ब्रह्मविष्णुशिवात्मिका देवी भगवती ज्ञाना
भगवांश्च सदाशिवः एकैव परमा देवी भगलिंगस्वरूपिणी स
र्वेषां योनिरूपेण सा देवी भगरूपिणी योनिस्था योनिमध्यस्था।

योनिरूपस्वरूपिणी त्रिकोणाच त्रिकोणेच त्रिदैवतमयी परा । संयो
गेचान्तरीयायां पूर्णितायंचमी स्मृता तस्माद्योनौ यजेद्देवीं निम
मानन्दरूपिणीं प्रक्षाल्य गन्धतोयेन धूपयित्वा तु धूपकैः सिन्दूर
रजसा चैव योनौ चक्रं समालिखेत् स्वकल्पोक्तविधानेन तत्र दे।
वीं प्रपूजयेत् सर्वयोषिन्मये देवि सर्वकामार्थदायिनि कामे
श्वरि कामसंभूते कामुके सन्निधिं कुरु अनेनावाहयेद्देवीं स्वीयकु
लमथाचरेत् पुंसा प्रसङ्गेन तावन्नैव विवर्जयेत् यदि शंका स
द्वैतत्र तदा देवीं विसर्जयेत् प्रमादाद्यदि पापात्मा न तत्संगमन्
गच्छति तदा कुष्ठी भवेत् सद्यो निन्दितां सिद्धिमाप्नुयात् मद्यमां
सविनायस्तु कुलपूजां समाचरेत् जन्मान्तरसहस्रेषु कृतं
तस्य न पश्यति विधिवत्पूजनं कृत्वा जप्त्वा स्तुत्वा प्रणम्य च तस्या
यंत्रं समालिख्य तु तत्स्थां निवेदयेत् यावत्सा विकला तस्मात्
तावत्तां न विसर्जयेत् विसर्जनं विधायैव शक्तीच्छा यदि विद्यते
तस्या आज्ञां गृहीत्वा तत्पूर्ववन्मैथुनं चरेत् ततो जपेत् स्त्रियं ग
त्वा न शेषं पूर्ववदाचरेत् मद्यं मांसं तथा चान्यं यत्किंचित् कुल
साधनम् तस्यै दत्वा ततः शेषं गुरवे विनिवेद्य च तदनुज्ञां मूर्ध्नि
कृत्वा शेषमात्मनि योजयेत् शक्तये दक्षिणां दत्वा सोऽहं संचिन्तये
त् ततः कुलपूजनमेतत्तु कथितं सिद्धिहेतवे संक्षेपयजनं वक्ष्ये
यथातंत्रानुसारतः आलिंगनं भवेन्न्यासः चुम्बनं ध्यानमीरितम्
शीत्कारं यजनं प्रोक्तं नैवेद्यं नावलेखनम् पानं निष्कामृतं जपं।

कौ सणंचजपोभवेत् आनन्दस्तवनंविद्धिरेतःपातोविसर्जनम् अद्वैत
४९ ज्ञानरूपेणसदादेवींसमर्चयेत् ज्ञानिनोऽज्ञानिनोवापियावद्देहस्य
५२ धारणम् तावद्धर्मसमाचारःकर्तव्यःकर्मबुद्धये कर्मणामिलितं
S2 ज्ञानंज्ञानेनसमतांव्रजेत् शिवेषुनैवमुक्तिःस्यात्यतःकर्मसमाच
रेत् कुर्यादनित्यकर्माणिनित्यकर्मसमाचरेत् सर्वकर्माणिसं
सक्तोनशक्तोदेहधारिणा त्यजेत्कर्मफलंयोवासत्यागीत्यभिधी
यते स्वकार्येषुप्रवर्तन्तेकरणानीतिचिन्तयन् अहंभावमपास्यैव
यःकुर्यात्सनलिप्यते क्रियमाणानिकर्माणिज्ञानप्राप्तेरनन्त
रम् नचस्पृशन्तितत्तत्त्वज्ञंजलंपद्मदलंयथा तत्त्वनिष्ठस्यकर्माणि
पुण्यापुण्यानिसद्वयम् प्रयान्तिनैवनरकंतत्त्वनिष्ठाःकदाचन
उत्पन्नसहजानन्दतत्त्वज्ञानरतःसदा सर्वसंशयसंत्यक्तःसवि
द्वान्कर्मसंत्यजेत् दृष्टेवर्षेःपरित्यक्तकर्मकाण्डमपण्डितैः पा
षण्डैःपण्डितम्मन्यास्तेयान्तिनरकंसदा फलंप्राप्ययथावृक्षःपु
ष्पंत्यजतिनिःस्पृहः तत्त्वंप्राप्यतथायोगीत्यजेत्कर्मपरिग्रहम्
अवश्यमेवपातेनापिब्रह्महत्याशतेनवा पुण्यपापैर्नलिप्येतयेषां
ब्रह्महृदिस्थितम् दृष्टिमात्रायानिकर्माणिजिह्वोपस्थनिमित्तकं
जिह्वोपस्थपरित्यागीकर्मणाकिंकरिष्यति तावत्कर्माणिकु
र्वीतयावज्ज्ञानंप्रजायते पूजाकोटिसमंस्तोत्रंस्तोत्रकोटिसमोजपः
जपकोटिसमंध्यानंध्यानकोटिसमोलयः नास्तिध्यानात्परोमन्त्रो
नदेवस्त्वात्मनःपरः नानुसन्धानात्परापूजानहितृप्तेःपरंफलम् सं

तोदकैर्विना सन्ध्यां जपहोमैर्विना तपः उपचारैर्विना पूजां योगी नित्यं
समाचरेत् देहो देवालयो देवि जीवो देवः सदाशिवः त्यजेदज्ञान।
निर्माल्यं सोऽहंभावेन पूजयेत् जीवः शिवः शिवो जीवः स जीवः के।
वलः शिवः पाशबद्धः पशुर्देवि पाशमुक्तः सदाशिवः तुषेणावद्धो।
व्रीहिः स्यात्तुषाभावेन तण्डुलम् कर्मबद्धः सदा जीवः कर्ममुक्तः
सदाशिवः ध्यायतां क्षणमात्रं वा श्रद्धया परमेश्वरि यद्भवेत्तन्म
हापुण्यं तस्यान्तो नैव गम्यते क्षणं ब्रह्माहमस्मीति यः कुर्यादा।
त्मचिन्तनम् तत्सर्वं पातकं हन्यात्तमः सूर्योदये यथा व्रतक्र।
तुतपस्तीर्थदानदेवार्चनादिषु यत्फलं कोटिगुणितं तद्देवाप्नो
ति तत्त्ववित् उत्तमा सहजावस्था मध्यमा ध्यानधारणा जपः स्तु
तिः स्यादधमा होमपूजाधमाधमा उत्तमा तत्त्वचिन्ता स्यात् जप
चिन्ता तु मध्यमा यो निन्दास्तुतिशीलन्तु सुखदुःखादिवन्धुषु
समस्तिष्ठेत्स तु योगीन्द्रो हर्षामर्षविवर्जितः निस्पृहो निःसन्तु
ष्टः समदर्शी जितेन्द्रियः आस्ते देहप्रवासी च स योगी परतत्त्व।
वित् निःसंकल्पो निर्विकल्पो निर्जितोपाधिवासनः निजस्व
रूपनिर्मग्नः स योगी परतत्त्ववित् यथा पंगवन्धवधिरक्लीबो
न्मत्तजडादयः निवृत्तचित्तः सर्वत्र स योगी परमो मतः पंचमु
द्रासमुत्पन्नपरमानन्दनिर्भरः यश्चास्ते स तु योगीन्द्रः पश्य।
त्यात्मानमात्मनि येन युक्तेन मनसा प्रसन्ना चण्डिका भवेत्
तेन संतिष्ठ हृदये मे सा देवी न संशयः वहिः पूजाविधानेन ग।

कौ· न्यर्च्चो वा यदि किन्नरः राजा वा पूजको वापि नामः कोपि महीतले यति
४८ र्व्वा भूपतिर्व्वापि नामोऽस्मि पूजकः क्वचित इति ज्ञानानन्दपरमहंस
५२ विरचिते कौलावलीनिर्णये नवमः उल्लासः ९ अथाचारं प्रवक्ष्या
मि यथातन्त्रानुसारतः सर्व्वभूतहिते युक्तः समयाचारतत्परः अ
53 नित्यकर्म्मसंत्यागी नित्यानुष्ठानतत्परः मंत्रधारणमात्रेण शिवभा
वेन तत्परः परस्मादेवतायास्तु सर्व्वकर्म्मनिवेदकः येषां च निश्च
लाभक्तिर्गुरौ देवे मनागपि तेषां सिद्धिर्भवेदाशु नान्यथा कल्पको
टिषु गुरुर्ब्रह्मा गुरुर्व्विष्णुर्गुरुर्देवो महेश्वरः गुरुर्मन्त्रो गुरुर्जापो गु
रुरेव परं तपः तेषां सिद्धिर्भवेदाशु नाभक्तस्य कदाचन प्रातरेव गु
रुध्यानं ब्रह्मरन्ध्रे च साधकः संपूज्य सकलं कर्म्म कुर्य्यात्तस्याज्ञ·
या सदा विंशतिः पुरुषान्वापि सप्त सप्त त्रयोऽपि वा अज्ञात्वा गु
रुवंशानां शिष्यस्येन्नष्टसंततिः ज्ञात्वा गुरुकुलं नैव नष्टमार्गो
भविष्यति नष्टमार्गान्मंत्रविद्येन नादृक्सिद्धिगोचरे गुरूणां
शिष्यमूलानां नालिखेत्संततिक्रमः तंत्रमंत्रास्त्रविद्याश्च निष्फ
ला नात्र संशयः स्ववंशादधिकं ज्ञेयं गुरुवंशं शुभावहम् उत्पा
दकब्रह्मदात्रोर्गरीयान् मंत्रदः पिता अस्मात्सम्पेतसततं पितु
रप्यधिकं गुरुम् गमनं पूजनं स्वप्नं भोजनं मरणं तथा गृहीत्वा
ज्ञां गुरोः कुर्य्यान्न तस्यासिद्धिर्विनाजपात् गुरोमनुष्यबुद्धिं च मंत्रे
चाक्षरभावनाम् प्रतिमासु शिलाबुद्धिं कुर्व्वाणो नरकं व्रजेत
गुरोर्मानुष्यबुद्ध्या न प्रपेत् शिष्यः कदाचन कदाचिन्न लभेत्

सिद्धिं मन्त्रैर्वा देवतार्चनैः श्रीगुरुप्राकृतैः सार्द्धं ये स्मरन्ति वदं-
ति च तेषां हि स्तकृतं सर्वं पातकं भवति क्षणात् चापल्यं परि-
हास्यं च गुरोः साक्षाद्धि वर्जयेत् इष्टानां पूजनं सुज्ञैः क्रियते मन-
द्बुद्धिभिः श्रीगुरौ संस्थिते साक्षात् किं दृष्टाध्यानयोगतः गु-
रौ सन्निहिते यस्तु पूजयेदन्यदेवताम् स याति नरकं घोरं सा
पूजा विफला भवेत् यतः सर्वमन्त्राणां गुरुपूजा गरीयसी
तदग्रे मन्त्रतन्त्राणां भाषणं नैव कारयेत् पूजिते गुरुपादे वै स-
र्वदेवः सुखी भवेत् सर्वेषां मन्त्रतन्त्राणां पितासौ यः सदाशिवः
अन्यदेवसपर्या वा अन्यदेवस्य कीर्तनं गुरुदेवं विना चैव तद-
ग्रे नरकं व्रजेत् गुरोः प्रीतिकरं कर्म यः कुर्यात् साधकोत्तमः
तस्याशु सिद्धयः सर्वाः सन्ति पादतले सदा कायेन मनसा वाचा
यो भक्तः शरणे गुरोः तस्य सिद्धिर्भवेत् पूजा जपहोमौ विना कृते
गुरुभक्तिविहीनस्य ज्ञानिनस्तस्य पदे पदे प्रत्यक्षे वा परोक्षे वा
सदा प्रणमेद् गुरुम् गुरोरग्रे पृथक् पूजां मोहं स च विवर्जयेत्
दीक्षां व्याख्यां प्रभुत्वं च गुरोरग्रे न कारयेत् सर्वदा तुष्टिमुत्पाद्य
गुरोः प्रसादमालभेत् ऋणदानं तथादानं वस्तूनां क्रयविक्रयं
न कुर्याद् गुरुणा सार्द्धं शिष्योऽपि न कदाचन आज्ञाभङ्गोऽर्थहर-
णं गुरोरप्रियवर्तनं गुरुद्रोहमिदं प्राहुः यः कुर्यात् स च पातकी
स्वदेहद्रव्यविनियोगं च नानिवेद्य गुरोश्चरेत् अनिवेद्य च यः कुर्यात्
स भवेद् ब्रह्मघातकः गुरुनाम न भाषेत जपकालादृते क्वचित्

कौ श्रीनाथदेवस्वामीत्यभिवादे स्मायनेवदेत् गुरुं हुंकृत्य त्वंकृत्यवाचा
४० निर्जितस्य यः कदा विकल्पकुलशास्त्राणि भवंति कुलशास्त्राम्
५४ पकारस्य प्रदातारं यो गुरुं नावमन्यते शुनो योनिशतं गत्वा चाण्डा
34 लत्वमवाप्नुयात् गुर्वग्रे न तपः कुर्यान्नोपवासव्रतादिकम् ती
र्थयात्रां च यः कुर्यान्न कुर्यादात्मशुद्धये न नियोगं गुरोर्दद्याद्
दुष्टं तन्न विभावयेत् यस्मिन्द्रव्ये गुरोरस्ति स्पृहा नात्र भवेत्ततः श्र
र्वस्वं यदि वा कश्चित्स्यादत्तु भूयात्तदा तया यावल्लाभं तदर्द्धं वा गुरु
स्वमुपजीवति महालोभात्पतेद्ध्यं तन्नरके च त्रिसप्तके यद
त्यादि गुरोर्द्रव्यं अदत्तं स्वीकरोति यः तिरश्चां योनिमालंब्य कल्पा
दैर्भजते सदा गुरुद्रव्याभिलाषी च गुरुस्त्रीगमनोत्सुकः पा
तित्यस्यापि तस्यापि प्रायश्चित्तं न विद्यते तत्पापं समवाप्नोति गुर्व
ग्रेऽसत्यभाषणात् गोब्राह्मणवधं कृत्वा यत्पापं समवाप्नुयात्
शाक्तिच्छायां गुरुच्छायां देवच्छायां न लंघयेत् यद्यत्र गुरुणा सार्द्धं
स्वपित्युपविशेत्तु यः स याति नरकं घोरं यावदिन्द्राश्चतुर्दश गु
रुवाक्यं हतं कृत्वा आत्मवाक्यं तु रोपयेत् गुरुं जित्वा मनो यस्य प
तते नरकार्णवे अनेकपापशोरन्नं भुंजते ये च कौलिकाः ते
भ्यः प्रकुप्यते देवी तत्संगं नैव कारयेत् लक्षत्रयं जपेल्लोपी लक्षं
वाप्य जपां जपेत् होमयेद्विधिवाज्यैर्न निष्पापः स्यात्तदा ध्रुवम् गु
रुणा लोकितः पिबन्तुनिष्ठेदासनं त्यजेत् गुरुणा सदसद्वापि य
दुक्तं तन्न लंघयेत् रमंसमैथुनं मिथ्या यो वदेद्गुरुमन्दिरे स

यातिनरकं घोरं शंभुनापरिभाषितम् नविशेषस्त्वनयोर्देवता
गुरुसन्निधौ गुरोः सिंहासनं चैव ज्येष्ठानामुत्तमासनम् रिक्तहस्तो
नपश्येत्तु राजानं देवतं गुरुम् फलपुष्पादिकं नीत्वा यथाशक्त्या स
मर्पयन् एवं यो नाचरेन्मंत्री ब्रह्महा स तां व्रजेत् आलिंगनप्रदा
नेन गुरोस्तुष्टे सकृत् यदि तदा किं वा न लभ्यंते साधका गुरुसे
वकाः गुरुशय्यासनं पीठं पादुकोपानहौ तदा स्नानपादोदकं
चैव लंघयेन्न कदाचन गुरुत्यागे भवेन्मृत्युर्मंत्रत्यागाद्दरिद्रता
गुरुमंत्रपरित्यागाद्रौरवं नरकं व्रजेत् गुरुत्यागकरः शिष्यः प्रा
यश्चित्ती भवेद्ध्रुवम् लक्षं श्रीपादुकामंत्रं जप्त्वा पापात्प्रमुच्यते मं
त्रत्यागकरः शिष्यास्ततः संगं नैव कारयेत् लक्षमेकं जपेन्मंत्रं
होमतर्पणतः शुचिः ब्रह्मा पराशरव्यासविश्वामित्राद... पुनः
गुरुशुश्रूषणात्सिद्धिं प्राप्ताः स्मो भुवनत्रये शिवो गुरुप्रसादेन
सर्ववित्सर्वगः प्रभुः साधकः शिव एवास्मात् गुरोस्तुष्टे सकृत्
यदि तदा किं वा न लभ्यंते साधका गुरुसेवकाः तस्मादेव प्रयत
नेन गुरुसेवां समाचरेत् सर्वदा गोपयेद्देवं गुरुं च मंत्रमेव च
गुरुशय्यासनं पीठं पादुकोपानहौ तथा स्नानोदकं तथाच्छा
यां लंघयेन्न कदाचन देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवता सि
द्धं सिद्धाधिवासांश्च श्रीपूर्वं समुदीरयेत् छायाकालेन गणयेत्
सूतकी रादिना सुधीः गमयेद्देवताज्ञानयपायागस्तवादिना गु
रोः कृपालापकथा स्तोत्रागमावलोकनैः गमयेदनिशं कालं न

कौ वदेत्परुषभाषणम् रागलोभमदक्रोधपैशुन्यानि विवर्जयेत् कुला
४८ चारं गुरुं देवं मनसापि न निन्दयेत् पूजाध्यानं जपं होमं यथाक
५५ र्मिचतुष्टयम् प्रत्यहं साधकः कुर्य्यात्स्वयं चेत्सिद्धिमिच्छति क
55 न्यायोनिं पशुक्रीडां दिग्वस्त्रां प्रकटस्तनीं नालोकयेत्परद्रव्यप
रदारांश्च वर्जयेत् न निन्देत् व्रतिनं विप्रं वेदागमसंहितास्तथा पु
राणागमशास्त्राणि कर्माण्यपि न दूषयेत् अस्वमंत्रार्च्चनेश्रद्धाम
स्वमंत्रप्रपूजनम् एकस्याराधनं कृत्वा नान्यसाधनमाचरेत् अन्य
स्यस्मरणाद्दुःखं योगिनीशापमालभेत् अपमृत्युर्भवेत्तस्यान्
ते च नरकं व्रजेत् कुलदर्शनशास्त्राणि कुलद्रव्याणि कौलिकान्
सेवकान्प्रेरकान्वाचकान्दर्शकांस्तथा शिक्षकान्मोचका
न्वापि योगिनीसिद्धिरूपकान् कन्याकुमारिकानग्नामुन्मत्ताम
पियोषितम् न निन्देन्न जुगुप्सेत न हसेन्नावमानयेत् नाप्रियं वा
नृतं ब्रूयात्कस्यापि कुलयोगिनः कुरूपेति निकृष्टेति न वदेत्कु
लयोषितम् परीक्षयेन्न मर्त्याश्च वीराणां च कृताकृतम् या का
चिदंगना लोके सा मातृकुलसंभवा कुप्यन्ति कुलयोगिन्यो वनिता
नामतिक्रमात् स्त्रीणां शतापराधेन पुष्पेणापि न ताडयेत् कुल
स्त्रीवीरनिन्दां च तत्द्रव्यापहारणम् कुलरोधप्रहारं च वेगात्सर्वं
वर्जयेन्मतिमान्सदा स्त्रीमयं च जगत्सर्वं स्वयं तावत्तथा भवेत्
न हिंसेदविलान्नजंतून्न निन्देद्ग्रामलोचनाम् न निन्देद्दक्षिणं वामं
देवं वा कौलं तथैव च न निन्देत् शक्तिसिद्धान्तं शक्तिपूजनतत्परः न नि

न्देद्वृद्धवाक्यं तन्न निन्देद्देवतादिनम् न निन्देद्वृद्धकुमारीं च न निन्देद्ब
पतिव्रताम् न निन्देद्देवलोकादीन् न निन्देत् समयस्थितान् न नि
न्देद्धकुलं मांसं न निन्द्यात् सर्वत्र वर्जयेत् प्रमत्तामनयजां कन्यां पुष्पि
तां पतितत्लनीम् विरूपां मुक्तकेशीं च कामार्तां च न निन्दयेत् श
क्तिमयं जगत् सर्वं स्वयं तावत्तथा भवेत् शक्तिरूपा यतो देवी स
ष्टिमध्ये व्यवस्थिता शक्तेः सृष्टिः समुत्पन्ना लीयते च पुनः पुनः
तस्मात् शक्तिप्रधाना च पूजनीया प्रयत्नतः भक्षयेद्योषितास्या
ईं जुहुयादग्निसन्मुखे आरक्तवसनां नारीं यत्नाद्गत्वा समा।
नयेत् शक्तिपूजां सदा कुर्यात् प्रसन्ना येन जायते सुखं शक्ति
प्रसन्नेत दुःखं वितद्धन्नाद्भवेत् भक्ष्यभोज्यं तथा पेयं गन्धपुष्पत
था पुनः शक्तौ निवेद्य प्रथमं तथा चाभरणादिकम् ततः पश्चाद
त्मसात् कुर्यात् सिद्ध्यर्थी साधकस्तु यः शक्तौ दर्पहरणात् लज्जां
वर्जयेत् क्रोधलंघनम् कदाचिद्दर्परूपेण पुष्पेणापि न ताडयेत्
शक्तौ न विस्मयं कार्यं यस्मात् कुण्ठा च वण्टिका विस्मितेव कुल
नाशं समलाभमवाप्नुयात् वस्त्रं चाङ्गलेपं पेयं भक्ष्यभोज्यं सगन्धं
सुखम् सर्वं च युवतीरूपं भावयेन्मतिमान् सदा कुलज्ञां युवतीं वी
क्ष्य नमस्कुर्यात् समाहितः यदि भाग्यवशेनैव कुलदृष्टिस्तु जाय
ते तदैव मानसीं पूजां तत्र तासां प्रकल्पयेत् वालां वा यौवनोन्म
त्तां वृद्धां वा सुन्दरीं तथा कुत्सितां वा महादुष्टां नमस्कृत्य विस
र्जयेत् तासां प्रहारं निन्दां च कौटिल्यमप्रियं सर्वथा न च क

कौ तेषाममयथासिद्धिरोधकृत्‌ स्त्रियोदेवाः स्त्रियःप्राणाः स्त्रियएवविभू
४९ षणम्‌ स्त्रीसंगिनासदाभाव्यमन्यथास्वस्त्रियाअपि नपश्येत्प
५८ तितां नग्नां मुक्तकेशां प्रकटस्तनीम्‌ दिवसेनरमेन्नारीं तद्योनिं
58 ननिरीक्षयेत्‌ स्त्रीदोषोनैवकर्तव्योविशेषात्पूजनंस्त्रियाः
जपस्थानेमहाशंखंनिवेश्योर्द्ध्वंजपंचरेत्‌ स्त्रियंगच्छन्स्पृशन्‌
पश्यन्विशेषात्कुलजांशुभाम्‌ मांसमत्स्यदधिक्षौद्रभक्तद्र
व्ययथारुचि भोज्यान्नासनभक्तानिभुक्त्वाभस्संचरेज्जपम्‌ वि
नापीत्वासुरांभुक्त्वामांसंगत्वारजस्वलाम्‌ योजपेच्चण्डिकांदे
वींदुःखितस्यपदेपदे अतःशाक्तावहिःशैवाःसभायांवैष्णवाम
ताः कुलपूजादिलिंगैस्तुरहितोविष्णुतत्परः गच्छन्स्वपन्भ्र
मन्वापिस्खलन्विष्णुपरायणः हरिनाम्नाजातभावोभावावि
लविचेष्टितः जयविष्णोहरेत्वन्नानार्थपरविस्तरैः स्मर्तव्या
वमहादेवीकुलीनैःविपिनेगृहे नानावेषधराःकौलाविचर
न्तिमहीतले रात्रौपर्यटनंचैवरात्रौतुशक्तिपूजनम्‌ नकरोति
कथंचैवसाधकःकौलिकोभवेत्‌ वधिरान्धवदेकःसदासंगवि
र्जितः स्त्रियंगच्छन्स्पृशन्पश्यन्विशेषात्कुलजांशुभाम्‌ भ
क्षयन्तांबूलमत्स्याद्यंभक्ष्यद्रव्यान्यथारुचि मत्स्यमांसदधिक्षौ
द्रभक्ष्यद्रव्यान्यथारुचि भुक्त्वाद्यपायंभक्तानिभुक्त्वामस्वंचरेज्जप
दिक्कालनियमोनात्रस्थित्यादिनियमोनच नजपेकालनिय
मोनार्घादिषुबलिष्वपि स्वेच्छानियमउक्तोऽत्रशक्तिमन्त्रस्यसाधने

स्नानादिमानसं शौचं मानसं प्रचरेज्जपम् पूजनं मानसं दिव्यं मानसं त
र्पणादिकम् सर्वएव शुभः कालो नाशुभो विद्यते क्वचित् न विशे
षो दिवा रात्रौ न सन्ध्यायां महानिशि वस्त्रासनस्थानगेहदेहस्पर्शा
दिवारिणः शुद्धिं न वाञ्छेदत्र निर्विकल्पमनश्चरेत् नात्र शुद्धेरपेक्षा
स्ति न चामेध्यादिदूषणम् एवं च चिंतयेन्मंत्री सर्वकामार्थसि
द्धिदम् गद्यपद्यमयी वाणी सभायां तस्य जायते तस्य दर्शनमात्रेण
वादिनो निष्प्रभा गताः राजानोऽपि च दासत्वं भजन्ते किं परे जनाः
सर्वदेवमयं देहं सर्वदेवमयं तनुम् आत्मानं देवतारूपं श्रेष्ठं तत्प
रिचिंतयेत् आत्मा च परमात्मा च जगद्व्यापी स्वयं विभुः आत्मानं
ब्रह्मरूपं च सर्वदा परिचिन्तयेत् शत्रवश्चापि मित्रंति सातादा
संति भूमिपः वाचयंति यशः सर्वे साधकानां सुनिश्चितम् दुर्मुखाः
सन्मुखाः सर्वे गर्विताः प्रणमन्ति च वाचकः साधकायाति साधक
स्य विशेषतः सर्वदा पूजयेद्देवीम स्नातः कृतभोजनः महानि
शयशुचौदेशे बलिं मंत्रेण दापयेत् अत्यन्तरोगयुक्तो वाशुचिर्वा
प्यथवाशुचिः अकालेऽप्यथवा काले अधिकारी सदैव हि कृ
तार्थमन्यमानस्तु सन्तुष्टनिजमानसः दिक्कालनियमो नात्र
स्थित्यादिनियामनश्च नाधर्मो विद्यते किंचित् किंचिद्धर्मो म
हान् भवेत् कुलान्नं चैव भुंजीत कुलीनेन सह स्वपेत् न जपे
कालनियमो नार्थ्यादिषु बलिष्वपि स्वेच्छानियमउक्तोऽत्र म
हामंत्रस्य साधने कृतार्थमन्यमानस्तु संतुष्टनिजमानसः कु

कौ लप्रसंगः कर्त्तव्यः कुलीनेन पशोः क्वचित् यस्मिन्मंत्रे य आचार-
५० स्तस्य धर्मस्तु तादृशः तद्धस्ताद्रचितं भोज्यं तद्धस्ताद्रचितं जलम् त
५० द्धस्ताद्रचितं पुष्पं देवताभ्यो निवेदयेत् उच्छिष्टं भक्षयेत्स्त्रीणां ता
57 भ्यो नोच्छिष्टमर्पयेत् षडङ्गन्यासमाचर्य्य ध्यात्वा रात्रौ जपेत् कुली
सदा कालं जपेन्मंत्रं सर्वसिद्धिपरायणः न दोषः सर्वदा जाप्ये सर्व
देशेऽपि सर्वदा जपनिष्ठो जपेद्यस्तु सर्वयज्ञफलं लभेत् स
र्वेषामेव यज्ञानां जपयज्ञः प्रशस्यते रात्रौ जपैकमात्रेण सिद्धिदा च
ण्डिका भवेत् इडायां च गते रात्रौ शक्तिमंत्रं जपेद्यदि पिंगलायां
गते जीवे पुंमंत्रं प्रजपेत्सदा न चेज्जन्मसहस्रैस्तु नैव सिद्धिः प्रजा
यते कृतार्थस्तेन जायते स्वर्गो वा मोक्ष एव वा भ्रांतिरत्र न कर्त्त-
व्या सिद्धिहानिः प्रजायते विस्मिता विलयं यांति पशवः शास्त्रमो
हिताः विशुद्धचित्तोऽत्र भवेत्सिद्धिः स्यादपवर्गदा एतैस्तु तत्
क्षणात्सिद्धिर्विस्मयो नास्ति वा परः सर्वाचारपरिभ्रष्टः कुला-
चारं समाचरेत् कुलाचारपरिभ्रष्टो रौरवं नरकं व्रजेत् शास्त्रेषु
निष्कृतिर्दृष्टा महापातकिनामपि कुलभ्रष्टस्य कुत्रापि न दृष्टा नि
ष्कृतिः क्वचित् आपदं दुरितं रोगो दारिद्र्यं कलहो भयम् योगिनी
नां प्रकोपश्च स्खलितानि पदे पदे भ्रश्यमानः प्रणष्टश्च तेजोहीनो
नश्च दुर्मतिः निन्दितः सर्वविद्विष्टो विहीनः संप्रपूजितः देशा
द्देशान्तरं याति कार्यहानिश्च सर्वदा तत्रापि कुलमार्गस्थः शक्ति
न्यः कुलपालिकाः भक्षयंति पुनस्तासां वरो दत्तो मयैव तु तस्मा

दाचारवान् वीरो योगिनां प्रियो भवेत् कुलचारेण देवत्वं योगिनीवी
रमण्डलम् तिर्य्यग्योनिं समाप्नोति कौलिकस्तद्विपर्य्ययात् आ
ज्ञासिद्धिर्भवेत्तस्य आचारपालनात् सदा संस्कारस्य विहीनत्वात् गु
रुवाक्यस्य लंघनात् आचारवर्ज्जनाच्चैव कौलिकः पतितो भवेत् भो
गो मोक्षायते तस्य पातकं सुकृतायते मोक्षायते च संसारः साध
कः शुद्धभावतः पंचतत्त्वेन कर्त्तव्यं सदैव पूजनं महत् अतिगु
प्तेन कर्त्तव्यं सर्व्वथैव वरानिश्चितम् इत्याचारपरः श्रीमान् जपपू
जापरायणः पालकः कुलतत्त्वानां परतत्त्वे प्रलीयते अणिमाद्य
ष्टसिद्धीनामाश्रयः साधकोत्तमः। प्रायश्चित्तं भृगोः पातं सम्मांसव
न्धारणम् कायक्लेशमनाक्तिं वा तीर्थयात्राद्युपोषणम् वर्ज्ज
येद् प्रयत्नेन यदीच्छेत् सिद्धिमात्मनः वीरहत्यां वृथापानं वीरद्र
व्यापहारिता वीरस्त्रीगमनं चापि तत् संयोगाच्च पंचमः महापात
कमित्युक्तं सर्व्वथा परिवर्ज्जयेत् कुम्भं नालिकां चैव चिंचामेव
नावादयेत् भुक्त्वा चान्द्रायणं कुर्य्यात् सिद्धविद्याप्रपूजकः इक्षु
वर्णं न भुंजीत शिवा कालीति नो वदेत् न छेदयेत् कदंबं च वि
प्रान् पूजकः सदा प्रमादाद्यदि कुर्वीत सन्देशी शापमाप्नुयात्
कुलधर्म्मं समाश्रित्य आचारं यो न पालयेत् यथेच्छाचारिणस्त
स्य महापातकिनः सदा निष्कृतिर्नास्ति तस्यैव महारौरवं सकुले
स महापशुरित्युक्तो देवताशापमाप्नुयात् गुप्तप्रकटसंभूतं ज्ञाना
ज्ञानकृतं तथा निषिद्धाचरणं यत्र कृत्वापि यदि जायते प्रायश्चित्तं

कौ तत्रतत्रकर्त्तव्यंसाधकेनच निषिद्धाचरणेमस्यक्वापापस्यगुरुलाघ
९८ वम् देशकालंवयोवित्तंसम्यग्यथाविधि प्रायश्चित्तंगुरोःकुर्या
58 त्सर्वपापविशुद्धये शिष्यःपिवल्लतत्प्रोक्तंप्रायश्चित्तंसमाचरे
त् अथवासर्वपापानांगुरुनामजपःस्मृतः ज्ञात्वानदस्यकल्मषप
विशुद्धंयथाग्निना अनाचारस्यमालिन्यंप्रायश्चित्ताग्निनादहेत्
लक्षंनाम्नोगुरोर्जाप्येसर्वपापद्विमुच्यति अथवाप्यजपालक्षं
लोप्यलक्षत्रयंतथा जपान्मुच्येतपापेभ्यःसर्वेभ्यःसाधकःसदा
वियल्लुप्तयुतंशक्तिःसविसर्गोऽजपामनुः वियच्छक्तिस्ततःका
मोहोणिचपरमेश्वरी आकाशंमयुकामोचशिवःशक्तिस्तपार्व
ति वन्हीऽनंगोपरादेवीलोपामुद्राप्रकाशिता वरुनात्रकिमुक्ते
नरहस्यंजप्यतेऽधुना वर्णाश्रमाणांसर्वेषामाचारःसद्गतिप्रदः
प्रजादोषश्चराजानंजायादोषंपतिंयथा तथाप्राप्नोत्यसन्देहःशि
ष्यपापंगुरुःसदा गुरुस्त्रिवारमाचारंकथयेच्चस्वशिष्यके नगृह्णा
तिहिशिष्यश्चेत्तदापापंगुरोर्नहि कुलधर्मप्रसंगंतुपशूनांपुर
तस्त्यजेत् कदाचिन्नैवकुर्वीतशूद्रोवेदपाठवत् पीठक्षेत्रागमा
म्नायंतद्विधाचारकौलिकान् कुलद्रव्यादिकंचापिनवदेत्पशुस
न्निधौ यथारक्षतिवीरेभ्योधनधान्यंवरादिकम् कुलधर्मंतथा
चैवपशुभ्यःपरिरक्षयेत् स्वगुप्तकौलिकाचारमनुंरक्षन्तिदेवताः
वीक्ष्यसिद्धिमवाप्नोतिनाशयंतिप्रकाशकान् इतिश्रीज्ञानानन्दप
रमहंसविरचितेकौलावलीनिर्णयेदशमोल्लासः १० ॥

अथभावंप्रवक्ष्यामियथावत्तत्रानुसारतः भावस्तुत्रिविधःप्रोक्तादिव्य
वीरपशुःक्रमात् गुरुस्तुत्रिविधश्चैवतथैवमंत्रदेवता आद्यभावोम
हाश्रेयान्सर्वसिद्धिप्रदायकः द्वितीयोमध्यमश्चैवतृतीयोवि
ष्वनिन्दितः बहुजप्यात्तथाहोमात्कायक्लेशात्तुविस्तरैः नभा
वेनविनाचैवतंत्रमंत्राःफलप्रदाः किंवीरस्नापनैर्लिंगैःकिंवा
कृष्टकुलाकुलैः किंपीठपूजनेनैवकिंविप्रभोजनादिभिः स्वकु
लप्रीतिदानेनकिंपरेषांतथैवच किंजितेन्द्रियभावेनकिंकुला
चारकर्म्मणा यदिभावविशुद्धात्मानस्यात्कुलपरायणः भा
वेनलभतेमुक्तिंभावेनकुलवर्द्धनम् भावेनगोत्रवृद्धिःस्याद्
भावेनकायशोधनम् किंन्यासविस्तरेणैवकिंभूतशुद्धिविस्त
रैः किंवृथापूजनेनैवयदिभावोनजायते केनवाप्यतेविद्या
नशाकेनप्रजप्यते फलाभावस्त्वनियतंभावाभावात्प्रजायते प्र
थमंब्रह्मभावंतुकथ्यतेतंत्रवर्त्मना यद्ब्रह्मदेवतायत्रतत्तेजःपू
जपूरितम् तेजोमयंजगत्सर्वंविभाव्यमूर्त्तिकल्पनम् तत्तन्मू
र्त्तिमयैर्मन्त्रैःस्वेनस्वेनैववापुनः आत्मानंतन्मयंदृष्ट्वासर्वंभावं
तथैवच तत्सर्वंयोषितिध्यात्वाचिन्तयेद्व्यतमानसः अष्टा
ङ्गातद्योरुशाङ्गंतुभवतीतिप्रचक्षते तत्रभावप्रकाशश्चेत्सभावः
परमोमतः वारुणाद्मूलपर्य्यन्तंपीत्वापीत्वापुनःपिबेत् तस्यान
वशास्त्रिजपात्त्वावेणिताच्चतमोभवेत् स्त्रियांतंकरुणेवीरोनि
र्विकारःसदाभवेत् स्त्रियतत्त्रज्ञातुनावाच्यंजंबोरुजयनस्त्रियाः

के॰ नाभिरोमावलीवक्षःस्थलैःपीनपयोधरैः ग्रीवानयनपर्य्यंतकेशा
८१ ग्रैःप्रकरस्मितैः यावन्मधुमदाघूर्णितदिव्यभावविलोकितैः स्निग्धे
59 न्द्रियसर्व्वसन्तुष्टस्सर्व्ववर्गपदाश्रयः ततःकामकलांध्यायेत्साधः
स्थिरमानसः निवृत्तिकानिष्ठनर्भावघूर्णामृतैर्निजैः मुखंविन्दु
वदाकारंतदधःकुचयुग्मकम् तदधःसपरार्द्धंचचिंतयेत्तदधो
मुखम् सर्व्वविद्यामृतापूर्णंसर्व्ववाग्विभवप्रदम् सर्व्वार्थसाधकं
चैवसर्व्वरंजनकारकम् सर्व्वदेवादिमूर्त्तंचसर्व्वदेवनमस्कृतम् स
र्व्वाह्लादनसंपूर्णंसर्व्वमोहनकारणम् सर्व्वार्थसाधनंचैवसर्व्वव
श्यप्रवर्त्तकम् एवंकामकलाध्यानंसयोगीसाधकोत्तमैः एतद्रू
पंतत्वात्मानंचिंतयेत्साधकस्सदा सदा। मेढ्रस्थानेशिखाका
रमाधारेकनकप्रभम् नाभिस्थंसूर्य्यविप्राभंतरुणादित्यवर्च्चसम्
हृदिवह्निशिखाकारंतनूर्ध्वेभास्करद्युतिम् कंठेदीपशिखाकारं
घंटावैदूर्य्यसन्निभम् लंबिकेचन्द्रबिंबाभंभ्रूमध्येरत्नवद्युतिम्
नयनेविश्वतेजश्चचिन्तयेदेषुसाधकः धृत्वारहस्यथवारहस्याध्या
त्वाकामकलातनुम् कुलेषुतत्कलारूपमकुलेपरिचिंत्यच त्व
र्णंतद्दृष्टिमर्षेणजायतेभावसंचयः कुलीनोजायतेयस्मात्तत्
सर्व्वंकथितंशुभम् कुलेसाक्षाद्यतस्त्वंदेवीतिष्ठतितत्ततः ते
नतत्कुलशास्त्रांगोपनीयाप्रयत्नतः कुलदेवीच स्वदेवीनिश्च
लायस्माद्विद्यते सयमः पुरुषोलोकेनिश्चलोयतएवसः इतिका
मकलाध्यानंकथितंसर्व्वसिद्धिदम् परयोषादिकाज्ञेयानिजस्त्री

प्रीतिवर्द्धिनी श्रागतेस्वागतंकुर्य्याल्लीलायोगात्स्वलीलया तल्पाद्वो
त्थाप्य हस्ताग्रे धृत्वा संवेशयेत्ततः वामभागसमासीनां स्ववेशीचा·
रुहासिनीम् धृत्वा कामकलां तत्र विन्द्वादिसृष्टिविग्रहाम् गन्धमा
ल्यैस्ततो दत्वा मुक्त्वा च साधकः इच्छेत्कुलकथां सर्वां लौकिका
लौकिकादिकाम् तस्यां निन्दाभयक्रोधकटूक्तियोजनं यदि का·
रोति कुलशास्त्रज्ञः सिद्धोऽपि नश्यति ध्रुवम् कृत्वा दोषादिकं त·
त्रस्त्रि हृष्टीवशित्वया भावयेन्न कटूक्त्या वै कृते तन्निष्फलं भवेत्
कुलशास्त्ररहस्यं तत्कुलमूलं ततो जगत् वरं कुलमनोस्मागेव
रं कुलगुरोरपि नत्यागयोग्यं स्वकुलं दृष्टदोषेण सर्वथा स्वकुले
कुलवाकुल्यं यदिस्याद्भागप्रयोगतः सममरूपं विधायात्मं वै परिं प
परित्यजेत् पृथक्कुर्यान्न पृथग्ध्यानं पृथक्पूजा पृथक्स्तुतिः
न कर्त्तव्या प्रयत्नेन किमेभिर्बहुजल्पितैः वीरापत्यकुले चैव वीरप
त्नीकुलेऽपि च स्थितिस्थिति देवेशि नात्र कार्य्या विचारणा तासां·
निश्वासयोगेन तद्देशाश्च वनश्यति प्रमादादमृतस्नानं देव्याः
स्यान्नात्र संशयः कुलजासामहायुद्धे वीरास्फालननादिनी नदो
षमनुगच्छतीयालयन्तीयतोजगत् मानसर्व्यपतिविद्विषः क
टूक्तिः कलहादिकम् नीचाभिगमनाद्यैव न स्याद्देवीहरप्रिया एवं
कुलं परित्यज्य साधयेत्सिद्धिमात्मनः फलपाकविधानं हि कथ्य
तेतंत्रवर्त्मना वीरपत्नी च परमा स्वयमेव महेश्वरी तन्त्रस्तु नाकु
लविद्यानामाद्यावैत्रिपुरातनी तद्भुवनेशानी सर्वमंत्रप्र·

कौ बोधिनी साधतोः साधतो वापि वीरपत्नी गृहस्थ यदि दीक्षणाद् देवसर्व्वी
५३ र्थसाधकः साधको भवेत् यदि भाग्यवशाद् देवि वीरपत्नी तु लभ्यते
८० फलपाकं तत्र कृत्वा किं न सिध्यति भूतले फलपाकविधानं तु सर्व्वदे
६८ वनमस्कृतम् दृष्ट्वा दृष्ट्वा कुलं चैव देवगन्धर्व्वकिन्नराः आयान्ति फ
५३ लपाकार्थं तस्माद् यत्नविशेषतः विसर्जनं विधातव्यं गोपनं भाव
शक्तिकम् तन्तत्कल्पविधानेन कुलं कुर्य्यात् सुशिक्षितम् या
त्रै पतिव्रता धर्म्मात् धर्म्मो न हि जगत्त्रये पतिः प्राणप्रदो नित्यं पतिरे
व परं तपः पतिरेव परं ब्रह्म पतिः प्राणाधिकः प्रभुः सर्व्वतीर्थमयः
स्वामी सर्व्वदेवमयः पतिः सर्व्वदेवीमयश्चैव पतिरेव महागुरुः
सर्व्वदेवमयं हित्वा या नारी परगोचरा शूकरी गर्द्दभी काकी शृगा
ली जायते ध्रुवम् अहं तु पुत्रवद् देवि नात्र भीतिर्न च त्रपा न वलिंग
यो हि याति पतिं रूपधरः क्वचित् मूलमन्त्रं जपन्तोयं तद्गात्रो ऽहम
यीश्वरी तदा यदि वदि हि न स्यात् तदास्य पतिरेव हि इत्यादि शिक्षया
कार्य्याः शिक्षिताः कुलयोषितः आगत्योपविशेत् पार्श्वे मुखं वी
क्ष्य स्मिता भवेत् पतिभावेंगितेंगितं दृष्ट्वा पतिदर्शने उत्त
रेणोत्तरं दद्यात् श्लाघ्ये रेव शुभकर्म्मणि एवं कृत्वा विधानेन साधकः
स्थिरमानसः योगिनीनां महापूजां वटुकानां तथैव च कार्य्या वि
घ्नविनाशार्थं कुलवारस्य योगतः तासां मूलं तरोर्मूले मूलविद्यां
च कालिकाम् विसर्जनं विधौ कुर्य्यात् साधकः कुलपातनम् यद्रू
पपीतिरेतस्य कुलस्य कुलवित्तमः तद्रूपविग्रहं कृत्वा साधकः स्थि

रमानसः तत्रवीजार्पणैः कृत्वावर्तितकुलरत्नम् लिंगैर्द्वाकैः पदे
ष्वेवज्ञात्वाकुलसमुद्भवम् देवज्ञातेनवैरञ्जीतं यथार्थज्ञानशास्त्रतः
ज्ञात्वाकुलविभागंतत्पंचमान्परतोद्रुयः सप्तमाष्टममासात्तावष्ट
मध्येसरोवरे दक्षापादुकाख्याविद्यांसंहारयोगतः जपेदष्टसहस्रं
वैस्वयंहृतात्पतिष्ठति पादुकांहृज्जयानीतिकथितःपादुकामनुः
एवंकृतेयत्पतितंतत्फलंदेहिनिर्मितम् स्वस्थामिकंवपतितंवै
परित्यागमागमात् एतल्लिंगफलंज्ञात्वाश्रानीयत्नालयेत्ततः गत्य
द्रुंश्चकटुद्रवंदत्वावस्नायकोत्तमः येनसुद्रामतीकृत्यहोमंकुर्या
दलद्वितः रात्रावेवविधायैवयत्नशेषंभुजेत्ततः सुक्तमात्रेतत
स्मिन्वैचिरजीविदितोभवेत् सप्तमामधुमतीनसकरस्याभोग
दायिनी नित्यामधुमतीतस्यजायतेनात्रसंशयः मधुमत्याःफलं
चैवकथयामिशृणुष्वमे स्वयायाराससमावाणिवक्त्रात्तस्यप्रजा
यते सर्वज्ञःसर्वशास्त्राणामधीपःकुलनायकः चन्द्रसूर्यौगपि
एष्टंवामुनत्किवकुलंसत्ववम् देवकन्याप्सरोभिश्चदिव्यगन्धर्वक
राणैः नानाविलाससंपन्नैःकलाकुशलकोविदैः नृत्यगीतेषुवकु
लैर्नानोपायरसायनैः अमृताद्यैःप्रीतिकरैर्दिव्यभोगैःसुदुर्लभैः
देवकन्याहस्तगतेरहस्यारूढयोत्सुका आयातिसाधकाकांक्ष
याद्यापरमेश्वरी यत्रकामेश्वरोदेवश्चिन्तारसमुपागतः तत्रैवा
यांतिसततंदेवकन्याःसहस्रशः इन्द्रयोग्यांपुरीकृत्वावसंतिसा
यकैःसह ततोपगामपायात्माय क्रान्तवकुलंसत्ववम् चिरकालेसु

कौ विस्थितत्वाच्चाते मुक्तिमवाप्नुयात् साधकानां कुलज्ञानां न दोषः फल
५४ पातने पतत्फलनिपातार्थं कुलप्राप्यापदे पदे विघ्नं करोति सर्वत्र
८१ निजसंकोचकारणात् फलं वृक्षोपरि तथा विघ्नमाचरति ध्रुवम्
फलवृन्तस्य हानिश्चेत्कदाचिद्देवयोगतः साधकोऽपि भवेत्तत्र त-
61/54 दा च सविकल्पनम् तावन्न कुलपूजा स्याद्यावन्न निष्कृतिर्भवेत्
तावन्निजकुलालापा वर्जनीयाः प्रयत्नतः पतत्कार्यविधानेन
योग्या नास्तीह भूतले अतिदूरस्थिते देशे नामवर्णविवर्जिते करो
ति यदि तत्र स्याद्विघ्नं वा फलसाधनम् न दोषस्तत्र वार्यान्ते साध
काः कुलदेवताः विघ्नप्रधानमेतत्तु कदाचित्फलसाधनम्
शंके तेनैव कर्तव्यं सर्वत्र फलसाधनम् स्वफलं समनुप्राप्य क्रि
यते यदि यामैः फलं भवति तेनैव पापेन वध्यते ध्रुवम् दिव्यभा
वः साधकेन्द्राणां सर्वशास्त्रसमो भवेत् एष ते कथितो दिव्यो भावः प
रमाद्वहः न देयो यस्य कस्यापि परिगोप्यः प्रयत्नतः ॥
अथातः संप्रवक्ष्यामि वीरभावं च मध्यमम् निर्द्वन्द्वमानसो भूत्वा
रुद्राकामकलातनुः निशि पूजाप्रकर्तव्या हेतुयुक्तः सदा भवेत्
निजकुलं समादाय सर्वभैरवरूपधृक् कुलं च भैरवीरूपं तद्गा
त्रैस्तासविस्तरम् विन्यसेत्सकलं ध्यानं नवयोन्यात्मकं तथा प्रसून
कलिकामध्ये पुष्पप्रकरसंकुले नानागन्धसमाकीर्णे कुलद्रव्य
णां यन्त्रकम् लिखित्वा पूजयेच्चक्रे घटस्थापनपूर्वकम् पूर्वव
न्माण्डलं कृत्वा पूर्वोक्तैक्रमतं घटम् संस्थाप्य हेतुना पूर्ण्य त्वात्म

णादिविभेदतः तत्रमंत्रंविलिख्यैवेयद्यत्कुलसमुद्भवम्
ध्यात्वेष्टदेवतांतत्रजपेदष्टोत्तरंशतम् येनमुद्रांप्रदर्शयेन्म
न्तंतद्विचिंतयेत् इष्टार्घ्यस्यतुपात्रेवैनृत्यंतियोगिनीगणाः
इन्द्रादयःसुराःसर्वेनृत्यंतिमधुलोलुपाः ब्रह्मविष्णुमहेशाद्या
नृत्यंतिहर्षितत्पराः अर्घ्यपात्रंविधायाकुलाग्रेवैचैकभागकं
पकंकुलायदत्वावैयकेनदेवतर्पणम् पीत्वाकुलरसंसंपूर्णना
नालंकारभूषितम् आनन्दरूपवान्भूत्वापूजयेत्परमेश्वरीं
ततत्कल्पोक्तविधिनातत्तन्मंत्रप्रपूज्यच विसर्जनंविधायाथ
स्वकुलेयोजयेत्ततः भक्तिस्वरसपानेनदेवीभुनक्तिचामृतम्
तत्तत्कुलरसास्वादैर्देव्याःप्रीतिःप्रजायते तत्फलग्रहणाद्देव
सुमेरुशृंगरोहणम् लतालिंगनमात्रेणसर्वथाधौतकलेवरः
मूलयोगकृतेतत्रजपेदष्टसहस्रकम् जपस्यान्तेहविर्दद्याद्गृही
त्वातेनतर्पयेत् विधायतर्पणंचैवप्रदक्षिणमनुव्रजन् कल्पो
क्तेनप्रणम्याथस्तोत्रेणतोषयेत्ततः इदंवीरकुलेचैवसुन्दरंसु
मनोहरम् यद्देशेविद्यतेवीरस्तत्कुलेचैवतत्स्तुतः नचना
रीभयंतत्रनचराजभयादिकम् सुमंगलंसदातत्रधनपुत्रवि
वर्द्धनम् लक्ष्मीर्वाणीसदातत्रसुस्थिराभवतिध्रुवम् मंत्रस्य
विरोधिन्यत्रवर्षंपरहम्मूलके योजनीयंप्रयत्नेननचविघ्नंप्र
वर्तते नाम्नवीरेणतद्योगग्रहणेदेवतैरपि योगिनीभिर्नस्म
मंतान्नचपापेनयुज्यते यत्रतत्रकुजेवारेश्मशानेगमनेकृते

कौ पूजाफलं भवेत्तत्र सप्तवासरसम्मितम् वत्सरदर्शं प्रागते तत्र पक्षपूजा
५५ फलं लभेत् नागतेनार्च्चिते योनिपद्मे रेव न संशयः नान्यस्माद
८२ यिको देव इति चिंतापरायणः साधके क्षोभमापन्ने देव्याः क्षोभः
55/62 प्रजायते तस्मात्प्रयत्नात्साधको भवेद्धीरवरः सुधीः भोगेन
मोक्षमाप्नोति भोगेन कुलसाधनम् यद्यद्ददाति निद्राति यत्
करोति यद्ब्रवीति तत्सर्वं कुलरूपं तथ्यात्वाच्च विहरेत्सुधीः ए
काकी निर्जने देशे श्मशाने निर्जने वने शून्यागारे नदीतीरे निः
संगो विहरेत्सदा वीराणां जपकालस्तु सर्वदेवप्रशस्यते सर्व
पीठं सर्वदेशे कर्त्तव्यं नात्र संशयः वीरसाधनकार्यं च कर्त्तव्यं वी
रपुङ्गवैः दिव्यैरपि च कर्त्तव्यं पशुभिर्न च पामरैः वरं पामरका
र्यं तु न पशोरिति निश्चयः यत्तु देव्याः पुरा प्रोक्तं शाम्भवं तन्मन्त्रसाध
नम् अंजनं गुटिकां दीक्षां कुर्याद्धीरो महाबलः दिव्यवीरगणभेदो
ऽस्ति यो भेदः स तु कथ्यते शान्तो विनीतो मधुरः कलालापसं
युतः दिव्यश्च देववत्प्रायो वीरश्चोद्धतमानसः विभूतिभूषणो
वापि चन्दनेनापि लेपितः अव्यक्तरागपानो वा व्यक्तो वा दिव्यसा
यकः रक्तचन्दनदिग्धांगो वैष्णवो वाप्यवैष्णवः असंस्कृतः संस्
कृतो वा नित्यसिक्तः कुलेश्वरः अपमाने च पूजायां हृष्टपुष्टः सदा
भवेत् वेदनिन्दापरो वापि तत्पूजादिपरोऽपि वा पूजारतस्तद्
हितः कुलाकुलमतेस्थितः निजभावसमायुक्तो देववद्विहरेत्
क्षितौ वेदहीनैर्द्विजैश्चैव यज्ञमत्कृतिसंसत्क्रिया विश्वभक्तिं विना

देविभक्तिर्नप्रभवेद्यथा शक्तिज्ञानंविनामुक्तिर्यथाह्याम्नाय॰
कल्पते गुरुंविनायथाऽत्रतेनाधिकारःकथंचन पतिहीनायथा
नारीसर्वकर्मविवर्जिता कुलंविनायथादेव्यावीरोवाममसा
यकः नाधिकारीतिकौलेयस्तस्माद्भावपरोभवेत् विनाकु॰
लेनविद्यानांवीराणांचतथैवच मंत्रसिद्धिर्नजायेतजन्म
कोटिशतैरपि अविनीतंकुलंयस्यसकथंममपूजकः त॰
स्माद्यत्नात्सदाकार्य्यंयथास्याद्भिनयान्वितम् भावाभावा
त्कुलेशास्त्रेनाधिकारःकथंचन तेनभावविशुद्धस्तुसाध॰
कःकौलिकेभवेत् इदंवीरकुलंचैवद्वियादपिमनोरमम्
पशुभावंप्रवक्ष्यामित्रितीयंसर्वनिन्दितम् यथाविधिपशो
र्विद्यांगृहीत्वाभावतत्परः प्रथमंसर्ववमेवार्थ्यंयत्नतःशुद्धि॰
माचरेत् नमत्स्यभोजनंकुर्य्यान्नस्त्रियंमनसास्मरेत् परद्र
व्येनलोभःस्यान्नभोगमानसंभवेत् परद्रव्येनलोभःस्यान्नग्नसि
न्धुतीरेपर्वतेवाकाननेवासुरालये विल्वमूलेविधिक्रेतपु॰
ण्यक्षेत्रेसुशोभने नशूद्रदर्शनंकुर्य्यात्कोटिसहस्रतस्पर्शनेन
देवताशुभवर्णानिस्यात्यत्नसमाहितैः त्रिसन्ध्यंदेवपूजा
स्यात्त्रिसन्ध्यंजपमाचरेत् रात्रौमालांवमंत्रंचस्पर्शनेनैवक
दाचन नमंत्रंप्रजपेद्धुत्कामोनीस्यात्सर्वकर्मसु सर्वकाले
स्त्रियंनैवगच्छेद्वैसाधकोत्तमः पुष्पगन्धंजलंचैवस्वयमानी
यपूजयेत् मैथुनंतत्कथालापंतद्गोष्ठीपरिवर्जयेत् सत्त

कौ कालंविनागच्छेन्नवर्षस्त्रियमादरात् शृणुणश्रवणेश्रद्धावदेवे·
५८ दार्थतत्परः नशोत्रोभोजयेद्विद्वांस्तांबूलंचतथैवच गुरुणा
६३ यद्यदादिष्टंतत्सर्व्वंयत्नतश्चरेत् स्वजातकुसुमंचैवदेहोत्थद्र
व्यंतथैवच पतनस्पृष्टंपुत्रिशांतंचपंचगव्येनशुध्यति रक्तव·
स्त्रंनगृह्णीयात्देवीभक्तिपरायणः विस्तृतंत्रोक्तकल्पादि
तदनुष्ठानमेवच कार्य्यंवीरकथालापंनकुर्याद्वीरवंदितं
निमश्राद्धंगरोग्रांसमस्त्यावन्दनमेवच तीर्थस्नानंपीठदे
वीगमनंयत्नतत्परः पशुस्तद्विविधश्चैवादीक्षितोदीक्षि
तस्तथा दीक्षितस्याधिकारोऽस्तिपूजायांचैवनिश्चितम् गुरु
द्वैतस्यकुत्रापिनाधिकारस्यसर्व्वदा पूर्व्वस्यनाधिकारोऽस्ति
पूजादेशगतागतौ पूर्व्वस्तुकौलिकैःसर्व्वैर्वहिःकार्य्यःस्वदे
शतः पूर्व्वदर्शनमात्रेणकुलदर्शनमाचरेत् ब्रह्महत्यादिकं
पापंकथंमहत्वंरंचन पूर्व्वस्यदर्शनेनैवसत्यंसत्यंसुनिश्चि
तम् देवात्मासोऽपिनियतंविमूढात्ययद्यपिध्रुवम् तथापि·
नायतेशंकानदादेव्याःपदेपदे वरंकुलपरित्यागंवरंस्वकु
लहिंसनम् .... वरंस्वकुलकृन्तनम् का
येनमनसावाचावरंस्वकुलपातनम् नचकुर्यात्पूर्व्वसंग
देवंगतत्वयकारणात् कुलशास्त्रदुर्धर्षपापंगरिष्ठोभवतिध्रुवं
स्वकुलेमहतीनिन्दापरयोगेतथैवच तस्मादपिमहत्पापं
त्त्वा भूतनाथाय दापयेत् हूं मन्ते भूतनाथाय ते श्मशानाधिपइ
मपि प्रणवाद्येन मनुना दापयेद्बलिमुत्तमम् कूर्च्चं सर्व्वगणाना
थाधिपतये च ततो वदेत् श्मशानमस्तके चैव बलिं पूर्व्ववदाह
रेत् ताराद्येन बलिं दत्त्वा पञ्चगव्येन चैव हि अस्थिं संप्रोक्षणं कृ
त्वा तत्र पीठमन्त्रं न्यसेत् भूर्ज्जे वा वटपत्रे वा पीतवस्त्रेऽथवा पु
नः लिखित्वा स्वीयमन्त्रं च स्थापयेदासनोपरि पीठमास्तीर्य
तस्मिन्नेव हवीरासनः सुधीः कूर्च्चबीजद्वयं पश्चात्मायायु
गमसमुद्धरेत् कालिके घोरदंष्ट्रे च प्रचण्डे चण्डनायिके दानवा
न्दारयेस्त्रक्कारनेति द्वितयं ततः शवशरीरे महाविघ्नं छेदय
द्वितयं ततः द्विठान्तयमं शस्त्रान्तो वीरार्हनमनुर्म्मतः अनेन
मन्त्रितं लोष्टं दशदिक्षु विनिःक्षिपेत् तन्मध्ये भैरवा देवा न विघ्नैः
परिभूयते यदि प्रमादवशेनैव साधको भयविह्वलः अर्कं तु
सितवात्ताक्तलमूलैर्निर्म्मितवर्त्तिका प्रदीपं गर्त्तमस्थाप्य अस्त्र
मन्त्रेण साधकः अस्त्रं प्रपूजयेत्तत्र दीपं संरक्षयेत्ततः एतेन
स्मिन्महादीपे विघ्नैश्च परिभूयते स्वस्वकल्पोक्तविधिना भू

नमुद्राादिकंचरेत् योढांवा नारकं वापि विमस्य पूजयेत्ततः नाना
विद्याप्रभेदेन योढा च वक्ष्यामि वे तत् नारकः सर्वशास्त्रेषु कथ्यते
नेतं त्रवर्त्मना विमसेन्मात्रकास्थाने मात्रकां नारं संपुटाम् मा
त्रकापुटितं तारं नारकः परिकीर्त्तितः विधिवत्पूजयित्वा च
निजदेवीं स साधकः मंत्रध्यानपरो भूत्वा जपेन्मंत्रमनन्यधीः
प्रकालं तरं यदि भवेत्तद्दिक्सहस्रं ततो जपेत् सहस्रे चाष्टसाह
स्रे च प्रहरे त्वयुतार्द्धकं ग्रतः परं तु मंत्रज्ञो गणनां तकसहस्रकम्
अथवा निशायां वा समारभ्य उदयांतं समाचरेत् जपादौ तु व
लिं दद्यात् पश्चादपि वलिं हरेत् जपांते जपमध्ये वा देहि देहीति
भाषिते तदापि च वलिं दद्यात् महिषं छागमेव वा वलिदान
विधानं हि वक्ष्येऽहं सिद्धिहेतवे तरुणं स्वन्दरं कृष्णं मत्तानादि
दोषवर्ज्जितम् स्वयं पूर्वमुखो भूत्वा वलि सुन्दरवक्त्रकम् समा
नीय स्ववामे च प्रापयेत्तदनंतरम् अर्घोदकेन वीरेन्द्र गा
प्य मन्त्रनामुना वाराही यमुना गंगा करतोया सरस्वती का
वेरी चन्द्रभागा च सिन्धुभैरवसागराः अर्जस्त्रानेमहेशानि
सान्निध्यमिह कल्पय ॐ पशुपाशविनाशाय देमकूटस्थिता
य च परायपरमेष्ठिने हूं कारायचमूर्त्तये संप्रोक्षणं विधायाथ
वलिं संपूजयेत्ततः ब्रह्मरन्ध्रे च ब्रह्माणं मस्तके मेदिनीं तथा
कर्णयोश्च तथाकाशं ग्रीवायां सर्वतोमुखम् ज्योतींषि नेत्रयो।
र्विष्णुं वदने परिपूजयेत् ललाटे पूजयेदिन्द्रं दक्षिणगण्डतः

कौ वामगण्डे तथा वह्निं ग्रीवायां समवर्त्तिनम् केशाग्रे नैरृतिं मध्ये भ्रुवो
७५ स्वापि प्रचेतसम् नासामूले च श्वसनं स्कन्धे चैव धनेश्वरम् हृदः
84 ये सर्व्वराजेन्द्रं पूजयित्वा पठेदिमम् इतोन्यथा पापयुतं मलमूत्रव
शाद्युतम् तं बलिं न हि गृह्णाति देवता च कदाचन अमेषामहिषा
दीनां बलीनामथ पूजनात् कारोमेधं च मायाति रक्तं गृह्णाति
वै शिवा भूषयेद्रक्तमाल्येनासिं न्धेरेण विशेषतः तं निरीक्ष्य पठेद्धी
रो निजदेवस्वरूपकम् छागं च बलिरूपेण मम भाग्यादुपस्थितः
प्रणमामि ततः सर्व्वरूपिणं बलिरूपिणम् चण्डिकाप्रीतिदाने
न दत्तं पापहिनाशिनी चामुण्डा बलिरूपाय बले तुभ्यं नमो॰
स्तु ते यज्ञार्थे बलयः सृष्टाः स्वयमेव स्वयंभुवा अतस्त्वां घात
यिष्यामि तस्माद्यज्ञे वधोवधः ततो वाग्भवं माया च कमला
तदनन्तरम् इत्युच्चार्य बलेर्मूर्ध्नि पुष्पाञ्जलित्रयं क्षिपेत् शि
वबीजं सम्पूज्य उत्सृज्य च ततः परम् ततः संपूजयेत् खड्गं ग
हीत्वा तं पठेद्बुधः कृष्णं पिनाकपाणिं च कालरात्रिस्वरूपिणम्
उग्रं रक्तास्यनयनं रक्तमाल्यानुलेपनम् रक्ताम्बरधरं चैव पा
शहस्तं कुटुम्बिनम् पिबमानं च रुधिरं भुञ्जानं क्रव्यसंहतिम् इ
ति ध्यात्वा खड्गं संपूज्य नमस्कुर्य्यात् प्रयत्नतः आशीविषसमः
खड्गो तीक्ष्णधारो दुरासदः श्रीगर्भो विजयश्चैव धर्म्मपाल
नमो॰ स्तु ते पुटाञ्जलिं विधायाथ पठेदमुं मनुं बुधः इत्यनेन
चण्डिकायाः स्वरलोकप्रसाधकः मायायुग्मं ततः प्रोच्य काली

कालीततोवदेत् वज्रेश्वरिपदस्यान्तेलोहदण्डायचेऽतःपुना फट्
ऽयंवपठित्वाचॐवेङ्गाय नमोयजेत् विंबमायायुगंकालियु
ग्मंविकटशाहृतः दंष्ट्रेचस्कंद्रयपश्चात्फेत्कारिणिचवोद
य हुंयच्छेदययुग्मंचसर्वंदुष्टांश्चमारय हयमजंचवेङ्गोनच्छि
न्धि हंयकिलिहयम् विकिदन्तपिवदन्तरुधिरस्कोंयुगालतः
विकिदृंयकालियुग्मंद्मन्मंत्रन्तरम् अनेनमंत्रितंवेङ्गमुत्तो
ल्यस्थायकोनमः छेत्ताखर्वमुखोभूत्वाबलिमुत्तरवक्त्रकम्
श्रांह्रूंफडितिमंत्रेणछेदयित्वाततःपरम् रुधिरंजलसेत्यव
शर्करामधुसंयुतम् गन्धपुष्पान्वितंकृत्वाऽतस्तजेन्मत्रमुच्च
रन् प्रणवंवाग्भवंमायांलक्ष्मींकौशिकिशाहृतः रुधिरेण
ततःपश्चात्दाप्यायतांततःपरम् निवेद्यरुधिरंवीरःशिरोद
ग्धात्सदीपकम् नदिद्यवीक्षणंकार्य्यनचवन्यसमागमः
जलादिस्पर्शदुर्गांनागजानांदृष्टिणस्तथा पक्षिकीटपिशा
चानांयहामनसिसंस्थितम् ततसर्वंस्वमन्त्रहातभयंसर्वत्र
वर्जयेत् सायंनचसमाप्यायदक्षिणांगुरवेददेत् छागाद्यंच
जलेवैवगर्तेवानिःक्षिपेत्ततः सम्यक्सिद्धैकमन्त्रस्यनास्ता
ध्यंविद्यतेक्वचित् वङ्कमंत्ररतःपुंसःकाकथाशिवपर्वसः
स्वकुलांतेपरस्त्रर्य्याराजोकार्य्यानचान्यथा अथवा सर्वसि
द्धिप्रदंसाध्यसर्वदेवनमस्कृतम् सर्वपापहरंचैवसर्वरोग
विनाशनम् नामनस्तिद्धिप्रदंचैववीरसाधनवर्जितम् महा

कौ वलो महाबुद्धिर्महामाहात्मिकः शुचिः महाविच्छादयावांश्च सर्व
६५ भूतहिते रतः तेषां कृते प्रवक्ष्यामि वीरसाधनमुत्तमम् नास्मात्पर
85 तरं किंचित्सत्वरं सिद्धिदायकम् सर्वसिद्धिर्भवत्येव अहोरात्रैः क
लौ युगे द्वापरे तद्द्वमासेन त्रेतायां हायनेन च कृते च द्वादशभिर्वर्षैः
ससे सिद्धिर्न संशयः वटीवद्धेन वस्त्रं च मूलेन परिधापयेत् तद्धा
से च पुनर्बध्नं मूलेनांगविलेपनम् कृत्वा लीशश्च मूलेन सिन्दू
रेणार्धचन्द्रकम् इष्टदेवं गुरुं नत्वा रात्रौ प्रहरमध्यतः कार्याच
साधकैः सार्धं हृदि मंत्रपरायणम् अष्टम्यां कृष्णभौमे वा यदि
स्याद्वीरसाधकः दिग्बलिपशुस्तत्र शुक्लं साधनमाचरेत् प्र
वीरक्रदिवसे वीरो नानोपचारसंयुतः मत्स्यमांससंयुतं भक्तं कु
ंडलांगं च पिष्टकम् परमान्नं सुरां चैव भाषभक्तवलिं तथा
तिलकृष्णसर्षपं चदीपं चैव तथा धूपकम् पलालवंगकर्पूरजा
तीखदिरमातृकम् ताम्बूलपट्टसूत्रं च पलाजिनकंदबकम्
वमकं यन्त्रकाष्ठं च आश्रप्रादेशप्रमाणकम् पंचगव्यं सकलसोमक
पूजाद्रव्यं तथैव च यष्टिविद्धं शूलविद्धं खड्गविद्धं पाश्याश्मदं ते
रज्जुवद्धं सर्पदष्टं चाण्डालेनाभिभूतकम् तरुणं सुन्दरं शूरं र
णे नष्टं समुज्ज्वलम् पलायनविशून्यं च सम्मुखे रणवर्तिनम्
नस्वयं घातयेद्विद्वान् मंत्राणां तत्र वर्जयेत् स्वेच्छामृतं द्विवर्ष
वृद्धं स्त्रियं द्विजं तथा अनातुरमृतं कुष्ठि ससरात्रोर्धगं तथा
अंगहीनं च संसप्तरात्रौ कामतंसपरम् गृहीत्वा मूलमंत्रेण

पूजास्थाने समानयेत् शून्यागारे नदीतीरे सर्वतो निर्जने तथा वि
ल्वमूले श्मशाने वा तत्समीपे वनस्थले दीपस्थानं समाश्रित
भूमौ वीरार्द्धं न लिखेत् वीरार्द्धनाङ्किते भूमौ मायायामोऽत्र न विद्यते
गुरुपूजादिकं सर्वं स्ववीरक्रममाचरेत् यद्वा त्रिस्रादिमन्त्रेण भू
मौ पुष्पाञ्जलिं क्षिपेत् अघोरास्त्रेण रक्षां वै सुदर्शनवाथुनः मा
यास्फुरद्वयं भूयः प्रस्फुरद्वितयं पुनः घोरघोरतरं स्यात्ते तत्तनुरू
पपं ततः चटयुग्मं तदन्ते च प्रचटद्वितयं पुनः कहद्वयं वम
द्वन्द्वं ततो बन्धयुगं ततः घातयद्वितयं वर्मफडन्तो घोरकोऽस
न्त्रः हालाहलसमुद्भूतसंहारस्वरूपकम् वर्मास्त्रान्तमस्त्रा
मन्त्रं सुदर्शनं च प्रकीर्तितम् प्रणवाद्यस्त्रमन्त्रेण प्रोक्षितं पूजये
त्ततः प्रणवं कूर्चबीजं तु अमृतकायनमस्त्रफट् पुष्पाञ्जलित्र
यं दत्वा प्रणमेत् स्पर्शाश्रृंखकम् अतीवपरमानन्दशिवानन्द
कुलेश्वर आनन्दभैरवाकारदेवीपर्यङ्कशायक वीरोऽहं त्वां प्र
पद्यामि सन्तिष्ठ देविकार्च्चने प्रणम्यानेन मन्त्रेण क्षालयेत्
ददनन्तरम् प्रणवं शाक्तबीजं च अमृतकायनमस्ततः इत्युच्चार्य
गन्धतोयैः प्रक्षाल्य शवमुत्तमम् रक्तपुष्पो यदि भवेत् मद्यये
तत्कुलसायकम् सुधूपैर्धूपयेत् च लेपयेद्गन्धचन्दनैः उ
पचारं सदद्येत्त स्थापयित्वा तु साधकः अधिकारिविशेषेण
स्वरयान्त्र पूजयेत् गृहीत्वा तत्र दानं च सर्वं नैवेद्यमस्य पोत्
रक्षां दत्वा प्रकल्प्याथ वीरार्द्धेन समं तु स्मरन् सदासनेन ततो वीरे

कौ वीरासनपरिग्रहः भूतशुद्ध्यादिकं कृत्वा मातृजालं प्रविन्यसेत्
७९ आत्मरक्षां विधायाथ अघोरेण समाहितः ॐ हुं ॐ हुं ॐ रक्षिणीति
86 वह्निजायाततः परम् अनेन मन्त्रना वीरः सर्षपान् दिक्षु निःक्षिपेत्
ॐ तिलोसि सोमदैवत्यो सर्वदेवात्मकारकः पितॄणां स्वर्गदाता
त्वं मर्त्यानां मम रक्षकः भूतप्रेतपिशाचानां विघ्नेषु शान्तिकार
कः इति क्षिप्त्वा तिलान् तत्र वस्त्रभागं शवादितः इति संरक्षणं
कृत्वा शवमात्मपुरो नयेत् कुशशय्यां परिस्तीर्य तत्र संस्थाप
येत् शवम् एलादिना सह वीरस्ताम्बूलं तस्य वक्त्रके निःक्षिप्य
व ततः कुर्यादूर्ध्वं पश्चादधोमुखम् स्थापयित्वा च तत्पृष्ठं च
न्दनेन विलेपयेत् बाहुमूलादिकं पृष्ठं चतुरस्रं विभाव्य च म
ध्ये पद्मं चतुर्द्वारं दलाष्टकसमन्वितम् तत्र चैलेयमजिनं कम्ब
लं तत्र विन्यसेत् श्मशानाधिपतीनां च बलिं दद्यात् पूर्ववत् निः
क्षिपेद्दशकाष्ठासु पूर्वादिदशदिक्षु च क्षिप्त्वा संपूजयेत् तत्र इन्द्रा
दिदशदेवताः विघ्नमिन्द्रपदं लिख्य सहराधिपतये नमः इमं ब
लिं गृह्णापय गृह्णापय युं ततः विघ्ननिवारणं कृत्वा सिद्धिं
प्रयच्छ ठ ठ यम् अनेन मन्त्रना पूर्ववलिं दद्यात् समामिषम् स्व
स्वनामादिकं कृत्वा पूर्ववद् बलिमुद्धरेत् शवाधिष्ठानभूतेभ्यो
बलिं च स्वरयामह चतुःषष्टियोगिनीभ्यो डाकिनीभ्योपि संदि
शेत् द्वारदेशे ततो वीरः कुर्यादुत्तरसाधकम् समानगुणसं
पन्नं तान्त्रिकं विजितेन्द्रियम् अभिषेकविधिज्ञं वा देववीरवि

शारदम् संख्याप्यासनमभ्यर्च्य स्वमंत्रांते ह्रींपदं ततः फडिमने
नमंत्रेण ततस्तावाहनं विशेत् कुशान् पादतले दत्वा शवके
शान्प्रगृह्य च हृंडिनिबद्ध्य कुटिकां कृतसंकल्पसाधकः त
त्रदेवीं सम्पूज्य उपचारैः सविस्तरैः उत्थाय संमुखे स्थित्वा
पठेद्भक्तिपरायणः ॐ वशो मे भव देवेश ममसाधकपदं ततः
सिद्धिं देहि महाभाग कृताः स्वस्वप्रदा भव अनेन मनुना मंत्री
अभिलप्य कृतांजलिः ॐ भीम भीरु भयाभाव भवलोचन
भावुक त्राहि मां देव देवेश शवानामधिपाधिप । इति पा
दतले तस्य त्रिकोणं चक्रमुद्धरेत् तथास्यां तं न शक्नोति शव।
स्तनिस्सलो भवेत् अथवा मूलमंत्रं च संस्मरन् साधको नमः
पट्टसूत्रेण वध्नीयात् शवपादद्वयं ततः उपविश्य पुनस्तस्य
बाहूनिः सार्य्य पार्श्वयोः हस्तयोः कुशमास्तीर्य्य पादे तत्र नि
धापयेत् ओष्ठान्तं संपुटीकृत्वा स्थिरचित्तः स्थिरेन्द्रियः सदा
देवीं हृदि ध्यात्वा मौनी जपनमाचरेत् ततोर्द्धरात्रिपर्य्यंतं य
दि किंचिन्न लक्षयेत् जयदुर्गामनुनाद्यैतेनैव सर्षपान् क्षिपेत्
पूर्ववत्तिलमुक्तादिष्यगत्वा सत्पदानथ देवीं तत्रापि संस्मरन् जप
प्रजपेन्मनुमुत्तमम् निर्भयः प्रजपे देवि सिद्धिं वा लभते नरः
पूर्वोक्तक्रमयोगेन अद्यमालाविभागतः वलासनाद्भयं नास्ति
भये जाते वदेत्ततः यत्प्रार्थयसि देवेशि दास्ये तं कुंजरादिकं
दिनान्तरे प्रदास्ये त्वं स्वनाम कथयस्व मे इत्युक्त्वा संस्कृते नैव निर्भ

कौ यस्तु पुनर्जपेत् पुनश्चैनमयुतं वह्निवक्त्रेऽमधुरं ततः ततः स
८० ंकारयित्वा वरं तु प्रार्थयेत्ततः यदि सैनं करोति वरं स्वप्नप्रय
च्छति तदा पुनर्जपेद्धीमान् प्रकारमानसं यथा नवरूपं विना
तत्र देवोपि न हि सर्पति यत्नतस्तेन वोद्धव्यं न देवो देवयोनि
जः माता मातृस्वसा वापि मातुलानी तथैव च आगमविद्भिरु
क्तेमायया च्छायविग्रहम् उत्तिष्ठवत्स ते कार्यं सिद्धं जातं न सं
शयः प्रभातसमयो जातस्तत्पिता क्रोशते गृहे प्रायो विमत
सरालोका राजानो दण्डधारिणः कदाचित् केनवादृष्टस्तदा
निष्ठा भविष्यति इत्यादिविविधैर्वाक्यैर्नैव जाप्यं परित्यजेत् स
ताः पितृगणास्तत्र दूरदेशनिवासिनः वान्धवास्तत्र वार्याति
देवरूपधरास्ततः स्त्रीपुत्रसेवकादींश्च गृहीत्वानीयते परैः
रुदंति पुत्रकाः सर्वे भ्रातरोऽनुजसेवकाः निजकांतागर्भस्थ
शिवस्राघाभरणादिकम् गृहीत्वानीयते पत्निपालकैस्तद्वय
यजेत् दिवसे यत्र वार्णकालेवतत्र प्रजायते यदि न द्रश्यते
तत्र तदा किं वा न लभ्यते स्त्रीरूपधारिणी देवी द्विजरूपधरः
पुमान् वरं गृह्णीति शाठ्राविवेत्रिराक्रांते वरं लभेत साधुनाम्ना
धुना वापि योषिच्चेद्धरदायिनी तदा वीरपतेस्तस्य किं न सिद्ध्य
ति भूतले निष्पाप पुरुषश्चैव सत्कुलीनेव संस्तुता अर्चयेत
कृत वरं देवी पापयुक्तेन संशयः संमुक्ति संतुष्टि वापि सं स
कृतं वह्निचापरम सैव देवी न सन्देहः स देवो भैरवः स्वयम्

नचदेवोभवेच्चैवमायायारचितविग्रहः नवरंयेठंरतत्रनकिंचित्प्र
वदेत्कचित् साचेत्संस्कृतमात्मानंवक्तिवाक्यमीदृशम् नो
चेत्स्वयंकौलिकोस्यावरंग्रस्यनिबन्धनम् अथवाउत्कटंकिं
चित्ज्योतिर्वानीललोहितम् शब्दोवाजायतेसम्यगमृतंवा।
पिलभ्यते विचार्य्यतद्गृहीतव्यमेवंदिकपरिकीर्तितम्
देवकृपास्त्वकुर्यान्नरास्त्वकृतबुद्धयः अवश्यंतत्रभेतव्यं
नतत्रप्रत्ययःकचित् भैरवावटुकाश्चैवकुलशास्त्रपरायणाः
प्रत्यक्षाहप्रसंगेनकृत्वाकुटिलविग्रहाः पुत्रोभूत्वाहरेद्धिया
नारीभूत्वाविमोहयेत् तस्मात्तत्रभवन्नोवाविचारयेत्समा
चरेत् समेकृतेवरंलब्ध्वासम्यग्जपादिकम् फलंज्ञा
त्वामितिस्नात्वाकुटिकांमोचयेत्ततः अथपेयाचितानथ।
नरकुंजरसूकरान् दत्वापिष्टमयानेवकर्त्तव्यंसमुपोषणं
परेह्निनिसमाचर्य्यपंचगव्यंपिबेत्ततः ब्राह्मणान्भोज
येत्तत्रपंचविंशतिसंख्यकान् पंचपंचविहीनान्वाक्रमाच्चैव
दशावधि ततःस्नात्वावस्त्राचनिवसेत्तमेस्थले यदित
स्यात्क्षिप्रभोज्यंतदानिष्ठेनतांव्रजेत् नेनचेन्निष्ठेनंतस्यात्तदा
देवःप्रकुप्यति त्रिरात्रंषड्रात्रंवानवरात्रंचगोपयेत् शय्या।
यांयदिगच्छेत्तदाव्याधिंविनिर्द्दिशेत् गीतंकृत्वाचबधिरो
निश्चदस्तन्तेसदर्शनात् यदिवक्तिदिनेवाक्यंतदास्यमूकता।
व्रजेत् पंचदशदिनान्ताहिदेहेदेवस्यसंस्थितिः गोब्राह्मण

कौ ज्ञानिनिन्दां च न कुर्य्याच्च कदाचन देवगोब्राह्मणान्दीक्षाप्रमदं हंसमस्पृ
८८ शेत् शुचिः प्रतिनिमक्रियान्ते तु बिल्वपत्रादिकं पिबेत् ततः स्नात्वा
88 चांगायां प्राप्स षोडशवासरः ततः शतत्रयं हृष्टो देवानां तर्पणं जलैः
स्नानं तर्पणं पूर्ण्णं च न स्यादेव स्मतर्पणम् इत्यनेन विधानेन सिद्धिं
प्राप्नोति साधकः इह भुक्त्वा वरान्भोगानन्ते याति हरेः पदम् अ
सांगं सांगमेवं वा निष्फलं सफलं च वा कृत्वा साधनमेवैतत्तथा
कैः प्रियतरस्त्वमः शवाभावे श्मशाने वा कार्य्यो वै वीरसाधना
इति श्रीज्ञानानन्दपरमहंसविरचिते कौलावलीनिर्णये चतु
र्दशोल्लासः १४ ॥ नृणां शीघ्रफलावाप्तौ प्रकारान्तरमुच्यते
चतुष्पथे चतुर्द्दिक्षु पुरुषच्छदयं त्वेनेत् जीवितं ब्राह्मणस्यैव
दीपं प्रज्वालयेत् सुधीः मध्ये तथा त्वेनेदेवं तत्र सदासनं भ
वेत् सर्वालंकेन च मार्गेण तत्र संस्कारमाचरेत् महाकालादिदे
वेभ्यो वलिं पूर्ववद्धरेत् कल्पोक्तपूजां संपूज्य जपेत्प्रयतमा
नसः दिवारात्रं जपेन्मन्त्रमयुतं सर्वदेवतम् जपान्ते च वलिं
दत्वा दक्षिणां विभवावधि सर्वसिद्धिर्भवेद्ध्यानसर्वदेवनम
स्कृतः अथवा पूर्ववद्वीरयात्रां कृत्वा स्वसाधकः साधकैः स
हसामग्रीपूजायां विविधां तथा स्थाने पूर्वोदिते वीरः शवं चै
वसमानयेत् वर्म्मीत्रमनुना हस्तप्रमाणं चतुरस्रकम् लिख
वित्वा मण्डलं तत्र तेनैव स्थापयेच्छवम् ततो यागगृहात् हि
युगलं तदनन्तरं मम कार्य्यं कुरु स्वाहा अस्त्राय फट् ततः परं

दृमात्मानं शवं चैव वेष्टयित्वा च साधकः रेखात्रयं प्रकुर्वीत वलिंप
श्चान्निवेदयेत् डाकिनीहाकिनी चैव शाकिनीभ्योपि संदिशेत् स-
मांसमधुसंयुक्तं पूर्वपश्चिमयोगतः वामदेवाय दत्वा वै रक्तदत्वा
प्रदापयेत् तेजसे च बलित्रयं घृतपिष्टं सशर्करम् दक्षिणे रुद्र
कालाय वज्रनाभाय संदिशेत् सपिष्टकं घृतान्नं च यत्र पिष्ट
प्रदापयेत् उत्तरस्यां च देहिकाय दत्वा च बलिं रूपिणे गुडोदनं।
पायसं च बलिं निवेद्य साधकः ततः संपूजयेद्देवीं स्वकल्पोक्त
विधानतः अस्त्रमंत्रेण संस्थाप्य शवं तैलहरिद्रया उद्वर्तनं ततः
कृत्वा स्नापयित्वा तु साधकः समार्जवाससा तत्र महाप्रेतास
नं यजेत् जीवन्यासं विधायाथ पाद्यादिभिः प्रपूजयेत् मूले
न कुटिकां बद्ध्वा पश्चात् पूर्ववद्वालिखेत् आसनं पूर्ववत् दत्वा
मूलमुच्चार्य साधकः अश्वारोहणरूपेण स्थित्वा मंत्रं जपेत्
सुधीः अनन्यमानसो भूत्वा यावत्सिद्धिः प्रजायते भीतश्चे
त् साधकस्तत्र गुरुपादयुगं स्मरेत् गुरुपादप्रसादेन मा हिंस
न्ति न हिंसकाः इति चिंत्य स्थिरीकृत्य जपेन्मंत्रमनन्यधीः देव
ता यदि वा मे वै आगच्छति कदाचन संभाषणं च वै कार्य्या वे नदा
तमप्रियं वचः हूंकारेणैव तां कुर्य्यात् स्ववशे साधकोत्तमः ग
त्वा च दक्षिणे सापि देहि देहीति भाषते तदापि च बलिं दत्वा आश
क्रोमनसा अथवा लब्ध्वाभीष्टं निजं वीरो गुरवे दक्षिणां ददेत् शवा
दिकं जले क्षिप्त्वा गृहं गच्छेत् यथासुखम् अथवा वटमूले शवं

कौ
८९

नीत्वातत्रदेवींप्रपूज्यच सम्यक्तत्रमंत्रंजप्त्वाप्ययुतंसाधकोत्तमः स
र्वसिद्धीश्वरोवीरोभवेन्नात्रविकल्पनम् अथवा विल्वमूलेनिज
कोरेशवमारोप्यततः नृसिंहमुद्रयावीरोजपेन्मातृयामधीः
सहस्रंतत्रजप्त्वावैसर्वसिद्धीश्वरोभवेत् जानुमध्येकरौकृत्वावि
वृकोष्ठोसमाहृतो हस्तौचभूमिसंलग्नौकंपमानःपुनःपुनः
मुखंविवृतंकुर्य्यात्लेलिहानंचजिह्वया नारसिंहीभवेन्मु
द्रासर्वसिद्धिप्रदायका सहस्रंतत्रजप्त्वावैसर्वसिद्धीश्वरोभवेत्
अथवा कुंकुमागुरुकस्तूरीरोचनाघनचन्दनम् कर्पूरंपद्मरागं
वकेशरंहरिचन्दनम् एकत्रसाधितंकृत्वाप्रत्येकंसाधयेन्नरः
विद्युदग्नियुतंचैवनेत्रांतंचन्द्रभूषितम् वीजंप्रत्येकदद्यात्तानांमि
लितानांचसाधकः मूलमंत्रंचमंत्रज्ञोजपेत्साग्रसहस्रकम्
स्वयंतिलकमात्रेणराजानंवशमानयेत् जिह्वाग्ररुधिरंवीरश्चा
काशात्स्वयमाहरेत् तेनैवगुटिकांकृत्वातत्रकालींप्रपूजयेत्
नीलांनीलपताकांचलोलजिह्वांकपालिकां जिह्वाग्ररुधि
रंगृह्णन्वाभुगुणेद्धारनिःस्वने वलिंगृह्णवरंदेहिरुधिरंगगनेऽ
मले कालिकालिप्रचण्डोग्रतेतोऽस्त्रकवचंततः कालिकेयंस
माख्यातावीराणांहितकाम्यया कूर्च्चयुग्मंततोनीलायाःकथितं
मंत्रमुत्तमम वियद्भृगुरमांचैवचलमिन्दुरवीरतिः चन्द्रखण्ड
समायुक्तंततोनीलपदंततः पताकेहुंफट्ततःस्यात्सर्वकूटम
नुस्मृतः संततसेयंमहाविद्याकथितापरदुर्लभा जयश्रीयरणी

देवीपताकेवरणस्थले ततनीलपताकेयंसयोज्यानीलसाध
ने श्रीशक्तिस्मरबीजानितदंतेहूमितिस्मरेत् गुरुंसर्गान्वितंप
स्वादीर्घकवचमुद्धरेत् उग्रंचंडेपदंपश्चान्नमोऽन्तेरत्नग्रामकं
ममशत्रपदस्यान्ततनोमहापदंवदेत् ह्रींक्लींसःइत्येतेश्रीश
क्तिस्मरबीजानितदंते रांसमेदेहिसंभाष्यमंत्रंसर्गान्वितंतव
देत् क्लींकारंचततोब्रूयात्कामेममाधारमांततः पकचत्वा
रिंशद्वर्णोमन्त्रःप्रोक्तोध्रुवादिकः उग्रचण्डमहाविद्यालोल
जिह्वेतिकीर्तिता साचविद्यामहातारास्करालाइतिकीर्ति
ता पूर्णवंश्रुवंसुहृत्सतारेहतारेचतथा ततःस्वाहेतिमंत्रोऽ
यंदशार्णस्तुदीरितः कथिताचमहातारासर्वसिद्धिप्रदा।
यिका यभिरामंत्रितंचैवमूलेनेवसहस्रकम् ललाटेतिल
कंकृत्वासाधकोवीतभीःस्वयम् महाष्टमीनवम्यांतुसंयोग
पुरतःस्थितः छागमहिषमेषाणांचतुर्दिक्षुशवान्दिपेत्
कवन्धंमुण्डयंजंचदीपादिभिरलंकृतम् मध्येकवन्धमा
स्थीयतत्रगन्धवस्त्रूपपुष्पक् ताम्बूलस्रग्वंकंचस्रजनंचितलो
वनम् कृत्वातारंमनुंजप्त्वासर्वसिद्धीश्वरोभवेत् अष्टषष्टी
दितेस्थानेचतुष्पाष्येविशेषतः कुर्वन्तिविषयोष्ट्रदिकापंचवान
रुणंयदि ममसाष्टममासीयंगर्भजंयदिवाशवम् चाण्डाले
वाभिभूतंतुशीघ्रसिद्धिफलप्रदम् आनीयस्थापयेद्दीप्या
सजालंसमाचरेत् प्रेतमंत्रसमालिख्यगन्धपुष्पादिभिस्तथा

कौ॰ अभ्यर्च्यवासम्यंदत्वारक्षामात्मनिकारयेत् ततःशवास्थिविधिवद्देवं
९० तापयन्ततः ततोजप्त्वासर्वमंत्रंसर्वसिद्धीश्वरोभवेत् तारंशक्तिंस्मरत
कायनमोऽन्तंमंत्रमुच्चरन् शवस्नपनमंत्रोयंशवास्नानमन्त्रततः मूला
नेभुवनेश्वरीस्थानकंउंतोमंत्रईरितः अथवा करकांवींसमादायमुण्ड
मालाविभूषितः तेनैवतिलकंकृत्वातत्तद्भस्मविभूषितः श्मशानेवा
सकृज्जप्त्वासर्वसिद्धीश्वरोभवेत् अथवा मत्स्यमानीयवीरेन्द्रोनिःक्षि
पेत्पितृकानने तत्रसकृज्जपित्वातुदेवतामेलनंजपेत् तत्रतत्वाम।
हादेवंमहादेवींचसाधकः तद्भस्मतिलकंकृत्वास्वयंवीरेश्वरोभवेत् अ
थवा निशायामतटेकेउन्मत्तानन्दभैरवः दिग्वासाविमलीभस्मभू
षणोमुक्तकेशकः कपालीखट्वाङ्गहस्तश्चजपेन्मासकयायदि तदा
तस्यमहासिद्धिर्जायतेसहस्रजापतः अथवा डाकिनीयोगिनीवा
पिअर्थवाभूतनागनाम् तत्राप्यानीयसंपूज्यगर्जान्तकसहस्रकम्
जप्त्वाचसाधकश्रेष्ठःसर्वसिद्धीश्वरोभवेत् महापावाःप्रशस्ताःस्युः
प्रधानशवसाधने दृष्टाःप्रयोगकर्मणिप्रशस्ताःसर्वसिद्धिदाः स
र्वेषांजीवहीनानांजन्तूनांनीलसाधने ब्राह्मणोगोमयंसर्वकासाध
येद्धीरसाधनम् एवंनीलकमंचैवकथितंतवशुभावहम् नकस्मै
चित्प्रवक्तव्यंमंत्रसिद्धेश्चकारणम् अथवा कृजेवाशनिवारेवान
रमुण्डंसमाहितम् पञ्चगव्येनमिलितंचन्दनाद्यैर्विशेषतः लि
प्तंपद्मभूमौहस्ताष्ठमानतःकाननेवरे तत्रतद्विवसेरात्रौसहस्रंय
दिमानवः एकाकीप्रजपेन्मंत्रंसमभवेत्कल्पपादपः अथवा शवमा

नीयतस्त्वारितेनैवपरिलिख्यच तद्दिनात्तद्दिनंयावत्तावदष्टोत्तरंशतं
सभवेत्सर्वसिद्धीशोनात्रकार्य्याविचारणा अथवाविजनेरण्ये
अश्वियशाख्यामनोनरः उदयास्तंदिवाजप्त्वासर्वसिद्धीश्वरोभवेत्
अथवा अष्टम्यांचचतुर्दश्यांपक्षयोरुभयोरपि सूर्योदयात्स
मारभ्ययावत्सूर्योदयान्तरम् तावज्जप्त्वानिराहारकः सर्वसिद्धी
श्वरोभवेत् अथवा ग्रहणेचन्द्रसूर्ययोर्मुक्तिःपूर्वमुपोषितः न
द्यांसमुद्रगामिन्यांनाभिमात्रस्थितेऽम्भसि यद्वाशुद्धोदकेस्नात्वा
शुचौदेशेसमाहितः ग्रासादिमुक्तिपर्य्यन्तंजपंकुर्य्यादनन्यधीः
अनंतरंदशांशेनक्रमाद्धोमादिकंचरेत् तदंतेमहतींपूजांकु
र्य्याद्ब्राह्मणभोजनम् ततश्चमंत्रसिद्धिःस्याद्गुरुंसंपूज्यभोजयेत्
सूर्य्यग्रहणकालाद्धिनान्यःकालःप्रशस्यते तत्रयत्नयत्कृतं
कर्म्मअनंतफलदंभवेत् अथवा शरत्कालेचतुर्थ्यादिनव
म्यंतंविशेषतः भक्तितःपूजयित्वाचरात्रौतावत्सहस्रकम् ज
पेदेकाकीविजनेकेवलंतिमिरालये अष्टम्यादिनवम्यंतमुप
वासपरोभवेत् सभवेत्सर्वसिद्धीशोनात्रकार्य्याविचारणा
अथवा अष्टमीसन्धिवेलायामष्टोत्तरलताग्रहम् प्रविश्यमंत्री
विधिवत्ताःसमभ्यर्च्ययत्नतः स्वकल्पोक्तविधानेनपूजयित्वाच
साधकः केवलंकामभावेनजपेदष्टोत्तरंशतम् तासांचपत्रमू
लेनतुलकांसंगृह्यकर्णिके महासिद्धिर्भवेत्सद्योलतादर्शनपू
जनात् अथवा कृत्वाकुण्डलिताकारेलिखित्वायंत्रमेवच प्रसज्य

तत्रसंस्कारंकृत्वातस्यनिवेदयेत् किंचिज्जप्त्वामंत्रंनीत्वादेवता-
भावनपरः तांविसृज्यनमस्कृत्यस्वयंजपात्स्वसंयतः प्रातःस्त्रीभ्यो
बलिंदत्त्वामंत्रसिद्धिर्नसंशयः अथवागुरुमानीयदेवभावेनपूजये
त् वस्त्रालंकारहेमाद्यैःसन्तोष्यगुरुमेवच ततस्तंतत्सुतांचैव
पत्नींचैवविशेषतः पूजयित्वामंत्रंजप्त्वास्वयंसिद्धीश्वरोभवेत्
सहस्रारेगुरोःपादपद्मंध्यात्वाप्रपूज्यच केवलंदेवताबुद्ध्याजप्त्वा
सिद्धीश्वरोभवेत् गुरवेदक्षिणांदद्यात्यथाविभवविस्तरैः गुरोर
नुज्ञामात्रेणदुष्टमंत्रोपिसिध्यति गुरुंविलंघ्यशास्त्रेस्मिन्नापि
कारीस्तैरपि एवंचतत्रमंत्राणांप्रयोगःक्रियतेयदि गुरुवक्त्रं
विनाचैवसिद्धिहानिःप्रजायते एतत्तंत्रंचमंत्रंचपुत्रेभ्योपिन
दर्शयेत् अन्यथाचेतएनस्यभवनंयातिनिश्चितम् इतिश्रीज्ञाना
नन्दपरमहंसविरचितेकौलावलीनिर्णयेपंचदशोल्लासः १५
अथवक्ष्येकुमारीणांपूजांतत्रविधानतः माद्यादिकंहिविफलं
कुमारीपूजनंविना परिपूर्णफलंनैवजीवहीनंयथावपुः य
थायथादेवतायाःपूजनंवायथागुरोः तथैवहिकुलीनानांकु
मार्याःपूजनंभवेत् यथाशक्त्याहिवितरेत्कुमार्य्यायद्यदीप्सि
तम् अशक्तःशक्तमेवंहिदानाभावेफलाल्पयः पुष्पंकुमार्य्यै
यद्दत्तंतन्मेरुसदृशंमतं दत्तमन्नंचयत्किंचिद्रसभोज्यादि
कंतथा अल्पमप्यथवातस्याहीनंचकृपणंभवेत् कुमारीपूज
नाच्चैवकुमारीभोजनादपि कुमारीवन्दनादेवकुमारीसदृशो

भवेत् कुमारिका भवेद्देवी शिवोऽपि च कुमारिका कुमारी योगि
नी साक्षात् कुमारी सर्वदेवता यस्याः पूजनमात्रेण त्रैलोक्यपूज
नं भवेत् सा कुमारी महादेवी त्रिधा मूर्तिर्व्यवस्थिता परा चैवा
परा चैव तृतीया च परापरा यत्र कालेन किंचित्स्यात् देवासुर
महोरगाः त्रैलोक्यं लयमानं च तदा जाता कुमारिका आद्यस
ष्टिस्वयाशक्तिः प्रसन्ना सा त तस्त्रिधा तिलतिलात्समाजातास
ष्टिरूपा भवार्णवे मूर्तिर्वो मूर्तिरूपा सा प्रकाशरूपा कुमारिका
एकीकृत स त्रिभिस्तैव समा स्वनवधा पुनः नित्यक्रमेण देवेशि
पूजयेद्विधिपूर्वकम् अष्टोत्तरं शतं वापि एकां कन्यां प्रपूजये
त् पूजिता प्रतिपूज्यन्ते निर्गच्छस्व च मानिताः असुराश्च तथा
नागा ये च दुष्टग्रहा अपि भूतवेतालगन्धर्वडाकिनीयक्षरा
क्षसाः कूराश्च देवताः सर्वे भूर्भुवश्चैव भैरवाः पृथिव्यादीनि
सर्वाणि ब्रह्माण्डं सचराचरम् ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च
सदाशिवः ते तुष्टाः सर्वतुष्टाश्च यस्तु कन्यां प्रपूजयेत् कुमा
रीपूजनाच्चैव कोटीपूजाफलं लभेत् ति विघ्नान् पूजिता
स्ताः तथा पापं च महोत्कटम् व्याधयः सर्वे रिष्टानि पलायन्ते न
संशयः ग्रहा यत्राः क्षयं यान्ति भूतवेतालपन्नगाः असुराश्च रा
काः प्रेता योगिनीगुह्यडाकिनी महाभयानि दुर्भिक्ष उत्पातानि
सहस्रशः दुःस्वप्नभयप्रमुखम् अमेयं येऽसमुद्भवाः कुमारीपूज
ना देव न तस्य प्रभवन्ति च अणिमादीनि सिद्धानि पातालगुटिका

कौ जनाः चतुष्कं दिव्यवेतालं भवेत्कुमारिकार्चनात् लक्षणं यजनं
९२ तासां वक्ष्येऽहं तंत्रवर्त्मना द्वितीयवत्सरादूर्ध्वं यावत्स्यादष्टमाब्दि
92 कम् तावत्कुमारी विज्ञेया सर्वतंत्रफलप्रदा अथवा षोडशा
ब्दांतं यावत्पुष्पं न जायते ताभ्यः पुष्पफलं वापि गंधचंदनपा
यसम् बालप्रियं च नैवेद्यं बालभावविचेष्टितम् ताभिः प्रिय॰
करालापैर्लोभयेत्साधकोत्तमः एकवर्षा भवेत्संध्या
द्विवर्षा च सरस्वती त्रिवर्षा च त्रिधामूर्तिश्चतुर्वर्षा च कालिका
सुभगा पंचवर्षा च षड्वर्षा च उमा भवेत् सप्तभिर्मालिनी सा
क्षादष्टवर्षा च कुब्जिका नवभिः कालसंकर्षा दशभिश्चापरा
जिता एकादशे तु रुद्राणी द्वादशाब्दे तु भैरवी त्रयोदशे महा
लक्ष्मीर्द्विसप्ता पीठनायिका क्षेत्रज्ञा पंचदशभिः षोडशे चाम्बि
कामता एवं क्रमेण सम्पूज्या यावत्पुष्पं न विद्यते प्रतिपदा
दिदर्शांतं वृद्धिभेदेन पूजयेत् महापर्वसु सर्वेषु विशेषाच्च
पवित्रकम् महानवम्यां वीरेन्द्रः कुमारीं संप्रपूजयेत् पिं
गलां पूजयेद्यस्तु षोडशीं श्चैव भक्तिमान् पूजयित्वा भक्तिभा
वे सर्वसंपत्तिमालभेत् पूजयेत्कुलविद्यां च चैकां बालकभै
रवीम् एवं प्रणवयोगेन चैतन्यं तत्र मंत्रयेत् वाणीमायात॰
था लक्ष्मीर्माया कूर्चद्वयं ततः एते च प्रणवाः ज्ञेयाः कुमार्याः
परिपूजने एकादशस्वरेणाढ्यो भृगुर्विन्दुनुसंयुतः चैतन्य
बीजं कथितं साधकानां समृद्धिदम् एवं द्वाभ्यां त्रिभिश्चैव सप्त।

यातवयाशुनः निमक्रमेण नियतं पूजयेद्विधिपूर्वकम् वाग्भ
वेन जलं दद्यं मायया पादशौचकम् लक्ष्म्या वाऽर्घ्यं प्रदद्यात् कूर्चे
बीजेन चन्दनम् शक्तिबीजेन पुष्पाणि धूपं षष्ठेन दापयेत् वाग्
भवेन पुरक्षोभं मायया च गुणाष्टकम् श्रीबीजेन श्रियोलाभों ह्री
बीजेनारिसंक्षयः भैरवेणतु बीजेन खड्गत्वमनुगच्छति स्वा
मादिकं प्रकुर्वीत श्वादौ स्वीयक्रमेणतु कुमार्यां योगे ततः पश्चा
त्विशेषमासमुत्तमम् ऐं क्लीं श्रीं क्लौं ह्सौः ॐ लकुमारिके स्पद
यायनमः ऐं ह्रैं फ्रीं श्रीं क्लीं यं स्वाहा शिरसे स्वाहा ऐं क्लीं सेशि
खायै वषट् ऐं कुल वागीश्वर वागीश्वरी कवचाय हुं क्लीं अ
स्त्राय फट् ऐं सिद्धि जयाय पूर्ववक्त्राय नमः ऐं ऐं जयाय उत्त
रवक्त्राय नमः ॐ क्लीं श्रीं कुब्जिके पश्चिमवक्त्राय नमः ॐ का
लिके दक्षिणवक्त्राय नमः वर्णमासं षडंगं च कुमार्यां योगे प्रविन्य
सेत् वाग्भवेन पुरः क्षोभः मायया च गुणाष्टकम् श्रीबीजेन श्रि
योलाभों ह्रीबीजेनारिसंक्षयः भैरवेण च बीजेन खड्गत्वम
नुगच्छति अष्टोत्तरशतं वापि पूर्वोक्तमापूजयेत् पादमर्घ्य
नर्घ्यं पंकुकुमं चन्दनादिकम् भक्तिभावेन संपूज्य तस्मै राज्यं निवेद
येत् तरुणोल्लासवानभूत्वा स्वयमच्युतमानसः बालामलंकृ
तां पश्यन् चिन्तयेत् स्वेष्टदेवताम् यथाशक्ति जपेन् पश्चात् अष्टो
त्तरशतादिकम् प्रदक्षिणत्रयं कुर्यात् दादिमध्ये शुभं भवेत् ततस्तां
देवतां बुद्ध्या नमस्कृत्य विसर्जयेत् पश्चात् दक्षिणां दद्यात् राजतस्व

कौ णिमौक्तिकैः कुमारीपूजनाच्चैव कोटिपूजाफलं लभेत् कुमारीपू-
१२ जने चैव जातिमात्रं न चिन्तयेत् अशेषकुलसम्पन्ना नानाजातिसमु-
द्भवाः नानादोषोद्भवा वापि गुणलावण्यसंयुताः सर्व्वथैव कुलीना
93 नां पूज्यास्ताः शुभदायिकाः यथा यथा तत्प्रियकृत् तत् सर्व्वसिद्धीश्व-
रो भवेत् महाभये समुत्पन्ने कन्यकां च प्रपूजयेत् तत्क्षणाल्ल-
भते मोक्षं सत्यं सत्यं न संशयः ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशि-
वः तेन तुष्टाः सर्वे तु ष्टाश्च यस्तु कन्यां प्रपूजयेत् विनाशयेत् सर्व्वक-
र्माणि ब्रह्महत्यादिनश्यति गोहत्याश्चैव यच्चैव सर्व्वपापं प्रणश्यति
मातरः पितरश्चैव भ्रातरश्चैव सर्व्वतः येन येन गुनः सर्व्व कन्यादा-
नेप्रकल्पयेत् भक्तिमुक्तिफलं तेषां सौभाग्यं सर्व्वसंपदः रुद्रलो-
के वसेन्नित्यं त्रिनेत्रो भगवान्हरिः षष्टिकोटिसहस्राणि चाश्वमेध
फलं लभेत् कुमारीकल्पमाख्यातं अथवान्यतमं चरेत् सप्ताहि-
न वक्कन्यां वसमानीय प्रपूजयेत् पूर्व्ववद्विधिवत् वीरो नव बालक
मानयेत् वटुकं पंचवर्षं च नववर्षं गणेश्वरम् गन्धपुष्पादिनाक-
स्त्वैस्तथा विभवविस्तरैः अभ्यर्च्य देवता बुद्ध्यापदार्थैः परितोषये-
त् स्वकार्य्यफलसिद्ध्यर्थं वित्तशाठ्यविवर्जितः नवरात्रं यजेदेको-
त्तरवृद्ध्या क्रमेण तु नवरात्रकृतां पूजां महादेव्यै समर्पयेत् तां पू-
र्णं दक्षिणां दत्वा कुमारीस्ता न विवर्जयेत् एवं नवकुमारीणामा-
र्च्चनं प्रतिवत्सरम् यः करोति हि पूर्णात्मा देवताप्रीतिमाप्नुया-
त् मनोऽभिलषितं प्राप्य निवसेत् तत्समान्निधौ अथवा यौवनारूढाः

प्रमदानवशोभनाः पूजयेद्विधिवद्भक्त्या नवरात्रिषु मंत्रवित् कुले
श्वरीं गणनाथं क्षां महोत्सवकां करालिकाम् इच्छां ज्ञानां क्रियां दुर्गां च
दुर्कं च गणेश्वरम् पूर्ववत्कृत्य पूजाद्यैः स्वपदार्थैः परितोषयेत् प्रौढो
ल्लासेन संतुष्टाः सन्तुष्टाः यदि चेत्कदा साधकस्तीर्थमासाद्य नि
वसेत् शिवसन्निधौ एवं यः पूजयेद्देवीं प्रतिवर्षं यतिव्रतः षण्मा
सं वा त्रिमासं वा मासे मासेऽथवा त्र्यहः तिथौ वा पंचवासं पूजा
येद्देवतां धिया सर्वैश्वर्यसमृद्ध्यर्थं सम्भवेत् शिवयोः प्रियः अथ
वान्यप्रकारेण कथ्यते मिथुनार्चनम् तुलायां वापि मेषे वा सर्व
संक्रान्तिषु मुख्यशम् गौरीशिवौ रमाविष्णू वाणीसरसिजासनौ
शचीन्द्रौ रोहिणीचन्द्रौ स्वाहाग्नी च प्रभारवी भद्रकालीवीरभद्रौ
भैरवीभैरवावपि समानीय प्रयत्नेन पूजयेत् पूर्ववर्त्मना त्रितारा
दिनमोऽन्तेन तत्तन्नाम्ना विधानतः वाग्बीजं शक्तिबीजं च त्रितारं
श्रीबीजं च त्रितारकं गन्धपुष्पादिभिः पूजासवाद्यैः परितोषयेत्
प्रौढोल्लासेन युक्तानि कुर्वीत मैथुनानि च एवं कृते न सन्देहस्तु
ष्टा मिथुनदेवताः अनुगृह्णन्ति ते देवाः प्रयच्छन्ति मनोरथम् प्र
तिवर्षं तु यः कुर्यात् भक्त्या स मिथुनार्चनम् शिवलोके भनि
वसेत् सर्वैश्वर्यसमन्वितः अथवांगारवारे यजेद्यत्नात् कां
तामारूढयौवनां सर्वलक्षणसंपन्नामनुकूलां मनोरमाम्
कुलाकुलाष्टमीं वै वा समाहूय च पूजिते अभ्यंगस्नानशुद्धांगीं
स्वासने चोपवेशयेत् आत्मानं गन्धपुष्पाद्यैरलंकुर्यात् समाय

कौ क: आवाह्य देवतां तस्यां यजेन्मासक्रमेण हि कृत्वा क्रमार्चनं धूप
९४ दीपं च कदलीफलम् प्रदर्श्य देवतावृन्दां पराद्यैः षड्भिरन्वितैः मांसा
95 दिभक्ष्यभोज्याद्यैस्तोषयेद्भक्तिभावतः प्रोक्तोल्लासेन सहितां पश्य
स्रग्जपेन्मनुम् यावन्नोल्लाससहितः स्वयं तत्र भावतत्परः नि
र्विकारेण चित्तेन अष्टोत्तरसहस्रकम् जपादिकं समाप्याथ तया
सह निशां नयेत् त्रिसप्तपञ्चनवसु मासान् वा रेभुषः सदा पूजयेद्वि
धिना चैव नष्टबुध्येन गण्यते ततः श्रीदर्शनफलम् अथान्यं सं
प्रवक्ष्यामि समयाचारमुत्तमम् येन कीनाशसिध्यन्ति मन्त्राः कोटि
सहस्रशः मानवः कुलशास्त्राणां कुलाचार्यानुचारिणाम् उदार
चित्तः सर्वत्र वैष्णवाचारतत्परः परनिन्दासहिष्णुः स्यात् उप
कारतः सदा पर्वते विपिने चैव निर्जने शून्यमण्डपे वनछायेक
लाम्बे यदि देवाद्गतिर्भवेत् ताण्ध्यात्वा मनुं जप्त्वा न त्वा गच्छेद्
यथासुखम् गृध्रं वीक्ष्य महाकालीं नमस्कृत्य दलादितम् क्षेम
करीं तथा वीक्ष्य जम्बूकीयमहन्तिकाम् कुररं द्रोणकाकं तु कृष्णमा
र्जारमेव च कृष्णसारं तथा मार्जारवेतु गीतं सिंहमेव च कृशोदरि
महाचण्डमुण्डकेशी वलिप्रिये कुलाचारप्रसन्नास्ये नमस्ते शंक
रप्रिये श्मशाने च शिवां दृष्ट्वा प्रदक्षिणमनुव्रजन् प्रणम्यानेन म
नुनां मन्त्री स्वयमवाप्नुयात् घोरदंष्ट्रे करालास्ये किटिशूलिनि नादि
नि घोरघोररवास्फालेन मन्तो वित्तिवासिनि रक्तवस्त्रा रक्तपुष्पावि
लोका विवर्णाविकाम् प्रणम्य दण्डवद्भूमौ विमं मन्त्रमुदीरयेत् व

रक्तपुष्पसंकाशे त्रिपुरे भयनाशिनि भाग्योदये समुत्पन्ने नम
स्ते वर्णिनि कुलवर्त्मतथापुष्पं राजानं राजपुत्रकम् दृष्ट्वा रथश
स्त्राणिफलकान् वीरपुरुषान् महिषकुलदेवं वरदंष्ट्रामहिषमर्दि
नीम् शरण्यां जयदुर्गां वा न च विघ्नैर्न लिप्यते जय देवि जगद्धात्रि त्रि
पुराद्ये त्रिदेवते भक्तेभ्यो वरदे देवि महिषघ्नि नमोऽस्तु ते मद्यमांसं
समालोक्य मत्स्यमांसं वराङ्गियम् दृष्ट्वा च भैरवीं देवीं शरण्यां विम
लमन्ते घोरविघ्नविनाशाय कुलाचारसमृद्धये नमामि वरदे देवि
मुण्डमालाविभूषिते रक्तपात्रसमाकीर्णवदने त्वां नमाम्यहम्
सर्वविघ्नहरे देवि नमस्ते हरवल्लभे एषां दर्शनमात्रेण यदि नैव प्र
कुर्वते शक्तिमन्त्रपुरश्चरणं तस्य सिद्धिर्न जायते एतेषां मारणोच्चाट
हिंसनं वा भयादिभिः क्रियते यदि पापात्मा देवीभक्तः कथं भवेत् प्र
धानं वशसंभूता प्रधानकुलस्य ते डाकिन्यश्च तथा सर्वा देव्याः प्र
पोषिता यतः लब्धासिद्धिसमयोगात् डाकिनीहिंसनं यदि अथवा
दानवानां च मत्स्यानां विशेषतः वटुकानां भैरवाणां तस्य सिद्धिर्न
जायते ग्रामे वा नगरे वापि हट्टे वा चत्वरेऽपि च एकं दृष्ट्वा युवती नारी
कलाकौशलसंयुता भावैकभिन्नहृदया वक्रं दृष्ट्वावलोकते अथा
प्यचभुजमूलं स्वरसं न हिप्यते पुनः चेलाञ्चलपरीवर्त्तदर्शिताय
स्तनालिका कण्डूयनभावकक्षाशिथिलीकृतवाससा दर्शिता
स्तनपर्यन्तभूभागा पुनरावृता स्खलत्पादयुगात्पादपतिताङ्गु
नरूपिता सखिभिर्व्याजमासाद्य कर्णाकर्णि मनोहरम् इत्यादिभा

कौ वभाविता दृष्ट्वा साधकसत्तमः तस्या निजमनोहारी हरिः शीर्षविधा
९५ यच तत्र स्थित्वा पुनः क्षोभं कुर्य्यात् कामरूपापरः कृष्णां वा सुवर्णां वा
95 पि बालां वा सुन्दरीं तथा विदग्धां वा महाधृष्टां कुत्सितां वापि हीनजां
भावैकभिन्नहृदयां ज्ञात्वा वीरवरोत्तमः संभोगेन विनोपेक्षां न कुर्य्या-
त्कदाचन आलस्येन भयेनापि अशक्त्या वा यदि त्यजेत् कुप्याम भव
ति मातस्य शापं दद्यात् सुदारुणम् मृते च नरकं गत्वा नाना क्लेशमाप्नु
तो भवेत् निष्कृतिर्नास्ति तस्यैव यावदाचन्द्रतारकम् फलपुष्पं च ताम्
बूलं अन्नपानादिकं चरेत् महादेव्यै विना दत्वा न भोक्तव्यं कदाचन प
तिव्रता या भार्य्या यातस्यैव ऋतुसंगमे न मत्तः कुर्य्यात् प्रयत्नेन चरि
कां साधकोत्तमः शान्तिकं पौष्टिकं वापि तथैवाकर्षणकर्माणि यदा कु
र्य्यात् तदा नत्वा देवीयात्रां समाचरेत् तौर्य्यत्रिकं यदा पश्ये देवानां गीत
मेव वा तत्र देव्यै निवेद्यैव कर्त्तव्यं च प्रपूजनम् व्यायामेन विना देवसभा
यां वापि पर्वते रणे वा दुर्गमे वापि यदि गच्छति साधकः तत्र स्थित्वा म
हादेवीं प्रणमेद्भक्तिभावतः तर्पणादीन् प्रकुर्वीत तृप्यन्तां ब्रह्मभैरव
श्चावाहनेन स्थापितान्वै भैरवानिति कीर्त्तयेत् तृप्यन्तां भैरवीमातापिता
भैरवस्तृप्यताम् आदौ च त्रिपुरां पूर्वीत पश्चात् त्रिपुरां यजेत् ज्योतिष्टो-
मास्वमेधादीन् अर्थं प्रपूजयेत् प्रणम्य शिरसा धीरो भैरवीचिन्तया-
न्वितया स्त्रियो दृष्ट्वा तथैक तरुणां वसति मनोहरा तास्त्रिपुरभैरव्याः
प्रीतये वन्दनादिकम् दद्यात् तत्र प्रियद्रव्यं मनसा चिन्तयेच्च गणिका भै
रवी प्रतिरूपा इति भैरवोऽहं प्रतिरूपेः कन्यायामाश्रयणे श्रीमत् त्रिपुरा

याः प्रपूजनम् भैरवायददामाद्यदेवीं त्रिपुरभैरवीम् एवंवदेत्त्वा
द्यानेत्वकम्पकायाः प्रपूजने कथितः समयाचारः साधकस्य सुसि
द्धये यागाशक्तो भवेद्यस्तु तस्यार्थे लिख्यते स्तवः श्रीदेव्युवाच त्रि
पुरा त्रिपुरेशी च सुन्दरी त्रिपुरवासिनी श्रीमालिनी च सिद्धार्था म
हात्रिपुरसुन्दरी प्रकटाख्या तथा गुप्ता तथा गुप्ततरापरा संप्रदा
यकुला कौलरहस्यातिरहस्यगा परापररहस्या च तथा कामेश्वरी।
शुभा भगमालिनी नित्यक्लिन्ना भेरुण्डा रश्मिवासिनी महाविद्येश्व
री दूती त्वरिता कुलसुन्दरी नित्या नीलपताका च विजया सर्वमंग
ला ज्वालांशुमालिनी चित्रा वशिनी शुभगा तथा विमला अरुणा।
देवी जयिनी कुलभैरवी सर्वेश्वरी तथा कौली वागीशी सर्वका।
मिनी सिद्धेश्वरी तथा चोग्रा दुर्गा महिषमर्दिनी स्वप्नावती स्थूलि
नी च मातंगी स्वरसुन्दरी महाकाली महोग्रा च चित्ररूपा महोद
री प्रणवाख्या तथैकाक्षी चैकपादा महांकुशा रामा शिवा तथा जे
ष्ठा रुद्ररूपा वारुमाषिणी त्रिखण्डा त्रिपुरा घोरी गौरी विन्ध्यनि।
वासिनी क्षोभिणी नादिनी भद्रा ललिता वरुरूपिका सर्वसंपत्
करी तारा भवानी विश्ववासिनी ओटेश्वरी महाविद्याः कथितस्त
व भैरवः देवदेव महादेव शृणु चैकमनाः स्वयम् मनुश्चन्द्रः कुबेर
श्च मन्मथस्तदनन्तरम् लोपामुद्रास्तु निर्मन्दीशक्रश्चन्द्रः शिवा।
स्तथा क्रोधभट्टारकश्चैव पंचमी च प्रकीर्तिता दुर्वासा व्यास सूर्यो
च वशिष्ठश्च पराशरः और्वौ वक्रियमश्चैव नैरृतो वरुणस्तथा वायु

कौ विष्णुःस्वयमुन्मत्तभैरवोगणकस्तथा अनिरुद्धोभरद्वाजोदक्षिणा
९८ मूर्त्तिरेवच गणपःकुलपक्षेव वाणीगंगासरस्वती धात्रीशेषःप्रस
न्नश्चउन्मत्तःकुलभैरवः क्षेत्रपालोहनूमांश्चदत्तोगरुडएवच स्कं
दोदरःप्रह्लादश्चरामोरावणएवच काश्यपःकौतसःकुंभोचज
मदग्निर्भृगुस्तथा बृहस्पतिर्यदुश्रेष्ठोदत्तात्रेयोयुधिष्ठिरः अ
र्जुनोभीमसेनश्चद्रोणाचार्योवृषाकपिः दुर्योधनस्तथाकु
न्तीसीताचरुक्मिणीतथा सत्यभामाद्रौपदीचउर्वशीचतिलो
त्तमा पुष्पदंतोमहाशुक्रोवाणकारश्चमन्दरः कैलासःक्षीरसि
न्धुश्चउदधिर्हिमवांस्तथा नारदश्चमहावीरःकथिताब्रह्मराधि
का महाविद्याप्रसादेनस्वस्वकर्मसमन्विताः एतेषांवत्सना
मानिनित्यविद्योपसेविनाम् प्रातःकालेशुचिर्भूत्वायःपठेत्प्रय
तात्मना पूजयेद्वाशुचिर्भूत्वाप्रसीदामिकुलप्रिये अशुचिर्वानि
शालेवामालेवाचकुलांतिके निजपूजाफलंतस्यददामिवरमी
प्सितम् चक्रसंकेतकंचैवगुरुसंकेतकंतथा मंत्रसंकेतकंचैव
नामसंकेतकंतथा समयाचारसंकेतमकृत्वायोत्रवर्त्तते जप
पूजार्चनहोमोःभिचारायप्रकल्पते एवंस्तोत्रंपठित्वातुसंकेत
मानयेद्ध्रुवम् अथवक्ष्यामिशाकानांनैमित्तार्चनमुत्तमम् अथवै
शाखमासस्यशुक्लप्रतिपदिसाधकः ब्राह्मेमुहूर्त्तेउत्थायस्नानं
सन्ध्यामुपास्यच मनोज्ञेरहसिस्थानेपूर्वाभिमुखमास्थितः म
त्स्यमांसादिविधिवद्भक्ष्यभोज्यसमन्वितम् अर्घ्यंनिवेद्यतत्पोंब

णक्यासहपिबेत्ततः यौवनोल्लाससहितोनिर्विकल्पेनचेतसा ः
ध्यायेत्सूर्यमण्डलेदेवीमष्टोत्तरसहस्रकम् जप्त्वासमर्प्यतत्पू
जांदेवतांचसमुद्धरेत् एवंशुक्लप्रतिपदंसमारभ्यदिनेदिने कृ
ष्णपक्षार्च्चनंकृष्णचतुर्दश्यंतमम्बिके अमावस्यादिनेधीरःपूज
येत्कुलकौलिकान् त्रिसप्तनवपञ्चवावित्तशाठ्यविवर्जितः एवं
योमासमात्रंवैकुर्य्यात्सूर्योदयार्च्चनम् देवतातस्यसंतुष्टाद
दातिफलमीप्सितम् यत्किंचिदुदितेसूर्यमण्डलेस्वेष्टदेवतां
ध्यात्वासावरणेसम्यक्पूजयेत्तुविधानतः षोडशैरुपचारैस्तु
वकपूजापुरःसरम् कुलदीपान्प्रदत्वाचसाधकोभावतत्परः
मध्याह्नेपूजयेद्वापिसायाह्नेवापिपूजयेत् सततंफलमवाप्नो
तियोगिनीनांप्रियोभवेत् कांक्षितांलभतेसिद्धिंदेववद्विच
रेद्भुवि अथवा माघशुक्लप्रतिपदिदिवावसानकेबुधः स्नात्वा
शुक्लांबरधरःसायंसंध्यामुपास्यच सूर्यार्च्चनोक्तमार्गेणसर्वं
द्रव्यसमन्वितः यौवनोल्लाससहितस्सन्ध्यादेवतांस्मरन् देवीं
संपूज्यविधिवत्चन्द्रमण्डलवासिनीम् चन्द्रास्तोदयपर्यंतंजपे
न्मंत्रमनन्यधीः एवंप्रतिदिनंशुक्लचतुर्दश्यंतमर्च्चयेत् पौर्णमा
स्यांयथाशक्त्यापूजयेत्शक्तिकौलिकान् एवंयःकुरुतेभक्त्या
शुक्लपक्षार्च्चनंसदा सर्वपापविशुद्धात्मासर्वैश्वर्यसमन्वितः
सर्वलोकैकसंपूज्यःशिववद्विचरेद्भुवि शुक्लपक्षार्च्चनंयत्कृतंत
त्पक्षेऽसितेतरे यःकरोतिविधानेनसर्वान्कामान्समश्नुते

कौ इह भुक्त्वाखिलान् भोगान् देववत् प्रियदर्शनः योगिनीवीरमिलनं
९० लभते नात्र संशयः अथ कार्त्तिकमासस्य शुक्लप्रतिपदि ध्रुवम् स्ना
97 त्वाचम्य च शुद्धात्मा मासान् कृत्वा पुरोदितान् प्रहृष्टे जीवलोके
त्वमुदिता या महानिशि स्वर्णार्घ्येनोक्तविधिना सर्वद्रव्यसमन्वि
तः आसने नानामिकाङ्गुष्ठवर्त्तिं प्रज्वाल्य साधकः पञ्चवर्णेन रञ्जा
ग्निं वस्त्रपत्रसरोरुहम् मधुसम्पूर्णकलसे कांस्यपात्रे मनोहरे
दीपं संस्थाप्य पुरत उत्तराभिमुखः स्थितः दीपस्थावरणां देवीं ध्यात्वा
विधिवदर्च्चयेत् शीवलाख्यसहितो दीपस्थां देवतां स्मरन् अ
ष्टोत्तरसहस्रं तु जपेन्मन्त्रमनन्यधीः एवं समर्च्चयेत्पुष्पवन्तुर्द्ध
र्पं तमम्बिके अमावस्यादिने प्राप्ते पूजयेत् शक्तिकौलिकान्
एवं कृते महादेवी प्रीता भवति सर्वदा सर्वकामसमृद्धात्मा सर्वै
श्वर्यसमन्वितः सर्वलोकैकसम्मान्यः संचरेच्च यथा शिवम् इ
ति ज्ञानानन्दपरमहंसविरचिते कौलावलीनिर्णये षोडशोल्ला
सः १६ ॥ अथातः संप्रवक्ष्यामि कुलदीक्षां सुसिद्धये अदीक्षित
कुले यो हि साधनं समुपाचरेत् स महापातकी भूत्वा रौरवं नरकं
व्रजेत् अदीक्षितकुलासंगात् सिद्धिहानिः प्रजायते तत्कथा
श्रवणे चेत् स्यात् तत्त्यागमनं यदि सकुलीनः कथं चैव पूजये
त्परमेश्वरीम् दीक्षिता न च यो भो चेत् कथं स्यात् कुलपूजनम्
यत्कुले कुलदीक्षा तु न स्यात् पापी स एव हि कुलपूजा न चैवैव
कुलमन्त्राः परां मुद्राः परयोगा यदि स्याद्वश्यं न स्यात् कुहर्भवेत्

निजकान्तां समानीय रूपशीलां यशस्विनीम् कुलभक्तं गुरुं प्रा
र्थ्य दीक्षयेत् कुलदीक्षया शिवस्य सर्वदेशिकाः गणेशो गाणप
त्यानां दीक्षाप्रभुर्यतः स्मरः सौरास्तथा चैव विष्णुर्विष्णुपराय
णाः कुलीनाः सर्वमन्त्राणामधिकारी भवेत् सदा ततः स्वशिष्टि
नां कुर्यात् कुलगुरुः प्रयत्नतः दीक्षायां कुलपूजायां शिष्यत्वे
यदि वा गुरौ लज्जापरं कुलं तत्र विद्यापि तत्र निद्विता अयत्नात्
दृष्टिपातेन तस्य विद्याप्ययोमुखी निमीलनात्ततो विद्यासाध
कं मारयेद्ध्रुवम् पार्श्वावलोकनेनैव व्याधिदारिद्र्यपीडिता
वक्रदृगालोकनेन उच्चाटनगतो भवेत् एतादृशं कुलं चैव यदि
कुर्यात् कथंचन तदा कुलगुरुं प्रार्थ्य कारयेद्दीक्षितं ततः पा
तादृशाकुलस्याग्रे प्रयोगः फलदो न हि इत्यादिशिक्षया चैव शि
क्षिता कुलजा सती आनन्दरससंपूर्णहृदया लोललोचना मा
लालंकारशोभाढ्या रक्तवस्त्रविभूषणा ताम्बूलपूरितमुखी सिं
दूरांजनसंयुक्ता गुरुवक्त्रात् प्रयोगार्थं सोतस्तका साधकप्रिया
देवी वाह उपदेशं देवदेव समाचर एवमुक्ते कुले चैव वीरो हर्षेण
पार्वति इत्युक्ता सर्वशृंगारवेशाढ्यः स्थिरमानसः यद्वात्वम्मा
दिकाः शाक्तीः सर्वं मन्त्रेण सेवयेत् तद्गात्रे देयमन्त्रस्य न्यासजालं
प्रविन्यसेत् निजपत्नीवदाचार्यः तत्रालपटले लिखेत् कुल।
वकं त्रियावेश्म तत्र कामकलां लिखेत् तन्मध्ये देयमन्त्रेण दीर्भे
कं नामसंवान्वितम् तत्र देवी समावाह्य ध्यात्वा तां तत्र पूजयेत्

कौ ततस्तत्पुत्रिकाकर्णे ऋषिच्छन्दःसमन्वितम् मूलमंत्रत्रिधातु-
९८ श्राकथयित्वास्वकर्णके नामकुर्य्यात्ततस्तस्याकांतांसाधकः
सत्तमः मातृपितृकृतंनामवर्जयित्वावदेत्ततः अद्यप्रभृतिपुत्रि
त्वंकुलपूजार्थेनिरता सकुलंस्त्रीसमादायलज्जालस्यविवर्जिता
यथोपदिष्टंगुरुणासामरस्यंसमाचर इत्यनुज्ञांगुरोर्लब्ध्वाप्र
णम्यदण्डवद्भुवि आदिनाथकुलाचारपद्मिणीपद्मनायक इत्येत
दांभोरुहच्छायांदेहिमूर्द्धिणयशोधनम् विधिनास्तवनंकृत्वा
गुरवेदक्षिणांददेत् सर्वस्वंगुरवेदद्यात्तदर्द्धंवाद्यान्वित द-
क्षिणांचयथाशक्त्याप्रदत्वागुरवेसुधीः स्तुत्वानत्वायथाश-
क्त्यासाधकस्तोत्कंसमाचरेत् उपदिष्टायदादेवितदादेवीत्वपुत्रिका
पूजार्हाचयदादेवीतदामातानसंशयः सर्वेषांपितृपुत्राभ्यां
गुणयोगेनदृश्यते ततःकृतेपापयुक्तावैउभौनरकगामिनौ
तुंउकेचात्मशास्त्रज्ञेपश्ययामेतथैवच नकर्त्तव्यंनकर्त्तव्यंन
वक्तव्यंकदाचन एवंकृतेगुरोःशिष्यमहाशापोभविष्यति
स्त्रीगमवरणपूजादौयदानत्वयेतकुलम् नदामूर्द्धिणगुरुंध्या
त्वाकुलामृतरसेनत तर्पयित्वाकुलेध्यात्वाजपेन्मंत्रंनिरा
कुलः नियमःपुरुषेज्ञेयोनयोषितिकदाचन नन्यासोयोषि
तांचापिनध्याननचपूजनम् गोत्रोपदेशमाचर्य्यजपंकुर्य्या
त्समाहितम् सर्वविद्याप्रयोगेतु ततःकुर्य्यात्स्वसाधकः
अथातःकुलपुष्पस्यविधानंकथ्यतेऽधुना यत्प्राप्यकुलदे

वेनलभतेवाञ्छितंमदन अतकालेमहादेवीसर्वकामप्रवर्त्ति
नी अमृतंवर्षतेसाततत्रिदिनंपृथिवीतले तद्दिनेतत्रवीरेन्द्रोयदिवि
ग्रासमुच्चरेत पूर्णमेवभवेतस्यसकलंचमनोरथम् तस्मात्सर्व
प्रयत्नेनकुलवीरान्जपंकरु आनीयप्रमदांविद्यांसुनासांचारु
हासिनीम् सर्वदानन्ददांदर्पाञ्चूर्णालाज्जाविवर्जिताम् गुरु
भक्तांसुवेशांचदेवताप्रजनेरताम् स्वकांतांपरकांतांवासंस्था
प्यतूलिकोपरि न्यासजालंप्रविन्यस्यसाधकोऽहंममानसः
तस्याःसुमदनागारेप्रजयेत्परमेश्वरीम् स्वयमक्षोभितोभूत्वा
सर्वतत्त्वकुसुमंलभेत शिवहीनायदाशक्तिःस्वर्गादौवर्षतेदि
यत् तद्देवपरंमद्यंसर्वंस्वयंभूकुसुमात्मकम् तदसंप्राप्तिमात्रे
णनकिंनसिध्यतिभूतले स्वयंभूकुसुमंद्रव्यंत्रैलोक्येचातिदुर्ल
भम् स्वेच्छाश्रनमतीशक्तिःसाक्षाद्देवीमहेश्वरी तस्याःपुष्पसा
यकेनरत्नानियप्रयत्नतः वस्त्रालंकारपुष्पैश्चशक्तिंचपरिपूज
येत् दीक्षितावायथाकालेपुष्पंभवतिनित्यशः कुलपुष्पंतदे
वस्यात्सर्वसिद्धिप्रदायकम् कुण्डोद्भवंचगोलोत्थंसर्वेवकथि
तंमया कुण्डोद्भवंसिद्धिप्रदंप्रकारांतरमुच्यते यथायोग्यंसमा
नीयशक्तिंपूर्वोदितांशुभाम् स्वकल्पोक्तंसमावर्ण्यसाधकोनि
तमानसः चर्व्वोचोष्यनिवेद्याथवस्त्रालंकरणादिकम् पुष्पैर्द
त्तैःपुष्टैःतस्यामदनमन्दिरम् भावयेत्कामभावेन ॥
शुद्धंमंत्रोपधपैनेवमथ्येन्मदनालयम् मथ्यमानेपितस्याद्द्रिना

कौ. यतेनत्वमुत्तमम् गृह्णीयान्नतु प्रयत्नेन द्रव्यं कुलोद्भवं शुभम् एत
५८ त्पंचकम् एतच्चतुष्टयं द्रव्यं मन्त्रसिद्धेश्च कारणम् एतेषां द्रव्यमध्ये
तु स्वयंभुकुसुमं महत् कश्चित्पुण्यवरोजेन लभ्यते वा न वा पुनः
98 लब्धा तत्र परं द्रव्यं लाक्षारससमन्वितम् कस्तूरीं कुंकुमं चैव चन्द
नेन सुमिश्रितम् रक्तेन चन्दनेनापि वटीं कृत्वा तु गोपयेत् सु
र्वीकुंकुमतो वीरो विशोध्य मन्त्रराजकम् लिखित्वा पूजयेद्भक्त्या
यांति सिद्धिं प्राप्य साधकः सुप्तादिदोषदुष्टा ये मन्त्रा विद्याश्च कीर्तिताः
प्रबुद्धास्तत्प्रयोगेन यावत्साधुन रागता ह्विता यायांगते चैव हं
एषा जाता कलावती तिथिक्रमेण सा देवी पौर्णिमास्या फलप्रदा
तत्प्रयोगमात्रेण कृष्णपक्षे विशेषतः क्षीणा तिथिपूर्णतां याति या
वत्सा तिथिरागता ततः प्रयोगं विद्यानां मन्त्रादीनां च कारयेत् एवं
यथा प्रबुद्धास्ता नैव तादृक्करा च न स्वयंभुकुसुमैः पूजां प्रसंदयः
समाचरेत् योनिमस्य गृहायोग्या गात्समादेव नाश्रये राज्ञानश्च
स्त्रियः सर्वा निसवश्या भवंतिहि एतान्तत्ता या यान्नप्रयुमतीसि
द्धिमालभेत प्रत्येकेन लभेत्सिद्धिं कुसुमाद्यैर्यथाविधि शुष्कवसे
वशाक्रान्तां कामस्य जनमुत्तमम् रक्तपुष्पैर्यजेद्देवीं समलारुष्मिसं
युतम् विधिवल्लिखिते यंत्रे कुलाचारेण रात्रिके मासमात्रेण वी
राणां महापातककोटयः जन्मान्तरकृताः सर्वे नाशमायांति नि
श्चितम् लक्ष्मीस्तस्य गृहे वश्या स्थिरा भवति ध्रुवम् जवापुष्पैश्च
कुरांजं पूजयेन्मासमात्रकम् कुलाचारेण रात्रौ च सर्ववर्णाभक्ति

भावतः ब्रह्महत्यादिपापांश्च पूर्वजन्मकृतानपि नाशयेन्नात्र सन्देहो
धनवान्जायते नरः केतकीतरुणैः पत्रैः पूर्ववत्पूजयेच्छिवाम् म
हापातकं सर्वांश्च मासमात्रेण नाशयेत् सौभाग्यमण्डलं तस्य जाय
ते नात्र संशयः शतपत्रैर्मनोरम्यैः पूजयेन्मासमात्रकम् पूर्ववत्
परमेशानि सर्वपापं विनाशयेत् चंपकैः सुमनोरम्यैः पूजयेत्पू
र्ववच्छिवाम् मासमात्रेण हन्त्येव पातकान्पूर्वजन्मजान् सौभाग्यं
वालभेन्मन्त्री भगवत्याः प्रसादतः श्वेतपद्मैर्महादेवीं पूजयेद्भक्तिभा
वतः पूर्ववत्नाशयेत्पापान्त्रिंशज्जन्मकृतानपि मासमात्रेण
सकलान्मोहनस्य करस्थितः बन्धूककुसुमैर्देवीं मासमात्रेण
पूजनात् त्रैलोक्यं वशगं तस्य सर्वपापं प्रणाशयेत् बिल्वपत्रैश्च
जलजैः सहैव परिपूजयेत् पूर्ववत्परमेशानी मासमात्रं न संशयः
समृद्धिमान्भवेत्सोपि सर्वपापहरः सदा मल्लिकामालतीजातीकु
न्दैश्च शतपत्रकैः श्वेतोत्पलैः प्रफुल्लैश्च पूजयेन्मासमात्रकम् कु
लाचारक्रमेणैव पातकान् शतजन्मजान् ब्रह्महत्यादिजनितान्
नाशयेन्नात्र संशयः मुक्तिस्तस्य करस्था वा वाग्भिः समो भुवि अ
गस्त्यवालबन्धूकजवारक्तोत्पलैः समम् पूर्वक्रमेण संपूज्य मास
मात्रं प्रयत्नधीः पातकान्नाशयेन्मन्त्री साध्यान्कामसमो भवेत्
चंपकैः पाटलैर्देवीं बकुलैर्नागकेशरैः कल्हारैः सिन्धुवारैश्च पू
जयेत्पूर्ववत्क्रमात् सौभाग्यमण्डलं तस्य मासमात्रेण निश्चितं
महापातकयुक्तो वा यदि देवीं प्रपूजयेत् शमीदूर्वाकुशाग्रपल्लवे

कौ रथवार्कजैः मासेन हंति कल्मषं सप्तजन्मकृतं ध्रुवम् अथातः सर्व
९९ विद्यानां लिख्यते सिद्धिकारणम् ब्राह्म्याद्यष्टकुलैः सार्द्धं साधकः स्थि
99 रधीः शुचिः चतुष्पथे वा नद्यां वा वटमूले त्रिपूलके प्रेतभूमौ बिल्व
मूले हट्टे वा राजवेश्मनि सिन्दूरेण लिखेन्मंत्रं विपुलं साध्यदर्भितं
ततः संपूज्य विधिवत् कुलं कुलरसेन च तर्पयित्वा तदंतःस्थः प्रजपे
न्निशाचारतः ततो लक्षप्रमाणेन सिद्धिस्तावत् भवति हि अथ रा
जोपुण्यगेहे उद्याने वा स्मरालये आनीय कुलजां देवीं मूलमंत्रेण
दीक्षयेत् ततः पूर्वोक्तरूपेण कुलक्षोभं समाचरेत् रत्नपूजाविधा
नं हि कथयामि विशेषतः पुष्पाणि रचयेत् हीरोमाणिक्यघटि
तानि च तैस्तु पूजा प्रकर्तव्या चक्रराजस्य पूर्ववत् नानापुष्पैः
सुगंधैश्च कर्पूरक्षोदचर्चितैः एकविंशति रात्रेण विद्यासाधरणी
भुजाम् दासभूता भवन्त्येव महारोगांश्च नाशयेत् सूर्यवत् कां
तिमान् मंत्री जायते नात्र संशयः शुक्लारत्नरंजितानि स्वर्णपुष्पा
णि साधकैः तैस्तु पूजा प्रकर्तव्या नानारत्नैश्च पूर्ववत् एकविंश
तिरात्रेण राजपत्नी वशी भवेत् कलाकान्तियुतो वीरो जायते शुभ
गः स्थितौ प्रवालघटितस्वर्णपुष्पैर्लबज्रिभि यजेत् पूर्ववत्प
रमेशानीं कुलाचारक्रमेण तु पुष्पैश्च वज्रभिर्धीरः समाहाल्य
निश्चितम् क्रूरास्तस्य वशगाः वैरिवर्गांश्च शोषयेत् एकविंश
तिरात्रेण नानापुष्पैः क्रमाद्यजेत् विद्या तस्य वशगा वैरी भव
ति वा अथवा पद्मरागमहारत्ननिर्मितैः स्वर्णसंयुतैः कुसुमैर्व

येच्चक्रं त्रिसप्ताहात्स निश्चितम् स्वराज्यस्य वशगाः सर्वे बृहस्पति
समो भवेत् स्वर्णरचितैः पुष्पैर्वज्रकेशरवर्जितैः एकविंशतिरा
त्रेण मोहयेज्जगतीमिमाम् देवा देव्याऽवशास्तस्य जायते नात्र संशयः
इन्द्रनीलमयैः स्वर्णपुष्पैश्चक्रं समर्चयेत् एकविंशतिरात्रेण तथा
नीलैश्च नीरजैः वैरिणो नाशमायान्ति शीघ्रं वश्या भवन्ति हि गोमे
दघटितैः पुष्पैः स्वर्णपुष्पैर्यजेत्तु यः किंशुकैः ऊन्यपुष्पैश्च एवं व
त्परमेश्वरीम् सप्ताहाद्वैरिणो वश्यपाश्चात्तत्तेषु प्रजायते त्रि
सप्ताहान्महापापसंचयं नाशयेत्ततः स्वर्णरत्नमयैः पुष्पैर्नवै
रेव प्रपूजयेत् तदाश्वमेधदशकं फलं भवति निश्चितम् क्रमाद
स्त्रावत् वशगा हि भवन्त्येव न संशयः वैडूर्यघटितैः पुष्पैः पूजये
च्चक्रमुत्तमम् सर्षपकादिभिर्धीरस्त्रैलोक्यं स्तम्भयेत्तत्क्षणात् ए
कविंशतिभिर्वारैर्महापापहरो भवेत् निर्माल्यभूतैः कुसुमैरु
च्छिष्टैः परमेश्वरीम् नानारत्नमयैः स्वर्णपुष्पैर्यदि शिवां यजेत्
तदा देवाश्च मुनयः पन्नगा राक्षसादयः सर्वे वशगा भवन्त्येव त्रिस
प्ताहान्न संशयः जन्मकोटिभवं पापं नाशयेन्नात्र संशयः स्वर्णव
णमयैः पुष्पैर्मासमेकं प्रपूजयेत् तदाश्वमेधदशकं फलं भव
ति सर्वदा स्वर्णरत्नानि पुष्पाणि यदि न स्युस्तदाष्टण सर्वोदित
स्वपुष्पैश्च पूजा कार्या स्वसाधकैः यद्यद्पुष्पं यत्र यत्र देयं तत्रम
हात्मना तत्तत्रैव दातव्यं यदा तस्य स्वविच्छया अलंकारस्वरूपे
णपूजयेच्चक्रनायिकां केवलं योनिपुष्पैस्तु त्रैलोक्यं स्तम्भयेत्क्षणा

कौ
१०
17

मासमात्रेण पापानि सप्तजन्मभवान्यपि नाशयेन्मोहयेत्सर्वान्सा
मुद्रवलयांधराम् अथेदानीं प्रवक्ष्यामि विशुद्धाबीजसाधनम् शु
क्लांबरधरो धीरः शुक्लगन्धादिभूषितः शुक्लालंकाररचितः शु
क्लमाल्यान्वितः शुचिः शुक्लगो ब्रह्मचारी च शुक्लासनपरिग्रहः
पूजयेत्शुक्लपुष्पैस्तु नैवेद्यैर्धवलैस्तथा पिष्टकं पायसं दुग्धं
अन्नं च कृविर्यं तथा शार्करामोदकं चैव नानाफलसमन्वितम्
कृतं सकलवीरेन्द्रः साधयेद्वाग्भवाक्षरम् वाग्भवाद्यं जपेद्वि
द्यां वागीशीं संस्मरेत्तु यः कर्पूरधवलां शुभ्रां शुभ्राभरणभूषिताम्
स्मितां शुभ्रवसनां वज्रमौक्तिकभूषणाम् मुक्ताफलसमुद्भूतज
पमालालसत्कराम् पुस्तकं वरदानं च दधतीं अभयप्रदाम्
एवं ध्यात्वा प्रहृष्टैव वागीशीं साधकोत्तमः मूलादिब्रह्मरन्ध्रांतं
स्रवत्पीयूषरश्मिनीम् तस्मात्ज्योतिर्मयीं ध्यायेत् जिह्वाग्रेऽ
मृतरूपिणीम् विभाव्य प्रजपेन्मन्त्रं पुरश्चरणसंख्यकम् ततस्त
न्नष्टहृदयो ग्राम्यो मूर्खोऽतिपातकी जडोऽप्रियः पदं स्पष्टो ल
क्षणांवकुलक्षणः शठो मूर्खोऽतिदुर्मेधा यो गतप्रज्ञो विनष्टधीः सोऽ
पि संजायते वाग्मी वाचस्पतिरिवापरः सत्पाण्डित्यसञ्चयटोप
जातापि विगतप्रभा सत्तर्कपदवाक्यार्थशब्दालंकारसारवित्
सुकुमारपदसंस्कारः स्फीतालंकारपूर्वकैः पादगुम्फैर्महा
काव्यकर्ता सोऽपि प्रजायते वेदवेदांगवेदान्तसिद्धान्तज्ञानपारगः
ज्योतिःशास्त्रेतिहासमीमांसास्मृतिसारवित् पुराणरसवादा

दिगाकृष्टानेकमन्त्रवित् पातालशास्त्रविज्ञानभूतमन्त्रार्थतत्त्ववित्
विचित्रचित्रकर्माणिशिल्पानेकविचक्षणः सर्वभाषारतज्ञानी
समस्तलिपिकर्मवित् नानाशास्त्रादिशिल्पादिविनाभरणविक्र
नः सर्ववाङ्मयवक्ता च सर्वज्ञोऽपि विजायते अथ कामकला
ख्यः साधको रक्तमन्दिरे नानोपहारबलिभिः कुङ्कुमादिभिरर्च
येत् मूलादिब्रह्मरन्ध्रान्तस्फुरन्तीं निजरूपिणीं बन्धूककुसु
माकारकान्तिभूषणभूषिताम् इक्षुकोदण्डपुष्पेषुवराभयल
सत्कराम् उद्दीप्तकान्तिसिन्दूरभालत्रिनयनान्विताम् एवं सचि
न्तयेद्वीरेन्द्रः पूजयेत् परमेश्वरीम् यथोक्तसंख्यं संजप्य कामरा
जस्तु साधकः चिन्तयेत् परमेशानीं त्रैलोक्यमोहयेत् क्षणात्
राजानो वशमायान्ति पन्नगा राक्षसाः सुराः कन्दर्पस्त्ववीरेन्द्रो
योषितां मानहारकः मनश्चिन्तितयोषित् दासीव वशगा भवे
त् नरेन्द्रवशगा नारी सुरी वाप्यथवासुरी विद्याधरी किन्नरी
वा यक्षी नागाङ्गनाथवा पञ्चवण्डनरभूपालकन्यका सिद्धक·
न्यका ज्वलन्मदनदुष्प्रसादिवासंततमानसा क्लिन्नाप्रचलि
तांगी सा विमूढा मदविह्वला निवेदितार्थसर्वस्वा वशगा तस्य
जायते उज्ज्वलदिन्दुसंकाशा कालार्ककिरणारुणा चिन्तिता
योषितां योनौ क्षोभयति च तत्क्षणात् सैव सिन्दूरवर्णाभा हृद
ये चिन्तिता सती सम्मोहान्मदनावेशचित्ताकर्षकरी तथा निषे
जिताथवा मूर्ध्नि वर्षन्ती रक्तबिन्दुभिः धारणासंप्रयोगेण करो

कौ· तिवशगं जगत् आकर्षयेत्तदा शीघ्रं रंभांचापि तिलोत्तमाम् रक्तवा
१८ र्णां स्त्रियं ध्यात्वा तदीयसदृसान्नतः तस्या मूर्द्धि णमारे रछिंयां स्रवतः
पीयूषवर्षिणीम् ध्यायन्संमोहयेन्नारीं मदनार्तमानसाम् द
107 णमात्रेण वीरेन्द्र त्रैलोक्यं वशमानयेत् एतत्कामकलाध्याना
त्पंचकामश्चापरः ह्रीं क्लीं ऐं ब्लूं ततः सत्क्रमेण परियोषि
ता: यंत्रविद्ध्यात्कामस्तु मन्मथात्मगतं भवेत् कन्दर्पसंपु
टं कृत्वा कोणगर्भमतस्ततः मकरध्वजसंज्ञं तु सर्वमेतत्तु सा·
धकः मीनकेतुगतं कुर्यात्संमोहयेज्जगतीमिमाम् त्रैलोक्य
मोहनं नाम प्रयोगोयं प्रदर्शितः ॥ अथातः संप्रवक्ष्यामि प्रा·
क्तिबीजस्य साधनम् सृष्टिसंहारपर्यंतां शरीरे चिंतयेत्प
राम् स्रवत्पीयूषधाराभिर्वर्षतां विषहारिणीम् हेमप्रभाभा
स्वरां तां विद्युल्लतासमप्रभाम् स्फुरच्चन्द्रकलापूर्णकपालं व
रदाभयो ज्ञानमुद्रां च दधतीं साक्षादमृतरूपिणीम् एवं ध्यात्वा
जपेन्मंत्री हेमाभैरुपचारकैः पूर्वसंख्यं जपेद्बीजं नानाविधवि
नाशयेत् एतस्यस्मरणाद्वीरो नीलकंठत्वमागतः वैनतेय
समो मंत्री विषभावं विनाशयेत् नागादर्शनमात्रेण नष्टो भ
वति तत्क्षणात् भूतप्रेतपिशाचांश्च नाशयेन्नात्र संशयः
चतुर्थिकृद्धकान्सर्वान्प्रमरोगांश्च नाशयेत् दुष्टव्याधिग्र
हांश्च डाकिनीरूपिकागणाः यक्षोराक्षसवेतालश्चिनेत्र द
वदृश्यते अथवा येन विधेयं परिहर्तुं विचिंत्यते नाभिमण्ड

लोहितंपद्मसुवर्णमण्डलमध्यगाः पद्मरागमणिस्वच्छं चिन्तना
त्साधकस्य च तस्याष्टगुणमैश्वर्यमचिरात्संप्रवर्त्तते तत्रा
मस्मरणात्मंत्रीयोगीनीनांभवेत्प्रियः मातृचक्रंतस्यकार्य
तेनसार्द्धंस्वस्थोभवेत् पुत्रवान्धनवान्वीरोमंत्रध्यात्वातंस
शयः विलिख्यचक्रराजंतत्परिहर्ण्णौप्रपूजयेत् प्रयच्छतिमहा
देवीखेचरीसिद्धिमुत्तमाम् ततःषष्टियुताःकोट्योयोगिनीनां
महोजसाम् चक्रमेतत्समासाद्यस्थितास्तानात्रसंशयः ए
ऐंविद्यांजपेत्सर्व्वंवश्यंभवतिनिश्चितम् क्लीमयेत्स्वर्गभूर्लो
कपातालतलवासिनी क्लीमयंसेववीरेन्द्रामहाविद्याप्रसादतः
नः वाग्भवीकपतित्वाचकामात्कामसमोभवेत् शिवंत
शक्तिबीजेनत्रिकूटंसर्व्वमालभेत् सर्व्वसिद्धिर्भवेत्सेवकरत्रय
स्यजापतः इतिश्रीज्ञानानन्दपरमहंसविरचितेकौलावलीनि
र्णयेसप्तदशोल्लासः १७ ॥ अथवक्ष्येचमंत्राणांशिखासि
द्धिप्रदायिका यस्याविज्ञानमात्रेणदिव्यंविद्याप्रसीदति मू
लरन्ध्रेतुयथाशक्तिर्भुजगाकाररूपिणी तत्रयस्यप्रभावर्त्तोप्रा
णइस्वस्थानेतुयेः नीवारशूकविधिनाकुंजतीसततोत्थिताः
गच्छन्तीब्रह्मरन्ध्रेपिप्रविशंतिस्वकेतने यातायातक्रमेणैव
कुर्य्यात्तत्रमनोलयम् तेनमंत्रशिखानामासर्व्वमंत्रप्रदीपि
का नमःस्मरणाद्धृदयेयद्वत्नकिंचित्प्रतिभासते शिखाहीना
स्तथामंत्रा नसिद्ध्यंतिकदाचन शिखोपदेशःसर्व्वत्रगोप्तव्यः

कौ साधकेनच विनानेन न सिद्ध्यति कल्पकोटिशतैरपि चतुर्विधा।
१०२ तथा सृष्टिर्यस्या योनौ प्रजायते पुनः प्रलीयते तस्यां कालाग्न्या·
दिशिवांतिका योनिमुद्रा पराख्या वद्धस्तस्याः प्रकीर्त्तितः तस्या
102 स्तुबंधमात्रेण तन्नास्ति यन्न साधयेत् अमध्या जप्यते यस्तु अम
ध्या कुरुते तु यः नासौ सिद्ध्यति मंत्रस्य सत्यं सत्यं पुनः पुनः छि
न्नारुद्धाश्च ये मंत्राः कीलिताः स्तम्भिताश्च ये दग्धाः संत्रासिता हीना
मलिनास्तु तिरस्कृताः भेदिताश्च समं युक्ताः शप्ताः संमूर्छिताश्च
ये हृष्टा वालास्तथा स्त्रस्ताः प्रौढा यौवनगर्विताः अरिपक्षस्थि
ता ये च निर्वीर्याः सत्ववर्जिताः अंशकेन विहीनाश्च खण्डशः
शतधा कृताः विधिनानेन संयुक्ताः प्रवर्द्धन्त्यचिरेण तु सिद्धिमोक्ष
प्रदाः सर्वे साधकेन नियोजिताः यद्यदुच्चार्यते मंत्री वर्णरूपं
शुभावहम् तत्तत्सिद्धिमवाप्नोति योनिमुद्रानिबन्धनात् दी
क्षयित्वा विधानेन अभिषिच्य सहस्रधा ततोऽधिकारी तंत्रेऽस्मि
न्भवेत् साधकसत्तमः ब्रह्महत्यासहस्राणि त्रैलोक्यमपि घातये
त् नासौ लिप्यति पापेन योनिमुद्रानिबन्धनात् न तस्य पापपुण्ये
स्तु कृते दोषैर्न लिप्यते कृत्वा पापसहस्राणि असंख्यातानि सर्व
दा दशमुच्चारमात्रेण योनिमुद्रानिबन्धनात् दुष्टमंत्राश्च सिद्ध्य
ति मंत्राश्चामृत किं पुनः ध्यानस्थावरदा मंत्रा ध्यानस्थाश्च फल।
प्रदा ध्यानध्यानविनिर्मुक्ताः सुसिद्धाश्चापि वैरिणः सिद्ध्यति ये
न तत्तस्य ध्यानं कथयामि विशेषतः सकलं निष्कलं सूक्ष्मं तथा।

सकलनिष्कलम् कलाभिन्नंकलातीतंषोढाध्यानंशिवोब्रवीत
सकलंब्रह्मरन्ध्रस्थंतद्दृष्ट्वाविद्धिनिष्कलम् मानसंसूक्ष्मनामानं
हृत्स्थंसकलनिष्कलम् बिन्दुस्थितंकलाभिन्नंकलातीतंतदूर्ध्व
तः कलागशूलिनीसैवनादशक्तिः शिवोदिता षड्ध्यानंगतनामं
त्राःस्थानस्थाःपरिकीर्तिताः देवतांहृदिसंचिंत्य मन्त्रजापपराजा
यते ध्यानस्थाश्चैवतेमन्त्राविज्ञेयाःसाधकेनवा अथवा तारसं
पुटितोवापिदुष्टमन्त्रोपिसिद्ध्यति यस्ययत्रदृढाभक्तिर्जायतेमन
तं यदि तस्यसिद्धिर्भवेन्मन्त्रोयथोक्तजपमात्रतः अथातः सर्ववि
द्यानांलिख्यतेसिद्धिकारणम् ब्राह्मायघटकुलेःसार्द्धंसाधकः
स्थिरधीःशुचिः वटमश्वत्थवानधात्रीवावटमूलेविषमूलके प्रेतभूमौ
विल्वमूलेदृढेवाराजवेश्मनि सिन्दूरेणलिखेद्यन्त्रंविपुलंसा
ध्यदर्शितम् तत्रसंपूज्यविधिवत्कुलंकुलरसेनच तर्पयित्वातदं
तःस्थः प्रजपेन्निशिवासरतः ततोलक्षप्रमाणेनसिद्धिप्रदाभवंति
हि अथवा राजोपवनगेहेचैवउद्यानेवासुरालये आनीयकुलजां
देवीं मूलमन्त्रेणदीक्षयेत् ततःपूर्वोक्तरूपेणकुलहोमंसमाच
रेत् एवंकृतेनसिद्धिःस्यात्मूलमन्त्रंसमभ्यसेत् पीठानामपरंपी
ठंकामरूपंमहाफलम् अत्रयाक्रियतेपूजासकृद्वासाधकेनच
विहायसर्वपीठानितस्यदेहेवलेच्छिवा तथाशतगुणंप्रोक्तंका
माख्योयोनिमण्डलम् यत्रकोटिगणैःसार्द्धंमायावसतिमर्दिनी
यत्पीठंब्रह्मणोवक्त्रंगुह्यंसर्वंसनातनम् यतोदेवाश्चदेवास्तु

कौ नयश्चैवभावज्ञाः सर्वेष्वाविर्भवत्यत्रतेनशुभमहाकुलम् द्विविधं
१०३ चैवतत्पीठयुग्मंप्रोक्तंसदाप्रशो प्रकाततयुग्मंमहापुण्यंउड्याणंसाध
केनवै प्रोक्तंसर्वेत्रदेवपालभ्यतेकुलसुन्दरैः तत्रापिलक्षमात्रेणसि
द्धिर्भवतिनिश्चितम् अथवान्यप्रकारेणकथ्यतेसाधनंमहत् आ
नीयदेवींतद्गात्रेव्यापकांतांप्रविन्यसेत् उपचारैःषोडशभिः
स्नानंसंपूज्यविधानतः प्रथमंसाधकश्रेष्ठोदेवीकूटस्थमस्तके
मंत्रंविलिख्ययथोक्तंपूजयेत्कुलवर्त्मना प्रथमेपीठेदेवींचपू
जयेत्गन्धपुष्पकैः महाभागाततोमूलदेवीमावरणैःसह ल
क्षैकंतत्रजप्त्वात्उड्डीयाणंततोविशेत् तत्रपीठयोगिनीः पूज
यित्वाततोयजेत् निजेष्टदेवतांतत्रजपेल्लक्षंसमाहितः कामरू
पंततोगत्वातत्रकामाख्यांनीयजेत् पूजयित्वाततोदेवींजपेल्लक्षं
समाहितः ततोजालंधरेगत्वाश्रीपूर्णेशींप्रथमंयजेत् तत्रापिलक्ष
मानंतजप्त्वामंत्रंसमाहितः ततःश्रीगिरिंगत्वायजेत्चण्डींस
माहितः पूजयित्वामहादेवींजपेल्लक्षमनन्यधीः सिन्दूरबिन्दुपी
ठेचकामाख्यांप्रथमंयजेत् ततःप्रांतेमहादेवींयजेद्दिक्करवा
सिनीम् एवंपीठेश्वरींजप्त्वापूजयेदिष्टदेवताम् सप्तपीठसम
लंजप्त्वागात्रेसमाहितः सम्यक्पूर्वंततःप्रच्छेन्महादेवीकु
लोत्तमम् तवेष्टदेवतेवाहंशरणंप्रवरंमुत्तमम् ततःप्रणम्यदे
वेशींशरणंयाहरमुत्तमम् अद्यैवंनैवमहादेवीपुनःपूर्वोक्तमाच
रेत् अतोभितःकुलाचारःपरिवर्ज्यापरोभवेत् अथवासर्वेषी

ठेष्टयजेन्महिषमर्दिनीम् ततः प्रसन्ना भवति सैव कुलवरप्रिया
ततो जप्त्वा मूलमन्त्रं सर्वसिद्धीश्वरो भवेत् ततो ध्यात्वा महादेवीमा
त्कांतरसंतकम् पूर्ववत् विविधान्न्यसेत्तेनैव मन्त्रेण मातृकाम्
प्रकाराद्भिकारान्तमेकैकक्रमयोगतः पंचांगं च पुनः कृत्वा पंच
धामार्पकं चरेत् मूर्द्धादिचरणान्तं च तस्मान्मूर्द्धावसानकम् मू
लेन मनुना मन्त्री कृत्वा संचिंतयेत्ततः ध्यायेत्कालीं महादेवं भु
द्रागमहोन्मुखीम् दक्षिणे च करे दुर्गां च वाणं शूलं तथैव च
वामे शंखं तथा चर्म धनुस्तज्जनमेव च विभ्रतीं नीलवर्णां च महि
षतनिषेदुषीम् पीताम्बरधरां देवीं पीनोन्नतकुचद्वयाम् जटा
मुकुटशोभाढ्यां पितृभूमिस्थितां वराम् एवं ध्यात्वा महादेवीं मा
नसैरुपचारैः पूजयेद्विधिवद्भक्त्या स्वकीयहृदिपंकजे ततः सो
हं विभाव्याथ पूर्णानि दिव्यमण्डलके घटस्थापनमारभ्य पीठपू
जावसानकम् कृत्वा च पूर्ववद्वीरः सदाशिवं यजेत्ततः पूर्वोक्त
विधिना चैव ध्यात्वा च परदेवताम् यन्त्रमध्ये समावाह्य मूलेन
परिकल्पिताम् आवाहनादिकं चैव पूर्ववत्समाचरेत् संपूज्य
च महादेवीं पूजयेत्तदनन्तरम् देव्या वामे यजेत्पश्चात् पूर्वोक्तं
च गुरोः कुलम् शाक्तं जप्त्वा च गुर्वादीन् नारदं च ततो यजेत् अष्ट
पत्रे यजेद्देवीं दुर्गाद्यादीश्च शक्तिका दुर्गा च प्रथमा ज्ञेया द्वितीया याव
रवर्णिनी आर्या चैव तृतीया च चतुर्थी कनकप्रभा कृत्तिका पंच
मी प्रोक्ता षष्ठी चैवाभयप्रदा कालीहरागिणी चैव जप्त्वा पूर्वादि

कौ तत्क्रमात् आयुधानि दलाग्रे भूयादिभिः क्रमतो यजेत् ज्वालाद्यांस्ततः
१०४ पश्चात् लोकपालांस्ततो बहिः तदस्त्राणि बहिर्ज्ञात्वा तर्पयित्वा विधान
104 तः ततः संपूजयेद्देवीं पूर्ववत्साधकोत्तमः तर्पयित्वा महादेवीं मंत्र
जापं समाचरेत् श्रीभैरव उवाच मातर्म्महिषमर्दिन्याः संकेतं कथ
यस्व नः कुलाचारस्य संसिद्ध्यै भुक्तिमुक्तिप्रसिद्धये देव्युवाच सृ
ष्टिस्थितिविनाशानामादिभूता सनातनी न कस्मैचित् प्रवक्तव्या
कथिता सिद्धिकारिणी अयं तत्र क्रमः कार्यः शुद्धाय दिक्कथ्यते तदष्ट
वर्णीदानतः । तापि साधनम् साधारणी प्राणविद्याल्पेनैव सिद्धि
विधा एतत्पूर्वं स्थिता देवी सर्वसिद्धिविधायिनी विशेषतः क
लियुगे महासिद्धैवदायिनी गुरूणां कुलनाथानां महाशाय
प्रदायिनी तस्माद्यत्नेन ॥ गोप्तव्यं नवादरी अष्टलक्षं जपेत्
मंत्रं तद्दशांशं हुनेत्ततः प्रस्मरणात् लक्षं वोद्धं साधकेन च य
थाशक्ति जपं कृत्वा समाप्याथ स्तुतिं पठेत् इति स्तवेन संस्तु सं
शेषं पूर्ववदाचरेत् विसर्ज्जनं विद्यायाश्च प्रयोगं च ततश्चरेत् एतत्
विद्या महाविद्या न देया यस्य कस्यचित् यदि मापवशा लभ्या कुलदे
वीकुलोत्तमैः दीक्षिता कुलजाभिस्तु सिद्धिदा सैव नान्यथा । अथा
तः संप्रवक्ष्यामि तृतीयजननं शुभम् शाक्तो वा वैष्णवो वापि शैवो
वाप्यन्यपूजकः यस्मात् क्षिप्रं भवेत् सिद्धिर्नान्यथा जन्मकोटिभिः
मंत्रस्य सिद्धिकामस्तु तृतीयजननमाचरेत् किं जपन्यासविधिना
ध्यानपूजादिविस्तरैः यावत्तृतीयजननं तावत् सिद्धिर्भवेत्कुतः

गन्धर्वरूपवान् भूत्वा योनौ संपूज्य साधकः रुद्रा पुत्रसखी भूत्वा देवी
पुत्रो भवेत् द्वितीयो त्रिकोणे पुत्रयोर्देवा ब्रह्मविष्णुमहेश्वराः योनिम
ध्ये यजेन्नित्यं च ऋणिकां कुलदेवताम् तत्र विद्यां जगद्धात्रीं कुलाष्टकैः
कुलक्रमात् सम्भवेत् साधकश्रेष्ठः शिवतुल्यो भवेन्नरः तत्र या कि
यते पूज्या नपवा नर्पणे पुत्रः तदनन्तफलं कर्त्तुर्भवमेव न संशयः
युवती योनिमास्थाय सर्वसिद्धिर्भवेद्यतः तस्माद्वै योषितां योनौ
पूजयेत् साधकोत्तमः सर्वालंकारसंयुक्तो रक्तवस्त्रविभूषितः प
रमानन्दतो रात्रौ पंचतत्त्वेन संयजेत् सकलीकं प्रकुर्वीत न्यासादिकं
स साधकः मस्तकं गजदन्तस्य हेमरूप्यादिनिर्मितम् अर्घ्यपात्रे
प्रतिष्ठानां कार्यं देहजलेन च विशुद्धैस्तोमरचितां कूनिकां तत्र
योजयेत् पुष्पासकार्द्धमध्ये च उपर्य्युपरि पूजयेत् मण्डूकं पूज
येदादौ रुद्रं कालाग्निसंयुतम् आधारशक्तिं कूर्मं च तथानन्तवराह
कम् पृथिवीं च तथा कन्दं नालं च तद्दलं तथा केशराणि च संस्म
कर्णिकायां यजेत् ततः धर्म्मं ज्ञानं च वैराग्यमैश्वर्यं च क्रमाद्यजेत्
अपूर्वान् पूजयेदेतान् साधकः सिद्धिहेतवे आत्मान्तरात्मपरमज्ञा
नात्मानक्रमेण च पूजयित्वा ततस्त्वेव गुरुरूपान् समर्चयेत् अष्टैना
वारसंपन्नां गुरुभक्तां दृढव्रताम् सदनुष्ठाननिरतां सात्त्विकीं भक्ति
संयुताम् कुर्यात् पैशुन्यरहितान् स्वमायां भक्तवत्सलाम् चातुर्यौ
दार्यदाक्षिण्यकरुणादिगुणान्विताम् रूपयौवनसंपन्नां शीलसौ
भाग्यशालिनीम् मनोगृहीतविश्वासां यथासंकेतमागताम् अथ

कौ वातत्तत्वणायां तां मदनानलतापिताम् विलिप्तां रक्तवस्त्रेण रक्तग
१०२ न्धविभूषिताम् स्रग्गन्धिरक्तकुसुमां सर्वाभरणराजिताम् सुधूपै
र्धूपितां तन्वीं हूतिकर्म्मणि योजयेत् एवंभूतां यजेद्दयस्तत्प्रसून
105 न्तलिकोपरि तस्या गात्रे स्वकल्पोक्तं मासमूजालं विधाय च षोडशै
रुपचारैस्तु पूजयेत् स्थिरमानसः जपा च बहूनि कामध्ये प्रसूनैश्च
स्रग्गन्धिभिः चन्दनागुरुकर्पूरकस्तूरीकुङ्कुमादिभिः समाकीर्णे
सुपर्य्यङ्के पूजयेत्कुलनायिकाम् पूजयित्वा सदा भक्त्या स्थिरचि
त्तः स्थिरेन्द्रियः षट्कं गणपं दुर्गां क्षेत्रपालं तथैव च पूर्वादिक्रमतो
मन्त्री पूजयेत्सिद्धिहेतवे त्रिकोणे पूजयेन्मूर्ध्नि कामं प्रीतस्य
मध्यगे गणेशं च कुलाध्यक्षं दुर्गां लक्ष्मीं सरस्वतीम् त्रिकोणे
पूजयित्वा तु वसन्तं मदनं तथा स्तनयोः पूजयेत्पश्चात्सुखेन स्मः
कलाधरम् दक्षपादादि मूर्द्धान्तं वाममूर्द्धादिकं तथा पूजयेत्साध
कश्रेष्ठः कलां वै कामसोमयोः श्रद्धा प्रीति रतिश्चैव धृतिः कान्तिर्म
नोरमा विमला मोदिनी घोरा मदनोन्मादिनी मदा मोहिनी दी
पनी चैव शोषणी चैव वशंकरी रञ्जनी च क्रमेणैव षोडशी प्रियदर्शि
ना षोडशस्वरसंयुक्ताः एताः कामकला यजेत् पूषा रमा च सुमना
रतिः प्रीतिस्तथा धृतिः ऋद्धिः सौम्या मरीचिश्च तथा चैवांशुमालि
नी अङ्गिरा पावनी चैव छाया संपूर्णमण्डला तथा तुष्टामृते चैव
कलाः सोमस्य षोडश स्वरैरेव प्रपूज्यादि सर्व्वकामार्थसिद्धये तस्या
स्तु मदनागारे पूजयेद्दुर्गमालिनीम् वाग्भवं भगशब्दादौ भगो मा

गिनिवालिखेत् भगेदेविमंगातेवभगमालेभगावहे भगगुह्ये भ
गयोनि भगनूपिणि ततःपरम् नित्यक्लिन्नेभगप्रांते स्वरूपे सर्व
सालिखेत् भगानि मेह्यालयांते वरदे रेथसमालिखेत् रेतस्रो
क्लिन्नेक्लिन्ने भवेत्ततः क्लेदय द्रावय मोचो सर्वसत्वान् भगेश्व
रि भगरूपे सर्वाणि च भगानि मे। भगततःपरम् क्लिन्नेक्लिन्ने
भवेत्पश्चात् क्लेदय मोच भगविवेकत्वं भक्षोभय सर्वेततः
सत्वान् भगेश्वरि रूयात् वाग्भवं ब्लूं जमादिकम् वाक च जवब्लूं
तेततःपरम् ब्लूं मों ब्लूं हें पदांते च ब्लूं कुं क्लूं च ततो वदेत् सर्वाणि
भगानि मे वशमानय चोद्धरेत् वधूमायां च भुवनेशानि ततश्च भ
गमालिनी भगमालां च नित्यां च ह्र. पुनांम तु समुद्धरेत् भगमा
लां महाविद्यां पूजयित्वा च साधकः सर्वानन्दमये मध्ये चक्ररा
जं समर्चयेत् पूर्वपश्चिमयोगेन निजविद्यां प्रपूजयेत् तत्राग्र
वाहनं नास्ति जीवन्यासं तथैव च विधिवत्पूजनं कृत्वा सलि
गेतद्वनंतरम् तारं च भुवनेशानी त्रिपुरायाश्च यंततः नमः शि
वाय विद्यार्यदशार्णा परिकीर्तिता अनेन मनुना मंत्री सलिंगप
रिपूजयेत् यजेत्तत्पुरुषाघोरसद्योवामेशानसंज्ञकान् निवृत्ति
श्च प्रतिष्ठा च विद्या शांतिस्ततःपरम् शांत्यतीतां च संपूज्य पश्चाद्गा
वरणं यजेत् समग्रविद्यामुद्धार्य तत्त्रिकोणे प्रपूजयेत् पुष्पद्
पादिकं दत्त्वा निर्विकल्पमनाः स्वयम् सर्वसंक्षोभिणीमुद्रां व
द्ध्वा योनिं विचारयेत् मध्यमे मध्यमे कृत्वा कनिष्ठांगुष्ठरोधिते

कौ तर्जनीमोदगुणवत्कुल्यामध्यमोपर्य्यनामिके एवात्तपरमामृतास्व
१८ द्वंसंत्तोभणीमता त्तोभयेदथवामत्रीगजहस्ताख्यमुद्रया अथो
108 मुखेदत्तपाणिंनिधायांगुष्ठकेसमे निःक्षिपेदंगुलीः सर्व्वा गज
तुण्डाकृतिर्यथा गजहस्तामहामुद्राकथितासिद्धिदायका उच्च
रेद्वर्गमालांचत्वारिविंशतीवीजमुच्चरन् अनेनैवमनयोर्योगेमहावि
न्दुः प्रजायते रजोमध्येरजः साक्षात्संविदेवनसंशयः प्रकृतिः
परमेशानीवीजंपुरुषउच्यते शिवशक्तिसमायोगोयोगएवन
संशयः पीत्कारोब्रह्मरूपस्तवचनंस्तवनंभवेत् आलिंगनं
वकस्तूरीकर्पूरंचुंबनंभवेत् नखदंतक्षतादीनिपुष्पमालादि
पूजनम् लीलादिकंधूपदीपंकुचमर्द्दंशिवार्च्चनम् मैथुनंतर्पणं
विद्धिवीर्य्यपातोविसर्ज्जनम् कुलद्रव्येनसंप्राप्यशिवशक्तिस
योभवेत् वीर्य्यामृतंतर्पंब्रह्मकुण्डेद्राकुमुखंवोभुजे कुण्डेत्रिगुण
संपन्नेश्रीविन्दुनिलयेपरे परापरविभागेनकुलीनोविमृश्य
जितः विविक्तकुत्सनपरोजायतेगृहतत्परः प्रकृतंचसमाप्या
थगृहीत्वाद्रव्यमुत्तमम् तर्पयित्वामहादेवींशक्तिंयेदक्षिणादिदेन
स्तवस्तोभरणाद्यैश्चशक्तिंचपरितोषयेत् त्रिविधंत्रिपुरायाश्चक
थितंपूजनंमहत् अतएवमहाप्राज्ञोनिर्विकल्पःसदाभवेत् त
दास्तविकल्पैरस्तवैः सर्व्वाणिपरिशोधयेत् निर्विकल्पतयायोगः
यत्नेदोषोनविद्यते अश्वमेधादियज्ञादौवाजिहत्याकथंभवेत्
फलंस्वीकृतंचैवमधुमैरेयमेवतम् पैष्टीमद्यंयासवंतथाच

क्रविनिर्म्मितम् इकारनिर्म्मितं चैव विविधं वस्तुभेदतः मादकं
धर्म्मसंछेदं दुष्टमाहुर्म्मनीषिणः ज्ञानेन संस्कृतेनैतन्महापातक-
कनाशनम् ब्रह्महत्या सुरापान स्वर्णस्तेयादिपातकान् नाशये
त्कुजन्मा चैव निर्विकल्पः समंत्रवित् विचारयेत् सदा सर्व्वं वस्तुके
ण संसाधकैः पयः पिबंतीह देवा गवां नार्म्मतिशोणितम् मीन
नं भुञ्जते हस्तविषवातन कथं पयः पिबंति संसर्गदुष्टं यथाम्बुद
पिबस्तु च जलं जलचरैर्विष्ठिवटस्वर्णस्तमालयम् स्थापितं देवि
सप्ताहं जलं जीवसमन्वितम् अनामिषं नास्ति किंचित् सर्वं देवी
रादिकं तथा शमीवृक्षे यथा वह्निः सदा तिष्ठति नित्यशः सर्वभू
तेषु विज्ञानं तथा ज्ञेयं संसाधकैः काष्ठादिघर्षणाद्वै व प्रकटीव
ह्निरुच्यते तत्काष्ठदाहनेनैव यथा ब्रह्ममयं जगत् पापपुण्य
विनिर्म्मुक्तं ज्ञानमेतदुदाहृतम् यज्ञयुक्तस्य नामस्य सूत्रस्य यथापा-
तकं भवेत् मादकं वस्तु सकलं वर्ज्जयेल्लवणादिकम् धर्म्मार्थ
र्म्मपरिज्ञानात् संस्कारात्तु पवित्रता विण्मूत्रस्त्रीरजो वापि अन्य
त्तु सकलं तथा पविचारयेन्मंत्रवित् भ्रान्तिरेव न संशयः स्त्रीर
जः परमं स्वं देहस्थेन न जायते कथितं भूषणं तेन प्राप्यते प
रमं पदम् शुक्रस्य तु बीजं तु विन्दुरित्यभिधीयते विन्दुस्थं पर
मं स्वं योगोऽयं शिवरूपतः शिवनेत्रेन वास्यादि भूषणं नास्ति
वै तदा पृथिव्यापस्तेजो वायुराकाशं चन्द्रसूर्य्यको एतैः स्तत्
शरीरं तु शुक्रशोणितसंभवम् पित्रत्स्त्रीणि जायन्ते मज्जास्थि

कौ स्नायुरेवच मांसंतस्माच्छोणितंजायतेतथा तु मांसंशोणितानिच षाट्कौ
१०८ षिकमिदंप्रोक्तंशरीरंपरमर्षिभिः मूलशुद्धिः सर्वशुद्धिरितिन्यायः
107 प्रवर्त्तते शरीरंयदिशुद्धंस्यात्तदातत्रनदूषणम् सर्वथानैवदोषो
स्तितथाशुक्रेणनिश्चितम् ततःपवित्रदेहस्यकारणंकेनदृश्यते
ज्ञानमार्गेणसकलंनिर्विकल्पंनदूषणम् सविकल्पोयदिभवे
त्पापभाग्जायतेनरः अन्नंब्रह्ममयंविहितेनयस्यतत्संभवः
नानाजीवमयंतच्चशरीरंकेनदुष्यते नानाविधाहिसततंदेवताः
सलिलेस्थिताः तेनोदकेनयज्जातंमूत्रंकेनदूषितम् गोमूत्रप्रा
शनंविप्रैर्गोमयस्यचभक्षणम् मलमूत्रेचयोदोषोभ्रान्तिरेवनसं
शयः पवित्रंसकलंचैववासनायस्यकुत्सिता ततोविचार्यम
तिमान्साधकस्तर्कशोधितः मायामूलमिदंसर्वंततोज्ञानमि
दंजगत् पूज्यपूजकद्वन्द्वंचमिथ्यैवपरमार्थतः तस्मात्सर्वप्रय
त्नेनज्ञानमार्गेणशोधयेत् सर्वंब्रह्ममयंविद्धिसत्तर्केणसा
धकः प्रकृतिंचसमाख्यायगृह्णीयाद्द्रव्यमुत्तमम् तर्पयित्वा
महादेवींशान्त्यायदक्षिणादेवत् त्रिविधंत्रिपुरायाःप्रकथितंए
जनंमहत् वक्ष्येहंसर्वशाक्तानांतृतीयजनमुत्तमम् पीठपूजा
विधिंकृत्वापूर्ववत्साधकोत्तमः संस्थाप्यतत्रशक्तिंचपूर्ववद्यपि
पूजयेत् भक्तिभावेनसंपूज्यनायिकांचयथोदिताम् पूजयेच्चत
तस्तस्यांपंचकामान्समाहितः मायांकामंतथापूर्वंक्लींस्त्रींचय
थाक्रमात् कामबीजंचकन्दर्पंमन्मथंचततःपरम् मकरकेत

नैवेद्यं मनोभवं च ऊं युतम् पूर्णवादिनमोऽनेन क्रमेण गन्धः
पुष्पकैः अर्चयित्वा च तद्दिक्षु पूजयेत्तदनन्तरम् षट्कं भैरवं
चैव ऊं गोविन्दे त्रपालकम् तस्या मूर्ध्नि त्रिकोणं च यन्त्रमालि
ख्य साधकः महाप्रेतासनं मध्ये बालामेव प्रपूजयेत् सोलो
गणेशं केशाग्रे ऊं ललाटमध्ये ललाटके दुर्गां भ्रुवोस्तथा लक्ष्मीर
मनायां सरस्वतीम् स्तनद्वये वसन्तं च मदनं चैव पूजयेत् मुखे
सयानिधिं पृष्ठेऽङ्गबीजानन्तरोपितः दक्षिणांशे समासीनसमा
शिरःश्रवणावधि पूज्याः कामकलास्तस्याः साधकोऽगपृष्ठे
माः श्रद्धा प्रीतिस्तथा तुष्टिर्धृतिश्च तदनन्तरम् भूतिः कान्तिर्मनो
न्ता च विमला मोदिनी तथा मोहा मनोभवकरी प्रमदा मोदिनी
तथा दीपनी शोषणी चैव वशंकरी तथा पुनः रंजनी चैव काम
रूपकलास्स्वरविराजिताः ततश्चन्द्रकलाः पूज्याश्चाशिरश्रवणा
वधि पूषा वसा ह्यमला च रतिः प्रीतिर्धृतिस्तथा सुद्धिश्च सो
म्या मरीचिर्विक्रमा याततः परम् मदिराप्यापिनी छाया तथा
सम्पूर्णमण्डला तुष्टिस्तथामृता चैव पूज्याश्चन्द्रकला इमाः
पूजयेन्मदनागारे रक्तचन्दनभूषिते भगमालामन्त्रप्रोच्य पूज
यत्तदनन्तरम् वाग्भवं भुवनेशीं च कमला वाग्भवं ततः जुं
ब्लूं चैव ततः क्लिन्ने सर्वाणीति ततो वदेत् भगानीति ततः पश्चा
न्वशमानय ततः परम् ह्रीं ह्स्क्रीं क्लेदिनीबीजं क्लीं क्लीं च ततः
परम् भगमालिन्यै नमः स्वाहा पूजयेत्क्रममध्यगो पूजयित्वा त

कौ तस्यार्के निजं देवीं ततो यजेत् विधिवत्पूजयित्वा च गन्धैः पुष्पैस्त
१८ था ततः धूपैर्दीपैस्तथा नैवेद्यैर्विविधैः कुलसाधकः विधाय च तदन
108 चैव तत् उच्छिष्टं स्वयं हरेत् अर्घ्यं पूगन्धपुष्पाद्यैः सपिरं तदनन्तरं
मूलमन्त्रं समुच्चार्य प्रणवं भुवनेश्वरीम् नमः शब्दं ततः पश्चात् पि
बायेति ततो वदेत् यजेत्तत्र कपालोरस्मशाने श्मशानपि नि
वृत्तिः प्रतिष्ठा च विद्या च तदनन्तरम् शान्तिश्च शान्त्यतीता च षं
डंगा च ततः परम् समस्तविद्यामुख्याश्च त्रिकोणं चैव पूजयेत् अव
धूतेश्वरी कुब्जिका मातङ्गी समयापि वज्रेश्वरी कालिका च तथा
था रिक्तारवासिनी महावनेश्वरी तारा पूजयेत्तत्र साधकः त
दवुर्गां ततो लक्ष्मीमुक्तां तामलमुत्तमम् सपिण्डं तत्र निःक्षिप्य ग
जेहस्तामृतेनुद्धृत्य पूजयेत् सौभरहिं तस्याष्टोत्तरसहस्रकम् प्रा
तमष्टोत्तरं वापि स्रद्धो भस्थिरमानसः जपं तेन जपं देव्यै समर्प्य
तदनन्तरम् दत्त्वा मनोभवस्तावैः पूजयेत् सुचिरं वसेत् गलच्छ
न्दं वत् तस्मात्गृहीत्वा तर्पयेच्छिवाम् स्नात्वा प्रदक्षिणीकृत्य वि
सर्जयेदनन्तरम् विसर्जनं विधायाथ शक्तिं च परितोषयेत् विधि
वद्दक्षिणां दत्त्वा अन्नपानादिभिस्तथा एवं यजनमात्रेण मन्त्रसि
द्धिर्न संशयः अथातः संप्रवक्ष्यामि द्वितीयागममुत्तमम् संप्रा
प्य दिवसं पूर्वं देवी च विधिवत्भगे पूजयित्वा जपेन्मन्त्रमयुतं द्वि
तयं तथा तस्य लक्ष्मी महाविद्या भवेद्वश्य भुवि दुर्लभा अथवा अ
ष्टमीतिथिमासाद्य पक्षयोरुभयोरपि आमं सविधिवत्योनिं

तत्रैव योगिनीं यजेत् पश्चात् संपूज्य देवेशीं मूलमंत्रं च साधकः
षट्सहस्रं दिवारात्रौ जप्त्वा मंत्रमनन्यधीः संप्राप्य महतीं विद्यां
देवीपुत्रो भवेत् भुवि तथा च संप्रवक्ष्यामि प्रकारान्तरमुत्तमम्
योनौ संपूजये देवीं सर्वदुःखनिवारिणीम् भगाद्यै भगमालामंत्र
भगे भगवतीं ततः ततो वै लभते सिद्धिं मंत्रस्य लक्षमानतः द्वि
लक्षेण महावाग्मी त्रिलक्षेण महाकविः वेदलक्षेण वेदस्य सा
धकः पारगो भवेत् वाक्सिद्धिश्च भवेत्तस्य पंचलक्षप्रमाणतः
रसलक्षैर्भवेत्तस्य अणिमादिगुणाष्टकम् सप्तलक्षेण वीरेन्द्रो
जीवन्मुक्तो भवेन्नरः अतऊर्ध्वं न जानामि शिव पवन संशयः
अथवा विधिवद्भक्त्या मासमात्रं साधकः स्थिरमानसः संपूज्य वि
धिवत् भक्त्या योनौ मूलं प्रपठेत्ततः रात्रौ जागरणं कृत्वा हविष्या
शी जितेन्द्रियः योनिं स्पृष्ट्वा जपेन्मंत्रमेकाकी लक्षमानतः मा
यते मंत्रसिद्धिस्तु नात्र कार्या विचारणा सर्वसिद्धिः करे तस्य स
त्यं सत्यं सुनिश्चितम् अथवा विषुवे चैव मासान्तपक्षयोरपि अ
ष्टम्यां च चतुर्दश्यां चन्द्रसूर्यग्रहे तथा श्मशाने वा यथाशक्त्या गु
रोर्वाथ शिवसन्निधौ लतामानीय यत्नेन योनौ चक्रं यथाविधि
लिखेन्नव प्रकुर्वीत कुंकुमागुरुचन्दनैः मंत्रमेव प्रलिखेत्तस्या मावा
ह्य परमेश्वरीम् संपूज्य विधिवद्भक्त्या साधकः स्थिरमानसः ज
पेन्मंत्रं दिवारात्रौ योषितां योनिदेशतः लक्षमेकं तदूर्ध्वं वा दश
भिर्होमसमाचरेत् पूजां च विधिवत्कृत्वा यथाविभवविस्तरैः प

कौ रितोष्टगुणं पश्चात् मंत्रसिद्धिश्च जायते महावाग्मी भवेत्सोऽ
१९ पि यत्नवान् राजवल्लभः लक्ष्मीलाभस्सदा गेहे वाणी वक्त्रे हि निश्चि
109 तम् भुवि शक्तिसमो वीरो जीवन्मुक्तः प्रजायते अथवा मन्यप्रका
रेण तृतीयं जननमुत्तमम् तत्र तास्थापयेद्दूतीं पूजयेच्च यथाविधि
वस्त्रालंकरणं चैव दत्वा तस्यै यथोचितम् धापयित्वा रक्तवस्त्रं दू
तीं कुर्यात् सुलक्षणाम् पंचभूमौ समालिख्य षट्कोणान्त
र्गतं लिखेत् तस्योपरिगतां नारीं निर्जने भूषणान्विताम् तत्र संलग्न
न्यपुष्पधूपैर्नानोपहारविस्तरैः देवीरूपेण संभाव्य पूजयेत्तां य
थाविधि तस्या गात्रे न्यसेन्मंत्रं पंचकामान् क्रमेण तु स्वकल्पो
क्तक्रमेणैव न्यासजालं प्रविन्यसेत् दीक्षयित्वा तन्मूलेन देवी
बुद्ध्या यजेत्ततः योनौ वा पूजयेद्देवीं यस्माद्योनिमयी शिवाम् यो
नौ कामेश्वरीं चैव नाभौ वज्रेश्वरीं ततः हृत्कमलमध्ये तु पूजा
येत्परदेवताम् योनिसंदर्शनं कृत्वा जपेद्दिव्यां ततः परम्
अयुतं वा जपं कृत्वा सर्वसिद्धीश्वरो भवेत् अथवा शक्तिमानीय
विधिवत्पूजयेद्योनिमण्डले संपूज्य निजदेवीं च साङ्गां सपरि
कराम् भगिनीं भगजिह्वां च भगास्यां भगमालिनीम् भगदत्तां भ
गाढ्यां च भगावर्णां भगात्वकां भगास्तनीं भगांगीं च भगस्यां भगास
र्पिणीम् भगो भगवती तस्याः संपूज्य भगमालया वाग्भवं काम
बीजं च कमलाबीजमेव च इति बीजत्रयं दत्वादौ एताश्च नमोन्ति
काः पूजयित्वा ततः पश्चात् मूलमंत्रं जपेत्ततः एकाग्रतजपं कृ

त्वा सर्वसिद्धिपरायणः सर्वशास्त्रार्थवेत्ता च सर्वगः सर्ववित्प्रभुः
इदानीं कथ्यते तृतीयागस्य महिमा भृशम् योषितां योनिमास्थाय
सर्वसिद्धिर्न संशयः एतत्पूजनमेवाद्याः सर्वतन्त्रेषु गोपितम् इत्थं
पूजाविधिं कृत्वा सर्वसिद्धियुतो भवेत् लभते विमलां वाणीं कवीना
मग्रणीर्भवेत् पेष्ठ्यमण्डलं प्राप्य वशीकुर्यात् जगत्त्रयम् सिद्ध
गन्धर्वदेवैश्च किन्नरैर्दानवैस्तथा राक्षसैर्भीजैर्नित्यं स पूज्यो भव
ति साधकः सर्वदा वल्लभः सोऽपि योगिनीनां सुदुर्लभः स्त्रेतेचर
सन्ते देव्या साक्षात्स्मरद्रूपोपमः चन्दनागुरुगन्धाद्यैर्लताः संपूज्य
यत्नतः सर्वपापविनिर्मुक्तो रमेत् कल्पायुतं भुवि वस्त्रालंकार
माल्यैश्च तोषयेत् यदि कामिनीम् स तल्लां प्रियमाप्नोति स गच्छे
त्पार्वतीपदम् मत्स्यमांसदधिक्षीरपिष्टकैः पायसादिभिः भो
जयेत् युवतीयस्तु स भवेत् पृथिवीपतिः कायेन मनसा वाचा
सुन्दरीं यस्तु तोषयेत् स भवेत् साधकश्रेष्ठो मान्यश्च भवेत् प्रियः
बालिकां यदि पश्येच्च निर्जने वरदांगवरीम् तदा तदा प्रपूजयेत देवी।
ध्यात्वा यथाविधि बालिकां वा स्त्रियं वापि यदि पश्येद्दिगम्बरीम्
नमस्कुर्यात्प्रयत्नेन सदा तां तोषयेत्सुधीः स च सर्वप्रियो भूत्वा
वाग्मी च कविर्भवेत् एतत्सर्वं भूतानां तन्त्राणां गोपितं भुवि
ज्ञात्वा गुरुमुखात् सर्वं शिवतुल्यो भवेन्नरः निर्विकल्पस्तु मं
त्रज्ञो भवेत् वै साधकः सदा काम्यं नैमित्तिकं ज्ञात्वा चण्डिकां प
रिपूजयेत् दीक्षितस्साधिकाराय नान्यस्मै च कदाचन पुस्तको।

कौ लिखितं दृष्ट्वा स्वयं ज्ञात्वा करोति यः ब्रह्महत्यासहस्राणां पापान्सर्वाणि लिप्या
११ दिपातकैः लिप्यते नात्र सन्देहो नरके निपतत्यसौ गोप्यं प्रयत्ने
110 न यदीच्छेत् शुभमात्मनः अन्यथा नरकं याति सत्यं सत्यं न संशयः
अथातः संप्रवक्ष्यामि मन्त्रसिद्धेस्तु कारणम् मन्त्रसिद्धिर्भवेद्द्ये
न गुरुशुश्रूषादिभिर्विना गोपितं कोटितन्त्रेषु वेदान्तो प्रकटीकृतं
एतत्प्रकाशनाल्लोके महाहानिः पदे पदे एतज्ज्ञात्वा विशेषज्ञो
गोपयेत्प्रीतये मम शिवशशिविलसितमार्तण्डपञ्चमास्यस्वराङ्कं द्वि
तीयमिदमसुरबीजमुग्रप्रभायाः क्षणमपि विमृशीषां मण्डला
तर्विभाव्य द्रावयति दुष्टवादिराड्जायते सः सजयति रि
पुवर्गान्वादिराजान्विवादे लघयति रमणीनां चित्तचौरश्चि
रायुः कवयति कविराजैरप्यदृष्टं मयिपतिरपि देयाः
किं पुनः सिद्धिसंगाः कुलभवति स यो यो मन्त्रवर्णान्विलिख्य
निखिलनिगमवर्णान्स्तम्भदोषादिदुष्टान् विदितगुरुकुलान्त
र्गीसावाहविधिज्ञो मनुपुटितपदीयानसंलिखेन्नाथियारे विग
तमयविवादध्वान्तजालः सुधीरः परपदकरलग्नः साधयेत्स्वान्तः
चेताः इत्यादि अथ सर्वत्र जमतंत्रश्रेष्ठोत्तरसहस्रकम् अथवा
अष्टतत्रयसंयोगात्दुष्टमन्त्रोऽपि सिद्ध्यति एवंभूतलिपिश्चैव हि
लेखो मोहिनीत्रयम् अष्टतेन पुटीकृत्यसंयोमन्त्रं भजते चिरात्
क्रमात्क्रमाच्छतावृत्या तस्य सिद्धो भवेन्मनुः पंचरत्नाः साङ्ग
वर्णाश्चामेराग्निजलंयरा अष्टमायं द्वितीयं च चतुर्थमथ पंचमं क्रमात्

पंचवर्गात्त्रयाणां स्वर्णातं च तेनेन्दुभिः सह एवाभूतलिपिः प्रोक्ता
द्वाविंशद्दलैः अथवा पुरश्चर्यादिभिर्मंत्रो यदि सिद्धो भवेन्नहि त
दा च साधकश्रेष्ठः प्रकारान्तरमुच्यते एवं वानुष्ठिते मंत्रे यदि सिद्धि
र्न जायते उपायास्तत्र कर्त्तव्याः सप्त शंकरभाषिताः द्रावणं बोधनं
वश्यं पीडनं पोषशोषणम् दहनान्तं क्रमात्कुर्यात्ततः सिद्धो भ
वेद्ध्रुवम् वारुणेनैव बीजेन ग्रथनं कारयेन्मनुम् तन्मंत्रं म
त्रमालिख्य शिलाकर्पूरकुंकुमैः उशीरचन्दनाभ्यां मंत्रं समग्रथि
तं लिखेत् क्षीराज्यमधुतोयानां मध्ये तं लिखितं क्षिपेत् एवं नात्र
पनाद्धोमात् द्रावितः सिद्धिदो मनुः द्रावितोऽपि न सिद्धिश्चेत् बोध
नं तस्य कारयेत् सारस्वतेन बीजेन संपुटीकृतं तं जपेत् एवं
कृतेन सिद्धिश्चेत् वशीकुर्यात्ततः परम् आरक्तचन्दनं कुंकुमहरि
द्रामदनं शिला एतैस्तु मंत्रमालिख्य भूर्जपत्रे तु शोभने धार्ये
त्कण्ठे न चेत्सिद्धिः पीडनं तस्य कारयेत् अधरोत्तरयोगेन पादा
नि परिजप्यते ध्यायेत्तु देवतां तद्वत् दद्यात्तत्र धूपिणीम् विद्यामा
दौ चतुःस्थेन लिखित्वाक्रम्य वामांघ्रिणा तथाभूतेन मंत्रेण होमं का
र्यं दिने दिने पीडितो लज्जयाविष्टः सिद्धः स्यादथ पोषयेत् बाला
यास्त्रितयबीजमाद्यं तेन संयोजयेत् गोक्षीरमधुना लिख्य विद्यां
पाणौ विधारयेत् पोषितोऽयं भवेत्सिद्धो न चेत्कुर्वीत शोषणम्
द्वाभ्यां च वायुबीजाभ्यां मंत्रं कुर्यात् विदर्भितम् एषा विद्या गले धा
र्या लिखित्वा भस्मना शोषितोऽपि न सिद्धिश्चेत् दहनीयोऽग्निबीजतः

कौ आग्नेयेनतुबीजेनमंत्रस्यैकैकमक्षरम् आद्यंतमथयुंज्याद्वश्योन्नये
III दाहकर्म्मणि कण्ठवल्लिकृतस्यतैलेनमंत्रमालिख्यधारयेत् धा
III रणात्कण्ठदेशोत्थतः सिद्धोभवेन्मनुः एवंक्रमेणकुर्व्वीतधार
णमुत्तमम् इतिज्ञानानन्दपरमहंसविरचितेकौलावलीनि
र्णयेअष्टादशोल्लासः १८ ॥ अथवक्ष्येसिद्धिचिह्नंसाधकस्य
यथाभवेत् अकस्मात्संलभेत्गन्धंधूपस्यकुंकुमस्यवा सदा
वाप्रियसंभाषांलभ्यतेयोषितामपि स्वप्नेदृष्ट्वागजाश्ववायद्यारो
हतिसाधकः सिद्धिमंत्रोभवेत्सोपिनात्रकार्य्याविचारणा स्वप्ने
जायतेवनितावृन्दैःसंमिलनंनिशि गजादिषोलंघ्यगोष्ठविस्ता
रोराजदर्शनम् राज्ञांतथांगनानांचदर्शनंरमगीतयोः सौधगो
ष्ठंतथामंत्रप्रासादंचमनोरमम् रथंवातरणींवापिस्वप्नेष्वावाह
येत्त्रयः सम्यकसिद्धिर्भवेत्तस्यध्रुवःसोपिनसंशयः खड्गंचप्र
तिमांचैवराजानंरुधिरंतथा रुधिरालेपनंस्वांगेमदिरालेपनं
तथा मदिरालोकनंमांसंस्त्रियंवाचारुहासिनीम् स्त्रीभिर्वावे
ष्टितोयस्तुस्वप्नेभवतिसाधकः मंत्रसिद्धिर्भवेत्तस्यसत्यमेवन
संशयः गोमांसंवापिचान्नस्यभक्षयेद्योपिमांसकम् लभेद्वा
भक्षयेद्वापिस्पर्शयेद्वाकदाचन देवतानरगायत्रीनारीणांदर्श
नंभवेत् चरणोरुणितंवापिरत्नोजश्चरेपकजम् एतेषांतुफले
चैवपरंगुर्व्वादिकंगृहम् तेषांप्रसादःस्वप्नेचबालस्यापिप्रियदर्शनं
सिद्धिचिह्नंभवित्तेययदिनपतेमनः यदिभाग्यवशाच्चैवकुल

दृष्टिस्तु जायते अर्वाहकं भवेत्तस्य सर्वसिद्धिः करे स्थिता अकाल
पतनं चैव दर्शनं भक्षणं तथा आगम्यागमनं चैव गुरोः संदर्शनं तत
था परमान्नभक्षणं च शोणितं च विशेषतः दिव्यान्नं वापि भुक्त्वा च
सिद्धो भवति साधकः साधकं स्वस्वरूपं च देवतां वा प्रपश्यति खड्
गं वा फलकं वापि अमृतं वापि गुलिकाम् सिद्धिद्रव्यं शवं चैव वसना
भरणादिकम् रक्तमाल्यां रक्तपुष्पं स्वस्य प्राप्नोति साधकः सिद्धः सो
पि भवेत्तस्य संशयो नास्ति निश्चितम् गजं वा तुरगं वापि शिवलिंगं
च पश्यति पीठादिगमनं तत्र देवतादर्शनं तथा उद्यानं काननं वापि
भूरेवयति दर्शनम् बालकं भिक्षुकं चैव फलादीनां तु लोलुपम्
पशुपक्षिफलादीनां विश्वासः प्रियदर्शनः मनसा भावितं कार्यं
शंखादिध्वनिरुत्सवः वेणुवीणारवं गीतं विचित्रं दर्शनं तथा अ
ज्ञातजनसंवादो नष्टद्रव्योदयं तथा अकस्माद्भावसिद्धिस्तु अल
क्षितजनस्तुतिः देवस्य महती पूजा सुकृती च कृतस्तुतिः अदृष्ट
शास्त्रविज्ञानं तेजस्वी जनवल्लभः मंत्रलाभस्तथा स्वप्ने गुरूणां तु
हितस्तथा पत्नीनां साधकानां च वीरकटोत्कटदर्शनम् अस्य
गन्धिः सुगन्धिपुष्पस्य धूपस्योद्भवस्तथा स्वप्ने चैव गुरुस्त्रीगुरुस्म
रणकर्माणि इति विज्ञाय वीरेन्द्रः प्रयोगं च समाचरेत् अथ निंद्यानि
वस्त्राणि विद्यानर्थकराणि च कृष्णवर्णभटं स्वप्ने प्रहारस्तेन मलनं
मैथुनं परनारीभिर्विनाशो मरणं तथा राज्यहानिर्भवद्धि वायुजन्तु
भिक्षुदर्शनम् गुरोरालेपसंपत्तिर्जन्तूनां साधिसाधनम् अस

कौ मंत्रार्चनप्रद्वास्वदेवार्चनंनिरन्तरम् असिद्धार्थफलेतत्रसिद्धार्थंजप
११२ माचरेत् गणेशंवटुकंपश्चात्तत्रैवयोगिनीस्तथा पूजयेद्वाविंशम
112 येबलिंचैवसदार्पयेत् कुमारंवटुकंभद्रं लक्ष्मींसवाहनायकम् सप्त
क्लिंपवत्तैवयोगिनीयोगिभिःसह पूजयित्वाविधानेनवलिंपश्चा
न्निवेदयेत् ततःसिद्धोभवेन्मंत्रोनिर्विघ्नमहानिश्चितम् अथातः
संप्रवक्ष्यामिकाम्यप्रयोगमुत्तमम् रजोवस्थास्यमालोक्यजन्मले
स्वेष्टदेवताम् पूजयित्वामहारात्रौविधिदिंनप्रजपेन्मन्त्रम् लक्षपीठ·
फलंचैवलभतेसाधकोत्तमः वेतालपादुकासिद्धिंखड्गसिद्धिंत
थैवच अंजनंतिलकंचैवप्राप्नोतिक्षोभवर्जितः अथवा कुलागा
रचक्षितायादृष्ट्वायोजपतेनरः अयुतैकप्रमाणेनसाधकःस्थिर
मानसः केवलंगुरुभावेनसर्वविद्यानिधिर्भवेत् संस्कृताःप्राकृता
श्चैवलौकिकावैदिकास्तथा वर्णमायांतितेसर्वेसाधकस्यनचा·
न्यथा अथवाशुक्रकेशास्यमुविमुक्तामृसंस्थितः प्रजाप्यवायुतं·
प्राप्तःप्रतदेवफलंलभेत् अथवा नग्नांपरलतांपश्यन् अयुतंय
स्तुसाधकः प्रजपेत्सोभवेत्सद्योविद्यायाःवल्लभःस्वयम् तस्यद
र्शनमात्रेणवादिनःक्षान्ततांगताः गद्यपद्यमयीवाणीसभार्या
तस्यजायते तस्यवाक्यपरिचयाज्जडोभवन्तिवाग्मिनः तन्त्रास्त्रा
स्त्रविधयःसर्वेप्रत्यक्षमतिसुदान्विताः हविर्भुक्ताथवापूर्वक्रमेणैव
फलंलभेत् अथवाधनकामस्तुमहदैश्वर्यकाङ्क्षकः बृहस्पति
समोयस्तुभवितुंकामयेन्नरः अष्टोत्तरशतंजप्त्वाकुलमांसमन्त·

त्वचित् मैथुनं यः करोमेघसतत्सर्वफलं लभेत् अथवा हस्तमात्रो
व्यस्थिरधीः एतमानसः कवित्वं लभते सोपि अमृतत्वं च गच्छति
पृथ्वीमृत्युमतौ वीरमतस्वं यदि नियशः तदा वादी स्वसिंहोते
ततः क्षितितलं विशेत् अथवा महाचीनद्रुमे देवीं ध्यात्वा देवीं प्र
पूजयेत् तद्द्रुमोद्भवपुष्पेण पूजयेद्भक्तिभावतः स भवेत् कुल
देवस्य कुलद्रुमगतः शुचिः अथवा वल्लतरोर्मूलपद्मे देवीं ध्या
त्वा यथाविधि ततस्तथा धारसारेण तर्पयेन्मातृकानने अथ
वा पद्मे दृष्ट्वा तथा बिल्वं वंजनं पीवरं तथा वामं रविविविंवच
तिलपुष्पं सरोवरम् त्रिसृतं वीक्ष्य ज्ञात्वा वशतपः श्रद्धभावतः
मुखप्रसादं स्ववचः सुलोचनं सुहास्यकम् स्ववेशं स्वभगं गन्ध
स्वजनं स्वखेमेकं च लभते च यथार्थसिद्धिं साधकः स्थिरमानसः
अथवा महाचीनद्रुमलतावेष्टिते न च यत्फलम् तस्यापि षोडशां
शेन फलं नार्हन्ति ते शिवाः शिवास्तनाधिकफलं लतागृहप्रवेशनं
अथवा लतारतेषु जपमन्त्रं महापातकमुक्तये धनार्थी प्रजपेद्धि
र्यापरयोषित्समागमे अथवा लताभावे समुत्साध्य स्वशुक्रं
साधकोत्तमः अष्टलक्षं प्रजपेन्मन्त्रं यः कामार्थसिद्धये इति चीन
क्रमेणैव ताराशीघ्रफलप्रदा गुरुवाक्यक्रमेणैव त्रिपुराभुक्तिमुक्ति
दा महाचीनक्रमेणैव कालिकाफलदायिनी सप्तसप्ततिभेदा या
श्रीविद्या कथिता भुवि तासान्त्रसमतान्तेयागुप्तसाधनसाधने
चत्वारिंशत्प्रकारा या भैरवी विदिता भुवि तासांतत्रसमतान्तेयागु

कौ मसाधनसाधने या या विद्या महाचण्डोक्तास्तासामेव विधिर्मतः म
११२ हाचीनक्रमेणैव छिन्नमस्ता तु सिद्धिदा सर्वा याश्चण्डिका विद्या
113 तासां चैव विधिः स्मृतः यथा काली तथा तारा यथा बाला तथान
पूर्णी यथा काली तथा दुर्गा यथा दुर्गा तथा जटा यथा सो त्रिपु
रा बाला तथा त्रिपुरभैरवी सुन्दरी च तथा ज्ञेया मर्दिनी च तथा
परा अन्यायाया महाविद्या तथा भवति निश्चितम् मन्त्रं यन्त्रं प्रथ
क्‌भावासाधनेनैकता भवेत् एतन्मन्त्रं च मन्त्रं च पूजेऽप्यापि न दर्शी
येत् अन्यथा प्रेतराजस्य भवनं याति निश्चितम् अथातः संप्रव
क्ष्यामि काम्यसाधनमुत्तमम् सद्योजपमूलमन्त्रं तेन क्रमोत्क्रमे
णमातृकाम् आमन्त्र्येन ततः पश्चात् पञ्चविंशति संख्यया प्रा
तरेव जलं धीरो भावयेन्मातृकालयम् तदंबुपानतो मन्त्री वाग
मी द्रुतकविर्भवेत् त्रिमासान्नात्र सन्देहः षण्मासात् वाक्पतिर्भ
वेत् काम्यकर्ता महावाग्मी भवेच्छ्रुतिधरो नरः अष्टमासात् सर्वम
न्त्राणां पारगो विश्वपूजितः सर्वतन्त्रान्तभेदी यो नात्र कार्या विः
चारणा हि वर्षाद्देहसिद्धिः स्यात् त्रिवर्षान्तु शिवो भवेत् अथवा प्रदी
पकालिकाकारं जिह्वायां मूलमन्त्रकम् देवताङ्गुरुवर्णांश्च विः
भाव्य यो जपेन्मनुम् त्रिमासाभ्यन्तरे मन्त्री पूर्ववत्फलमाप्नुयात्
ततत्प्रकारभेदेन तत्तत्फलमवाप्नुयात् प्रातरेव हि जपम्य
मष्टोत्तरसहस्रकम् अथवान्यप्रकारस्तु वक्ष्यामि तन्त्रवर्त्मना ब
लिदानादिकं सर्वं विधाय पूर्ववत् ततः श्मशानालयमागत्य तु

क्तकेशोदिगंबरः जपेदयुतं सम्यक्तत्सर्वकामार्थसिद्धये अथवा
महाचीनक्रमलतामन्त्राभिर्विप्रयुक्तकम् सहस्रंदेवीमभ्यर्च्य श्म
शानेसाधकोत्तमः अथवा स्वगात्ररुधिराक्तैस्तु विल्वपत्रैः सह
स्रशः श्मशाने ऽभ्यर्च्य देवींतु वागीशसमतां व्रजेत् अथवा ।
श्मशानेशयनोवीरः शवासनगतः शुचिः असकृत्प्रजपेन्मं
त्रं सर्वसिद्धिर्भवेत्ततः कविर्वाग्मीयतिनीदक्ततः सर्वयोषित्प्रियः ।
स्रग्वी जायते नात्र सन्देहः षण्मासिकात्साधकः स्वयम् अथवा ह
द्रवि द्वोरभूतानि देवीं ध्यात्वा विनाशयेत् नाभिमात्रे जलेस्
थित्वा देवीमर्कगतां स्मरन् अष्टोत्तरशतं जप्त्वा साधको लभते श्रि
यम् अथवा रेतोयुक्तेन पुष्पेण अर्कस्येह सहस्रशः श्मशाने
ऽभ्यर्च्य देवींतु सर्वसिद्धिस्तु विन्दति धनवान्वलवान्वाग्मी ।
सर्वयोषित्प्रियो भवेत् स्रग्वी स्यान्नात्र सन्देहो महाकालव
चो यथा अथवा श्मशाने योषितं गच्छन् भगे मंत्रं प्रकल्पयेत्
रक्तचन्दनदिग्धांगरक्तपुष्पैरलंकृताम् भगेऽर्चां प्रकुर्वीत जा
वापुष्पैर्विशेषतः मंत्रंप्रोच्चारयेत्तत्र भगेलिंगप्रवेशने कुण्ड
गोलोद्भवैः पुष्पैः स्वयंभुकुसुमेन च पूजयित्वा ततो देवीं यो वै
ध्यायेद्देवताम् तत्र गत्वा लभेत्सिद्धिं यदि मानमयं व्रजेत् अ
थवा अष्टम्यां च चतुर्दश्यां पूजयित्वा यथाविधि अर्घ्यं दत्वा ततः
पश्चात् जवापुष्पं च वर्बराम् चन्दनं चार्ककुसुमं तथा श्वेतापराजि
ता अर्घ्यं दत्वा विशेषेण देवीमर्कगतां स्मरन् अष्टोत्तरशतं जाप्यं

कौ यावज्जीवनं संशयया आज्ञासिद्धिमवाप्नोति सर्वं सत्यं एतदेवमे अथ
११४ वा प्रातःस्नानरतो मंत्री नित्यमष्टोत्तरं शतम् जपेत्तस्यात्तु सिद्ध्यति
114 यन्त्रयामादिसंपदः अनेन विधिना मंत्री अष्टदशद्वादशलक्षं जपेत् अ
घोरमंत्रपदाद्यान्ते द्व्यक्षरं त्रिविधान्ततः स्वकल्पोक्तविधानाद्य सा
धको विजितेन्द्रियः सर्वद्वन्द्वसमायुक्तदेवताध्यानतत्परः वि
वादे जपकाले वा यत्किंचित्कुलसाधने तत्राद्यो बकमालि
कासिन्दूररजसालक्तम् रात्रौ अष्टजयेत् गेहे स्थित्वा पदात्मिकां
परां जप्त्वायुतप्रमाणेन तदन्ते मंत्रं जपेत् ततः पृहिमान्तर्ज्ञगा
द्वात्रिंशच्चारे चरणाकुले शुभाशुभमये रात्रे कथयस्व जगत्प
ते एवं निमंत्रयित्वा तस्मवारान् स्वसंयतः भक्तिभावेन संप्र
पदत्वा च बलिमुत्तमम् ततो वीरेन्द्रकराञ्जसाधकः स्थिरमान
सः पदाद्यान्तसमालोक्य ज्ञानं यत्तत् शुभाशुभम् साधकाभिमु
खं चित्रं उभयेर्यदि चैकतः सव्यस्य दक्षिणस्यापि शुभं भवति नि
श्चितम् विपरीतफलं दद्यात् विपरीते स्वनिश्चितम् पदमध्ये शु
भो रत्वा शुभदाशुभयोगतः विपरीतफलं तस्य विपरीतं च निश्चि
तम् त्वं दूरदूरफलं प्रोक्तं दीर्घदीर्घफलप्रदम् भैरव उवाच कामा
त्र पादुकाद्यान्न कथयस्व ममाग्रतः देव्युवाच पादुकां पूजयाम्य
घ आद्यं तन्माण्डतां प्रभो कथं ते कथयिष्यामि तव स्नेहादिहोच्य
ते सर्वभूते महाशक्तिः पादाग्रयास्थिता यतः अतस्तो चरणो हृ
त्यो सर्वत्र भूतिमिच्छता आद्यन्तरहिता देवी पादुकादिस्वरूपिणी

योषितांयोनिमाश्रित्याय सर्व्वसिद्धिप्रदायिनी स्वतंत्रेयंमहाविद्यान
प्रकाशनकराचन संहारक्रमयोगेनदेवीसंहाररूपिणी सृष्टि
क्रमेणदेवेशिमहासृष्टिप्रवर्त्तिनी स्थितिक्रमेणसादेवीस्थिति
तत्वप्रवर्त्तिनी ब्रह्माविष्णुस्वरूपासामहादेवस्वरूपिणी आद्ये
मध्यमतीसिद्धिःसंहारक्रमयोगतः अंतेदेवेणसिद्धिःस्यात्पे
वेगात्व्यवियोनयः समदायमहामोहंददातिपरमाकुला पाउ
कापरमाविद्यासमादरसमन्विता एतांविनामहाविद्यानैव।
सर्व्वफलप्रदा कथितेयंमहाविद्यायत्नात्गोप्यासदेवहि त
वस्नेहान्महादेवकथितंचसुदुर्लभम् एतत्तत्रवमंत्रचप्रयो
गंचततःपरम् अतिभक्तायपुत्रायप्राणदायनदर्शयेत् अस
प्यापुत्रराजस्यभवनंयातिनिश्चितम् इतिज्ञानानन्दपरमहंस
विरचितेकौलावलीनिर्णयेऊनविंशोल्लासः १९ ॥
अथातःसंप्रवक्ष्यामिषट्कर्म्मविधिमुत्तमम् शांतिवश्यस्तंभ
नानिविद्वेषोच्चाटनेततः मारणंकर्म्मषट्कंचतेषांलक्षणमु
च्यते रोगकृत्याग्रहादीनांनिरासःशांतिरीरिता वश्यंजनानांस
र्व्वेषांविधेयत्वमुदाहृतम् प्रवृत्तिरोधःसर्व्वेषांस्तंभनंतदुदा
हृतम् स्निग्धानांद्वेषजननंमिथोविद्वेषणंमतं सद्धिद्यासि
द्धिकालादीन्ज्ञात्वाकर्म्माणिसाधयेत् पूर्व्वोक्तंवलिमंत्रेणव
लिंदद्यात्तत्रकार्ये रात्रावेवप्रयोगादौशिवायैवलसिद्धये दि
कालदेवतादीश्चज्ञात्वाकर्म्माणिसाधयेत् जलंशांतिविधौ

कौ शान्तवश्ये च वह्निर्हृदीरितः स्तंभने पृथिवी शस्ता विद्वेषे व्योम की-
११५ र्तितम् उच्चाटने स्मृतो वायुर्भूयोऽग्निर्मारणे मतः स्वच्छं वियत
वह्नितत्कृष्णोऽरक्तोऽग्निर्विधिर्दैवतः पंचभूतक्रमेणैव रूपमेतदुदीरि-
115 तम् दिवस्तत षड्बिन्दुलाञ्छितं मातरिश्वनः त्रिको-
णं स्वस्तिकोपेतं वह्नेरर्धेन्दुसंयुतम् व्योम्नो जलं भसो भूमेश्चत-
रस्रं सवज्रकम् तत्तद्भूतसमाभानि मण्डलानि विदुर्बुधाः व-
र्णैः स्वैरंजितान्यत्र स्वस्वनामहृतामपि भूतानामुदयं ह्ययोरपि उ-
यः संलक्ष्य येतत्पद्मयोस्तत्रादौ वमयोदयं निशितधीर्बीणस्य
दृण्डस्पृशि देवयः स्पृशि वारिणो कृतवहस्यार्द्धगते नृदयंति
र्थ्यकं समस्पृशि मारुतस्यपरितः शश्वन्मरुद्धर्मनीम् वश्यस्तं-
भनयोः प्रशस्त उदयो भूमेर्जलस्योदयः शस्तः शान्तिकपौष्टिका-
दिशुभे यद्वायवह्निः पुनः शत्रोर्मारणदारणादिकरणे प्रो-
च्चाटनोच्छेदने कुर्यात् शान्तिकनिर्विषीकरणयोर्व्योमादिता
स्त्वादयः तत्तद्भूतोदये समग्र तत्तन्मंडलं संयुते यंत्रं कुर्य्या
न्नत्र तन्यागुटिकया हरिद्रया शृद्धूमचिताङ्गारविषैरथक्र-
मेण तु प्रीताश्च सलिलक्षोणी व्योमवायुहविर्भुजाम् वर्णाः श्वे-
तपीतासितधूम्ररक्तास्तु यथाक्रमः वश्यादौ लेखनी दूर्वा स्याक
र्षे शिखिपिच्छिका विद्वेषोच्चाटने काकपक्षेणापि च मारणे
रतिर्वाणी रमा ज्येष्ठा दुर्गा काली यथाक्रमात् षट्कर्मदेवताः
प्रोक्ताः कर्मादौ ताः प्रपूजयेत् पंचमी च द्वितीया च चतुर्थी सप्त

मीतथा बुधेज्यारविसंयुक्ता शांतिकर्म्मणि पूजिता गुरुचन्द्रयुताष
ष्ठीचचतुर्थीचत्रयोदशी नवमीपौष्टिकेशस्ताअष्टमीनवमीतथा
दशम्येकादशीचैवभानुशुक्रदिनेतथा आकर्षणेत्वमावस्यानवा
मीप्रतिपत्तथा पौर्णमासीमन्दभानुयुक्ताविद्वेषकर्म्मणि कृष्णा
चतुर्दशीतद्वदष्टमीमन्दवारका। उच्चाटनेतिथिःशस्ताप्रदोषाच
विशेषतः चतुर्दश्यष्टमीकृष्णात्वमावस्यातथैवच मन्दार्कदि
नोपेताशस्तामारणकर्म्मणि बुधचन्द्रदिनोपेतापंचमीदशमी
तथा पौर्णमासीचविज्ञेयातिथिःस्तम्भनकर्म्मणि शुभग्रहोदयीकु
र्यात्शुभानिचशुभोदये रौद्रकर्म्माणिरिक्तार्कमृत्युयोगेचमार
णम् ईशचैन्द्रनैरृतिवायवीनांदिशोमताः सूर्योदयंसमा
रभ्यघटिकादशार्ककमात् ऋतवः षड्वसन्ताद्याअहोरात्रेदिनेदिने
वसन्तग्रीष्मवर्षाख्यशरद्धेमन्तशैशिराः हेमन्तःशांतिकेप्रोक्तोवसं
न्तोवश्यकर्म्मणि शिशिरःस्तम्भनेज्ञेयोविद्वेषेग्रीष्मईरितः प्राव
डुच्चाटनेज्ञेयः शरन्मारणकर्म्मणि गोमेषयोःशांतिकेचव्याघ्र
स्यत्वचिद्वीपिनोपिवा वश्येचस्तम्भनेशस्तागजचर्म्माणिद्वेषके उच्चाट
नेभल्लकस्यमेषस्यमारणेतथा महिषाश्वयोर्वाचर्म्माणिसाधयेत
साधकोत्तमः पद्मासनंस्वस्तिकंभूयोविकटंकुक्कुटंपुनः वज्रभद्र
कम्पिमाकूरासनानिमणिषिणः अंगुष्ठौचनिबध्नीयाद्धस्ताभ्यांबु
त्क्रमेणतु ऊर्वोरुपरिवीरेन्द्रः कृत्वापादतलेउभे पद्मासनंभवेदेत
त्सर्वेषामेवपूजितम् प्रजानपवियानेन अंगुष्ठधारणंचैतत् जा

कौ ऊर्वोरंतरे सम्यक् कृत्वा पादतले उभे ऋजुकायः सुखासीनः स्व-
११९ स्तिकं तत्प्रचक्षते सीवन्यामात्मनः पार्श्वे गुल्फौ निःक्षिप्य पाद-
116 योः एतद्वा स्वस्तिकं प्रोक्तं सर्वमस्थितरं करम् पद्मासनं समास्था-
य जानूर्वोरंतरे करौ निवेश्य भूमौ संस्थाप्य व्योमस्थः कुक्कुटासनः
गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् पार्श्वपादौ च
पाणिभ्यां दृढं बद्धा सुनिश्चलः भद्रासनं भवेदेतत् सर्वव्याधिवि-
षापहम् ऊर्वोः पादौ क्रमान्न्यस्य जान्वोः प्रत्यङ्मुखांगुलीः करौ वि-
दध्यादाख्यातं वज्रासनमुत्तमम् स्वस्वकल्पविधानेन मुद्रांदीक्ष
समाचरेत् षण्मुद्राः क्रमशो ज्ञेयाः पद्मपाशगदाह्वयाः मुसला-
शनिखट्वाङ्गाख्याः शांतिकादिषु कर्मसु हस्तौ तु संमुखौ कृत्वा
संनतायुन्नतांगुली तलांतमिलितांगुष्ठौ कुर्यात् पद्ममुद्रिका १
वाममुष्टिस्थतर्जन्यां दक्षमुष्टिस्थतर्जनीम् संयोज्यांगुष्ठकाग्राभ्यां
तर्जन्यग्रे क्षिपेत्ततः पाशाख्या मुद्राविद्भिः परिकीर्तिता २
अन्योन्याभिमुखौ हस्तौ कृत्वा वग्रथितांगुली अंगुष्ठौ मध्यमे ता-
यः संलग्ने च प्रसारिते गदामुद्रेयमाख्याता विद्भिः परिकीर्तिता ३
मुष्टिं कृत्वा तु हस्ताभ्यां वामस्योपरि दक्षिणम् कुर्यान्मुसलमुद्रे-
यं सर्वविघ्नविनाशिनी ४ अनामिकाद्वयं वेष्टवांकुश्च तर्जनीद्वयं
कनिष्ठामध्यमे चैव संश्लिष्टांगुष्ठेन वक्रमात् वज्रमुद्रेयमाख्याता वि-
द्भिः परिकीर्तिता ५ कनिष्ठानामिके बद्धा स्वांगुष्ठेनैव संयुता
शेषांगुली स्तव प्रसृते संसृष्टे खट्वांगमुद्रिका ६ सितरक्तपीतसि-

आकृष्टस्तम्भप्रकीर्तिता षट्कर्मदेवतावर्णाः कथितास्तु यथाक्रमात्
षट्कर्मदेवतायन्त्रतर्पणं चोपहारणम् पूर्ववच्चैव तथाज्ञेयं साधकानां स्व
सिद्धये मन्त्रेणान्तरितान् कुर्यान्मारणे नियथाविधि प्रथमं च विदर्भ
वशपुटं रोधनं तथा योगः पल्लवश्चेति विन्यासाः षट्सु कर्मसु यो
गस्तान्तरितान् कृत्वा साध्यवर्णान् यथाविधि ग्रथनं तद्विजानीयात्
प्रशस्तं शान्तिकर्मणि मन्त्राणि द्वयमध्यस्थं साध्यनामाहरं लिखेत्
विदर्भ एव विज्ञेयो मन्त्रिभिर्वश्यकर्मणि आद्यन्ते च मन्त्रस्य स्या-
न्नामः संपुटः स्मृतः पुरः स्यात्तन्मते शाल्वरोधो मन्त्रवेदिभिः
नाम्न आद्यन्तमध्येषु मन्त्रः स्याद्रोधने मतम् विदर्भस्य विधानेन तु
प्रशस्तो मारणे तु नमः मन्त्रस्यान्ते भवेन्नाम योगः प्रोच्चाटने मतः
अन्ते नाम्नो भवेन्मन्त्रः पल्लवो मारणे स्मृतः मुक्ताभिः स्फाटिकैर्वापि
समायोज्याद्रसूत्रकैः शान्तिकर्माणि मिश्रवा जपेन्मन्त्रस्य सिद्धये
प्रवालरक्तमणिभिर्वश्यपौष्टिकयोर्जपेत् मन्त्रतत्त्वागमणिभि
जपेदाकृष्टकर्मणि साध्यकेशसूत्रप्रोतैस्तुरंगदशनोद्भवैः
श्वेतमालां समालोक्य विद्वेषोच्चाटने जपेत् मृतस्य पुरुषस्य द
प्रोतैर्गर्दभस्य च कृत्वा तु मालां जपन्मध्ये शत्रुमारणमिच्छता सामा
न्याकथिता मालाविशेषाः पूर्वसूचिताः अनामिकामध्यभागे-
मालां संस्थाप्य साधकः शान्तिकस्तम्भवश्येषु अङ्गुष्ठाग्रेण चालयेत्
तर्जन्यङ्गुष्ठयोगेन विद्वेषोच्चाटयोर्जपेत् कनिष्ठाङ्गुष्ठयोगेन मारणे
जपईरितः मातृकयाथवा कुर्याद्यथातन्त्रविधानतः सर्वेषु च प्र

कौ योगेष्वदिवा सरस्वत्यं पचरेत् अथवान्यप्रकारेण कथ्यते साधनं महत्
११८ महाचीनक्रमे बीजं लिखित्वा कुङ्कुमेन च तत्पार्श्वे साध्यमालिख्य ता
डयेद् दृष्टिदृष्टिभिः तत्र गच्छति कामार्ता यत्र देशे स साधकः अथवा गो
117 रोचनादिभिर्द्रव्यैः स्वीयचन्द्रं समालिखेत् अतीव सुन्दरीं रम्यां तन्मध्ये
प्रतिमां शुभाम् ज्वलन्तीं नामसहितां कामबीजविदर्भिताम् चिन्तयेत्
ततो देवीं योजनानां सहस्रतः अदृष्टपूर्वा सा शक्तिः श्रुतमात्रातिदुर्ली
भा राजकन्याथवा वेगी भयलज्जाविवर्जिताः आयाति साधकं सम्यक्
मंत्रमूर्ता सती शुभा अथवा चक्रमध्यगतां मत्वा साधकश्चिन्तयेद्
यदा उद्यत्सूर्यसहस्राभमात्मानं महत्तथा साध्यमप्यरुणीमूर्तं
चिन्तयेत् साधकोत्तमः अनेन क्रमयोगेन भवाकन्दर्परूपवान् सर्व
सौभाग्यसुभगः सर्वलोकवशंकरः सर्वरक्तोपचारस्तु गुह्यानिहि
तविग्रहः चक्रं प्रपूजयेद्यस्तु यस्य नाम विदर्भितम् स भवेदासवत्
संमर्थने शो वापि वाक्पतिः अथवा चक्रमध्यगतं कृत्वा नाम यस्याः
स्तु योषितः अदृष्टां वा सतीं वापि योनिमुद्राधरो भयः द्रुतात्ता नयते वशी
त्रयस्त्रिंशीं राजकन्यकाम् नागिनीं यामसीं वापि गन्धर्वीं वासुरांगनां
विद्याधरीं दिव्यरूपामृषिकन्यां रिपुस्त्रियः मदनोद्भवसंतापां स्फुरद्
घनस्तनीम् कामबाणप्रभिन्नान्तःकरणां लोलचक्षुषीम् महा
कामकलाध्यानात्साधकः स्थिरमानसः क्षोभयेत्स्वर्गभूलोकपा
तालतलयोषितः अथवा रोचनाभागमेकं तु भागमेकं तु कुङ्कुमम्
अथ भागद्वयं चैव चन्दनैर्मर्दयेत्समम् एकत्र तिलकं कुर्यात्त्रिलोक

वशकारकम् अष्टोत्तरशताहुत्या मंत्रयित्वा वशं नयेत् राजानं नगरं ग्रा
मे दृश्यते साधकेनैव नियंतं तत् सर्वं तस्य वश्यगम् अथवा
योनिपुष्पैर्लिंगपुष्पैर्मिश्रीकृत्य च साधकः अंजलित्रयदानेन राजा
नं वशमानयेत् अथवा रहस्यस्थानके मंत्री लिखित्वा वनयाभुवि
वाहृच्छृंगारवेशाढ्यां सर्वाभरणभूषिताम् प्रतिमां सुन्दरीरम्यां वि
लिख्य सुमनोहराम् तद्भालगलहृन्नाभियोनिमण्डलयोषिताम्
यस्या नाम समस्ता विद्यां मंकुशान्तर्विदर्भितम् कामं वह्निसमारूढं
अष्टोत्तरसंयुतम् बिन्दुनादकलाक्रान्तमंकुशं परिकीर्तितम् स
र्वसन्धिषु देहस्य कामबीजं समालिखेत् स्वरान्तं पृथिवीसंस्थर
तिबिन्दुसमन्वितम् कथितं कामबीजं च सर्वसिद्धिप्रदायकम् नी
लदाडिमपुष्पाभं चिन्तयेद्देहसन्धिषु तदाशाभिमुखो भूत्वा स्वयं देवी
स्वरूपकः मुद्रांतहोमिभिर्णिवहामंत्रमष्टशतं जपेत् नियोज्य मदना
गारे च लक्ष्यं नरात्मके ततो ध्यायिकसर्वांगीं कामबाणैः सुपीडितां
अनन्यमानसां प्रेमभ्रमसमाकुलमदालसाम् एवमाकर्षयेन्नारीं यो
जनानां शतैरपि अथवा ईशानेऽ कुशमासाद्य तत्र यंत्रं विलिख्य च
अष्टमीरात्रिमारभ्य चतुर्दशीं पासमापयेत् अष्टोत्तरशतं मन्त्रो मंत्रयि
त्वा स्वयं यतः तांबूलपूरितमुखो मुक्तकेशो जितेन्द्रियः मदिराघूर्ण
नयनः परयोषित्समायुतः गन्धचन्दनपुष्पैस्तु दिग्वासाः कुलभूष
णः यन्नाम्ना दर्भितं यंत्रं पूजयेद्वीरसाधकः सा समायाति कामार्ता
यत्र देवः सम्पूजकः अथ चेद्रात्रिसमये स्वकुलं तूलिकोपरि वामभागे

समासीनं रक्तवस्त्रविभूषितम् गन्धपुष्पैर्धूपदीपैर्वेष्टितं स्वमनो-
हरम् सर्वशृंगारवेशाढ्यं स्फुरच्चकितलोचनम् चक्रकुन्दुजिता-
मित्रविशालकरिकुम्भकम् ललाटे मन्त्रमालिख्य साध्यनामविद
र्भितम् ततस्तं कंठे भुजमारोप्य भग्याहृतकुचाचलः ताम्बूलपूरि
तमुखः कुलं तदभिसंहितम् कुलाकुलजपं कृत्वा समानयति तत्
क्षणात् यन्नाम्नालिखितं यन्त्रं तां च नयति तत्क्षणात् शतयोज
नव्यवस्थानदीपर्वतमध्यगाम् द्वीपान्तरसहस्रेभ्यश्च दिव्यानिगडा
दिभिः पयोधरस्तव्यमध्यां च चलोत्पललोचनाम् नितम्बबिम्ब-
विधक्कस्फुरज्जघनमण्डलाम् साधकाकृष्टहृदयां विवशां तां प्रस
र्पिणीम् कपाटलोहसन्नद्धशरिकाविवरान्तरे साधकान्तः समा-
सीनां देवतामिव चारिणीम् एवमाकृष्टिसिद्धिः स्यात् साधकः कोटि
को भवेत् केनापि व्यपदेशेन समासाद्य वलिकलात् राज्ञो वीरवरो
वापि दैवो वा साधकोत्तमः निजं कुलं समादाय तत्कुलस्थान
विलिख्य मालिनीं देवीमारक्तवसनोज्ज्वलाम् निजवामोरुमध्ये
तु निजमन्त्रविदर्भितम् मालिनां साध्यनामानं विलिख्य तस्य मध्यतः
स्वयं कामकलारूपस्त्रिवासमहेश्वरीम् कामराजेन संपुटां दे
वीं ध्यात्वा स साधकः पूजयित्वा ततो जप्यमष्टोत्तरसहस्रकम् य
न्नाम्ना दीयते चैव सा वश्यं प्रतिपद्यते एतद्विधानयोगेन प्रभवंति
हि देवताः योगिन्यः खेचरसम्पापि के परे नरकिंकराः स्वयं दिव्यमय
रो वापि किं वा यं वीरसाधकः इति च तज्जैयते लोके सदा भ्रष्टो भ

विघ्नति तस्माद्यत्नाद्गोपितंअनप्रकाशंएकदाचन अनयाकु
ष्टिकर्म्मस्य इतिचेत्प्रतिपद्यते निमिषेहानिस्तदातस्य
प्रजायते यदिस्वभाववंतीविद्यांसाधकःस्थिरमानसः रात्रौचदिव
सेवापिजपेद्दृष्टोत्तरंशतम् जप्त्वाविघ्नं पस्थितस्यनविघ
ते अतिगुप्तेनकर्त्तव्यंवीरेणकुलसाधनम् निःसंगेनसदाकुर्य्या
त्कुलाकृष्टिविशेषतः कुलगेहप्रवेशार्थंरात्रौयामगतेत्रयः
जलमध्येचतुर्म्मार्गेआरामेवाश्मशानके शून्यागारेतथाबिल्व
मूलेवाजनवर्ज्जिते अष्टोत्तरसहस्रंतुयोजप्त्वागच्छतिध्रुवम् त
स्यविघ्नंनजायतेसाधनेसर्व्वथाप्यनः अथवासर्व्वकार्य्येषुजप्त्वा
त्वाचाष्टसहस्रकम् गच्छेद्यदिसदाधीरस्तदाविघ्नंनजायते
नचविघ्नंततस्तत्रतत्रतत्रजपांतरम् गमनंतस्यजायंतेतस्यवि
घ्नंनवर्त्तते अथवामातृकांसर्व्वांलिखित्वाचक्रवाक्ततः भूर्ज्ज
पत्रेस्वर्णपत्रेरौप्येवाथताम्रपत्रके साध्यनामान्वितंकृत्वाधार
येद्वामबाहुके सोऽवश्यःसर्व्वजन्तूनांव्याघ्रादीनांविशेषतः अ
थवामातृकायुक्तांससंज्ञांचक्रमण्डिताम् कर्पूरकुंकुमाद्यैश्च अ
जरामरतांलभेत् अनेनविधिनानेनरोचनागुरुचन्दनैः विदा
भितंचनाम्नातुयस्मिन्कस्मिन्नुपस्थितम् स्थावरंजंगमंवापि
सकलंजलमाण्डलम् वशीकुर्य्यान्महावीरः
निक्रांतनसंशयः कामराजेनबीजेनमहाकामकलात्मनाम् ए
केकांतरितंकृत्वासाध्यनामाक्षरंलिखेत् बहिरस्यालिखेद्देवेश

कौ येन्मातृकाक्षरैः हेममध्यगतं कृत्वा धारयेत् वामके भुजे शिखा
११९ यामथवा देहे शरीरे यत्र कुत्र वा करोति दासभूतं तद्दिव्यं लोकं सच
राचरम् संमोहयति राजानं वाजिनं दुष्टकुञ्जरम् चौरान्दस्यूंस्त
119 थाचैव तथा मंत्राभिचारकम् वक्रवज्राणि वेतालं दुर्द्दमं राक्षसं त
था भूतप्रेतपिशाचांश्च धारिता चक्ररूपिणी येन वीरेण तत्सर्वं
स कुर्याद्दासवद्वशम् तन्मध्ये च गतां पृथ्वीं सशैलवनकाननां
ध्यातः समुद्रपर्यन्तां ज्वलन्तीं चिन्तयेत्ततः षण्मासध्यानयोगेन जा
यते मदनोपमः दृष्ट्वाकर्षयते लोकं दृष्ट्वैव कुरुते वशम् दृष्ट्वा सं
क्षोभयेन्नारीं दृष्ट्वैवापहरेद्विषम् ... ष्ट्वाकर्षति वा गीर्वाणं दृष्ट्वास्त
म्भविलोचनम् दृष्ट्वा च तद्विषयस्त्रीणां नाशयेद्विषमज्वरान् पुत
नप्रकृतनं गात्रे चक्रं सिन्दूरमिश्रितम् करोति मदहृदाकर्षं हृद
स्यायाश्च योषितः मध्ये दिक्षु विदिक्ष्वेवं यदा देवीं प्रपूजयेत् दि
क्पतिक्रमयोगेन तदा सर्वं जगत्त्रयम् भूर्जपत्रे विलिख्यैव रोच
नागुरुकुंकुमैः तन्मध्ये नगरं देशं मण्डलं खण्डमेव वा स्वनामद
र्भितं कृत्वा यदि भूमौ निधापयेत् चक्रमेतन्महाभागे परं क्षोभ
नमुत्तमम् धारयेद्वामहस्तेन कण्ठे वा भुजमूलके शिखायामथ
वा वस्त्रे धारयेद्यत्र कुत्र वा रोचनाकुंकुमाभ्यां वलाद्दालक्तकैस्स
युतम् अर्कक्षीरेण संयुक्तं पुस्तकरसं तथा कस्तूरीद्रवसंयुक्तं
एकीकृत्य ततः परम् चक्रमेतत्समालिख्य यस्य नाम्ना स साधकः
तस्य व्याघ्रगजव्याधिरिपुसर्पविषादिकम् चौरग्रहजलारिष्टणा

किनीशाकिनीभयम् भयं न विद्यते कुत्र परमंत्राभिचारकम् नि
यंत्रं साधयेद्देवी कालमृत्युं विनाशयेत् न शक्नोति स्मितं तस्य रो
मैकमपि सर्वथा अथवा मध्यगां देवी त्रिकोणोदरगां तथा
अथ स्तम्भनाम संपुटां कारोचनां कुंकुमान्विताम् निधापयेच्च स
मा हातदा सर्वं तत्किंकरो भवेत् अथवा तांबूलपुष्पगुदकं प
त्रपुष्पफलं दधि उग्रं घृतं दत्तपत्रं वस्त्रं कर्पूरमेव वा कस्तूरी
कुंकुमं चैलालवंगं जातिपत्रकम् फलं वा वस्तु यच्चान्यत् सक
लं वा कदाचन अष्टोत्तरशतं जप्त्वा यस्मै कस्मै प्रयच्छति सा
वश्या जायते सद्यः नात्र कार्या विचारणा स्त्रियश्च सकला वश्या
दासीभूता भवंति हि दृष्टाकर्षणमेतद्धि कथितं नामयथा भवेत्
अथवा पीतद्रव्येण संलिख्य धारयेद्दिग्दिग्गतम् नाम्ना सर्वो
गम्यतेऽपि मूको भवति तत्क्षणात् सहस्रवदनश्चापि मूको भ
वति निश्चितम् अथवा महानीलरसेनापि नाम संयोजयेद्बुध
ः दक्षिणाभिमुखो वक्त्रो दग्ध्वा मारयतेऽचिरात् महिषाश्वपुरी
षाभ्यां गोमूत्रेणाभिमंत्रितम् कृत्वा शरावमध्यस्थं विदिशं स
र्वजनस्य तु गोरोचनया नाम काकपक्षेण संलिखेत् नीलकर्प
टके सम्यक् नीलसूत्रेण वेष्टयेत् लंबमानस्तदाकाशे परसैन्या
टनं भवेत् अथ लाक्षारोचनाभिर्महानीलरसेन च लिखित्वा
धारयेद्वर्कं सर्ववर्णान् वशं नयेत् अनेनैव विधानेन जलमध्ये
विनिक्षिपेत् सौभाग्यमतुलं प्राप्य स्नानपानान्न संशयः पतन्

कौ मध्यगतां पृथ्वीं नागरीं वा सुरांगनाम् समाहरेत् होमयेद्विंसत्वा
१२० लमालां विचिन्त्य नाम् अथवा लिखित्वा पीतवर्णेन स्त्रीयचक्रं य
120 दार्चयेत् पूर्वाशाभिमुखो भूत्वा सत्त्वं भयेत् सर्ववादिनः सिन्दूरेण
